॥अनुपसर्जनात्॥ ॥प्रसज्यप्रतिषेधोऽयमित्याह उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोतीति। पर्युदासे कोदोषः कुक्कुरीणाद्(?)इत्यत्र न स्यात् पूर्वप दस्योपसर्जनत्वात् नञ्‌ अंतांगत्वात् अगोवडीबिद्धते तदंतस्य समासः नचेदानीमुपसर्जनत्वे ङीषः पर्युदासः प्रवर्तिनामिनिर्दिष्टत्वात्। किंच प्रसज्यप्र तिषेधेप्येषदोषः समानः कुक्कुरीत्यत्रैव तर्हि न प्राप्नोति किं कारणं अन्वर्थमुपसर्जनमिति। स्त्रैवमनुपसर्जनं त्वप सर्जनादन्यत्सर्वं न तु प्रधानमेवेति नापेक्षणीयस्याभावेप्यप्रधानादन्यत्वादभविष्यति। यदा तर्हि धर्मीन्तादिवविरोधिवचनो नुपसर्जनशब्दस्तदा न प्राप्नोति तस्मात् प्रसज्यप्रतिषेधः अनु पसर्जनादित्येवं तदिति उपसर्जनान्नभवतीत्येवमित्यर्थः वक्ष्यति टिड्ढाणञिति ङीबिति। कथं प्रथमांतस्य वक्ष्यतीत्यानेन संबंधः अत्राऽऽऊः वक्ष्यति टिड्ढा

॥अनुपसर्जनात्॥ ॥अधिकारोयं उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोति यदित ऊर्ध्वमनुक्रमिष्यामः अ नुपसर्जनादित्येवं तद्वेदितव्यं वक्ष्यति टिड्ढाणञिति ङीप् कुरुचरी मद्रचरी। अनुपसर्जनादिति किं बहुकुरु चरा बहुमद्रचरा मथुरा। जातेरिति ङीष् कुक्कुटी सूकरी अनुपसर्जनादिति किं बहुकुक्कुटा बहुसूकरा मथुरा। कथं पुनरनुपसर्जनात्प्रत्ययप्रसंगः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥

णञिति वक्ष्यतीत्यर्थः कः पुनरत्र प्रत्ययस्तत्राह ङीबिति। एवं जातेरिति ङीषूदत्यत्रापि ग्रंथच्छेदः तत्रैव एवंविधस्मिन्नवस्थितीयमनुषंगः कुरुचरीति। चरेष्टः बहुकुरुचरेति बहुव्रीहिः सर्वोपसर्जनः कथं पुनरित्यादि। प्रत्युदाहरणोपदुपसर्जनं ननतत् स्त्रियां वर्त्तते यदा चास्त्रियां वर्त्तते तदा भवत्येव प्रत्ययः बहवः कुरुचर्यो यस्यां बहुकुरुचरीका बहुकुक्कुटीका मथुरेति यत्र स्त्रियां वर्त्तते बहुव्रीहिस्ततो टित्वात् जातित्वाच्चाप्रसंगः तथाहि टित्वाति यद् टित्कं शब्देनतद्व किंचित्स्यात् भावादिद्रवतिपथा नदट्चोरडिति किंचित्तदवयववृत्तित्वद्वारेणाय त्र स्त्र्यवयवे टित्वमपि किंचिल्लक्षणं तत्र समुदायार्थे तद्विज्ञायते समवायवयवः क्वचिद्वानु- स्तनं धयतीति क्वचिल्लक्षणमुडादिः क्वचिन्नद्धितरूपमुलादिः तत्रायं समुदायं यावयवो न अभिचरति तदर्थे तस्यापि टित्वमिति कुरुचरशब्दस्य टिततत्कु तो बहुकुरुचरशब्दात् प्रसंग इति प्रश्नः परिहरति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तदन्तविधिनेति ननु ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते ग्रहणं चोपादानमात्रं न तु स्वरूपेणोच्चारणमेव तत्कथं तदन्तविधिः स्यादित
त्यत्र स्वरूपमात्रेण रूपं प्रातिपदिकस्यैवासाधारणं तत्र तदन्तविधिप्रतिषेधः इह चोरुडित्साहि प्रातिपदिकमपि टित् ल्युडादिः प्रत्ययोऽपि धेड् इति धा
तुरपि तत्स्वरूपयथोगितस्त्वे सत्र वर्णोऽपि गित्प्रत्ययोऽपि प्रातिपदिकमपीति तदन्तविधिर्भवतीति तथेहापि प्रसंग इति प्राप्तस्य प्रसंगोपादि टिता प्रातिपदिकं
विशेष्येत टिति तु प्रातिपदिकेन विशेष्यमाणेनानेन विशेष्येण तदन्तविधिः प्रातिपदिके न चासंभवादिति नैव बहुकुरुचरशब्दात्प्रसंग इत्यत आ

॥ तदन्तविधिना ज्ञापितं चैतदस्यत्र प्रकरणे तदन्तविधिरिति। तथा च प्रधानेन तदन्तवि
धिर्भवति कुम्भकारी नगरकारी नगरीति कुरुग्रहणं तद्धितोऽप्यणस्ति॰ १४ ॥

ह॰ ज्ञापितं चैतदिति॰ शब्दान्वाख्यानेऽस्मिन्नत्र ज्ञापितमेतत्। अवश्यं चैतत् ज्ञापितमुत्तरत्रापि परिपालनीयमित्याह॰ तथा चेति॰ अनाश्रीय
माणो ज्ञापके णित्त्वं विधीयमानो ङीप्प्रत्यय अत्र ह परिभाषया कारशब्दात्स्वस्मात् न लभ्यते तेन कुम्भकारशब्दात् ज्ञापकात्तु ततोऽपि भवतीत्यर्थः
न तु च कुरुग्रहणपरिभाषया कुम्भकारशब्दस्याणन्तत्वेनेत्याह न चाणीति कुरुग्रहणमिति किं कारणमित्यत्राह तद्धितोऽप्यणस्तीति यत्र तु स्व
माणं रूपं ह तदेवासाधारणं तत्रैषा परिभाषा इह त्वौपगवीति तद्धितस्यापि ग्रहणमिति नायमस्या विषय इत्यर्थः॥ १४ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अथ कारशब्दादुत्पन्नो मत्यां कोरोषः कौंभकारेयो न स्यादिति प्रत्ययग्रहणपरिभाषया कारीशब्दात् स्त्रीभ्यो ढगिति ढकि तस्यैव वृद्धिर्लोपे सत्यां तां ष्यङः
संप्रसारणं च इति भविष्यति यथा ष्यङः तस्योत्तमानसंप्रसारणं परमकारीषगन्धीपुत्र इत्यत्रापि भवति स्त्रीप्रत्यये तदादिनियमाभावात् तथा कारश
ब्दादुत्पन्नो कुंभकारीशब्दस्यापि स्त्रीप्रत्ययांतत्वाद् भविष्यति एवमपि कारीशब्दादपि कदाचित्स्यात् अथ ब्रूयाः कारीशब्देन कुंभशब्दः सम
स्यते स्त्रीभ्यो ढगित्यत्र च ङ्याप्प्रातिपदिकादिति त्रितयाधिकारसामर्थ्यात् स्त्रीप्रत्ययांतात् प्रातिपदिकादिति प्रत्ययो विधास्यते स्त्रीप्रत्ययांत
स्य च प्रातिपदिकत्वं समासमंतरेणानुपपन्नमिति कुंभकारीशब्दादेव ढगुत्पत्स्यते ङ्याब्ग्रहणानुवृत्त्या च सौपर्णेय इत्यत्रापि भविष्यतीति
एवमपि ङ्याब्ग्रहणानुवृत्तेः सौपर्णेय इतिवत् कारीशब्दादपि स्यात् गतिकारकोपपदानामिति वचनात् सुबुत्पत्तेः प्राक् समासो दुर्लभः ततः कुंभकारश
ब्दादेव ङीप् तथा स्यादि सुत्तरत्रापि तदंतविधिरभ्युपगंतव्यः नच कुंभकारशब्दादुत्पन्नेति तदादिनियमाभावात् कारीशब्दादपि ढक्प्रत्ययप्र
संगः किं कारणं स्त्रीप्रत्यये चानुपसर्जने नेत्यनेन प्रत्ययग्रहणे परिभाषा सतदादेरधिकस्य ग्रहणमनुज्ञायते नान्यस्यापि ननु च सत्युत्त
रत्र तदंतविधौ कुंभकारीमत्र समुदायादपि भवतु केवलात् कारशब्दादपि प्रसंगः यथौपगवीत्यादौ तत्तथा कौंभकारेयः पक्षे तु ष्यङस्तेव एव
तर्हि कारशब्दादुत्पन्नो कुंभेनैकार्थीभूतस्यैतावतो निष्कृष्यापत्ये नायोगात् तदादिनियमाभावाच्च समुदायादेव ढग्भविष्यतीति तद्यद्यपि कुंभे
नैकार्थीभूतस्य कारस्य स्त्रीत्वेनायोगात् स्त्रीप्रत्यय एव न भविष्यति असति पुनरुत्तरत्र तदंतविधौ स्त्रीप्रत्ययस्यात्राप्रसंगः किं कारणं यद्गुणे
तं न तस्य निष्कृष्य स्त्रीत्वेन योगः यस्य च स्त्रीत्वेन योगो न तद्गुणं तेऽत उत्तरत्राप्यवश्यं प्रधानेन तदंतविधिरभ्युपगंतव्यस्तत्र यथा प्रधाने
न भवति तथोपसर्जनेनापि स्यादिति प्रतिषेधोपमारभ्यते तथा च पूर्वत्रोपसर्जनेनापि तदंतविधिर्भवति न षट्स्वस्रादिभ्यः प्रियपंचा
ङ्गोपदीति अतिक्रांता भवंतमतीति स्यादेतत् पूर्वत्रोपात्तं तदंतं वा स्त्रियामित्यनेन विज्ञेष्यते टिड्ढाणञित्यादि सूपात्तमेव टिड्ढादिकं तेन
ज्ञापितेपि न तदंतविधौ न ङ्कुरुचरीणसा गौरीहृदे-रत्वात्त्व भविष्यति कुंभकारीत्यत्र तद्गुणं तस्य स्त्रियां वृत्तेस्तदंतादपि भविष्यति नार्थ एते
नेति तन्त्रात्वदुक्तस्य विषयविभागस्योद्दर्शनित्वात् अतो विषयविभागज्ञापनार्थमिदमारभ्यते नन्वारब्धेप्यस्मिन्नेष विषयविभागः शक्य आ

© Dharmartha Trust J&K. Digitized by eGangotri

स्यातुं पंचाजीस त्राजानामस्त्रीत्वे न तदंतस्य स्त्रियां वर्तेरञाघतष्टावितिय प्रसंगात् अतो विष्य भावं प्रति कामचारः स्त्र्याघतष्टावितस्त्रियां इत्या
ग्निसाहो वौपालं स्त्रीत्वे न विशेष्यते व नो रवेलादावुपात्तं लदंतं चेति नार्थ एतेना एवं तर्हि तिदं न विधिज्ञापनार्थमिरमारभ्यते अस्मन्न हस्तूर्वे सित
नुशब्दामकर्तृन हि महाभ्रू इत्यत्र समुदाये जातिवचने भ्रू इ शब्दः स्त्रियां वर्तते अपरस्त्वाह लौकिकस्याप्रधानस्योपसर्जनस्येह ग्रहणं तेनापि
शिलिना प्रोक्ता मिक्षुसूत्रेण ततो छेअधीतं दत्यं स्तरण तस्य प्रोक्ता लुगिति लुक् आपिशला ब्राह्मणी अत्र इञ् इञ्श्चेति विहितस्य प्रोक्त प्रत्यय
स्यागोप्रधानत्वात् तदंतात् ङीत्र भवति नाविदानीमध्येतृ प्रत्यये लुप्ते प्रकृतेरेव तदर्थमाहेति प्रधानस्त्रियामध्येत्रामणांतस्य वृत्तेः स्यादेव ङी
प्रत्ययः स्यादेतदेवं यदि णांतादनुपसर्जनादिति उच्येत वयं त्वरणामेवानुपसर्जनत्वे न विशेषयिष्यामः अणो नुपसर्जन इति अर्थदूसकं चा
णः प्राधान्यमप्राधान्यं च तदेतदुक्तं भवति यस्मिन्नर्थे णुत्पन्नः स यदा प्राधान्येनोच्यते तदा तदंतान् ङीव् भवति यदा तु गुणभावेन तदा नेति
इहत्वाध्येत्रां संक्रांतत्वात्प्रथमस्यारोपे गुणभूत इति तदाश्रयस्ताव ङीन्न भवति यस्त्वध्येत्रागुत्पन्न स्तदाश्रयो पि न भवति तत्र स लुप्तत्वा
त्प्रत्ययलक्षणेनापि न भवति अणोकारस्य विशेषणात् टिड्ढाणञिति त्र यत इति वर्ततेत त्राणंतादकारांतादिति विज्ञायमाने स्याप्रत्य
यलक्षणमणो लकारे विशेष्यमाणो वर्णनिमित्तो ङीप्रत्ययः कथं प्रत्ययलक्षणेन स्यात् न नु स्त्रियामित्यनुवृत्ते नाणो विशेषयिष्यामः
यो णस्त्रियां विहित इति एवमपि काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणीति ठितीये णप्रोक्ता लुगि
ति लुप्ते पि प्रथमो णस्त्रियामेवोत्पन्नः तदंतात् ब्राह्मण्यां वर्तमानात् ङीप्प्रसंगः तस्मात्प्रधानेन यथा स्यात् प्रधानेन्मा भूदित्येतत्प्रयो राम॰
जनं सूत्रस्येति ॥ ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥ १५

© Dharmartha Trust J&K. Digitized by eGangotri

टिड्ढाणञ्॥ ॥ इह कस्मादिति। लडादेशस्य स्थानिवद्भावेन टित्त्वमस्तीति प्रश्नः। पचमानायजमानेति। ननु शानजादिषु लटः स्थानिवद्भावा
त्। अनादेशपक्षः स्थापितः। पचमानेत्यादिषु शानजादयः अनुबन्धकत्वाल्लटः इति लडादिषु कार्येष्वनुबन्धा इति भावः। एतेन लिट्ल
ङे आख्यातोऽनुवृत्या नायक्ष्यमाणोति। ल्युडादिषु कथमिति। अनुबन्धकत्वान्नेषामपि ग्रहणेन भाव्यमिति प्रश्नः। टित्करणसामर्थ्यादिति। तेन
च लडादिष्वपि टित्करणसामर्थ्यमित्याह। अटित्त्वेति। पठिताविद्येति। कथमित्यनुषंगः। टित्त्वमुभयार्थं स्यादिति प्रश्नः। आगमटित्त्वमनिमित्तमि

**टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ख्युनाम्॥ ॥ अत इति सर्वत्रानुवर्त्तते तस्मिन्निति संभ
वे विशेषणम्। भवति। टिड्ढादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप्प्रत्ययो भवति। टापोऽपवादः। टित् तावत्। कुरु
चरी। मद्रचरी। इह कस्मान्न भवति पचमाना यजमाना। अनुबन्धकत्वाल्लटः। ल्युडादिषु कथं टित्करणसा
मर्थ्यादिह तत्र तु टेरेत्वं फलम्। पठिता विद्येति आगमटित्त्वमनिमित्तं घुघुलो तु द्वेतिलिंगात्॥ ८॥ ॥**

ति आगमानां टित्त्वं ङीपो निमित्तं न भवतीत्यर्थः। कुत एतदत आह घुघुलो तु द्वेतिलिंगादिति। यद्यागमटित्त्वं ङीपो निमित्तं स्यात्ततः सार्य
तनी स्यादेतु इत्यागमस्य टित्त्वान्ङीप्प्रसिद्ध इति घुघुलोष्टित्करणमनर्थकं स्यादिति भावः। ननु च पुराणप्रोक्तेष्विति निर्देशेन यद्दात्तु
एन भवतीति टाङीबर्थं तयोष्टित्त्वं स्यात् तत्र पुराणशब्दात् टुट्यादिः सुपाठान्ङीषा भवितव्यं अन्तोदात्तो हि पुराणशब्दः पुनः पुनर्जायमानो
पुराणीति यथा। एवमपि नत्रापकं बह्वादिभ्यश्चेत्यत्र वेति वर्त्तते ततश्च ङीषामुक्ते ङीप् यथा स्यादिति घुघुलोष्टित्त्वं स्यादिति चिंत्यमेतत्॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्रोपर्णेयीति। सुपर्णीशब्दात्स्त्रीलाकर्णादिद्वीषंनात्स्त्रीभ्योढक्। ननुचसानुबंकत्वात्स्यग्रहणेननभवितव्यमत आह निरनुबंधक इतियद्यपिशिला याढ इति निरनुबंधकोढशब्दोस्ति सइह स्वभावान्नपुंसकलिंग इति स्त्रियांनास्तीत्युक्तं सोपि सभायायः ढश्छंदसीति ढः सोपि स्त्रियांन वर्त्ततेकथं तत्रतत्र साधुरितिवर्त्ततेकथंचस्त्रीनाम सभायांसाध्वीस्यात्प्राग्घत इत्यधिकारः ननु मानाम भूद्घत्सभायांसाध्वीशालापांस्त्री सभेवसाध्वीभविष्यतितथाघत्तसभार्यासाध्वीशाल्याशिरिषादिस्तत्रापिप्रसंगः एवंतर्हि विधिविधेविषयेछंदसिसभेयीशब्दस्यप्रयोगाभावोत्र हेतुः एोपिक्कचिदण्कृतंकार्यंभवतीतिशीलंछत्रादिभ्योण इतियोणस्तत्राणकृतंकार्यंभवतीति। कथंज्ञायकात यदयंकार्मस्ताच्छील्ये इतिटिलोपार्थंनिपातनंकरोतियदिहिताच्छीलिकेणेऽणकृतंकार्यंनस्यान्निपातनमानर्थकंस्यात्कर्मशब्दाच्छत्रादिलक्षणेणेकृते

स्रौपर्णेयी वैनतेयी। निरनुबंधकोढशब्दः स्त्रियांनास्तीति निरनुबंधकपरिभाषानप्रवर्त्तते। अण। कुंभ कारीनगरकारी। औपगवी। एोपिक्कचिदण्कृतंकार्यंभवति चौरी तापसी। टाडमो ह्रस्वश्चनभवति। अ ज्ञः औत्सी औदपानी। शार्ङ्गरवाद्यञ इतिपुनरञोग्रहणंजातिलक्षणंङीषंबाधितुं। द्वयसच्। ऊरुद्व यसी। जानुद्वयसी। दघ्नच्। ऊरुदघ्नी। जानुदघ्नी। मात्रच्। ऊरुमात्री। जानुमात्री। तयप्। पंचतयी। द (शतयी। ठक्। आक्षिकी। ठञ्। लावणिकी १५

नस्तद्धितइत्येवटिलोपस्यासिद्धत्वान्नलोपाचान्नितिप्रकृतिभावः अणिहि प्रकृतिभावः। चौरी तापसीति चुरा तपः शब्दौ छत्रादिषुपठितौ। क्वचिदिति सर्व्वत्रसमावर्षदर्शयति टाडमो ह्रस्वश्चेति टंडमुक्षिशब्दाभ्यां तदसं प्रहरणमितिणमितिणः। औत्सी औदपानीति। उत्सोदपानशब्दाभ्यांभवार्थे उत्सादिभ्योञ। अथ शार्ङ्गरवादिसूत्रेपुनरञ्ग्रहणंकिमर्थं यावता अनेनैवसिद्धंनरूपभेदोनस्वरभेदः तत्राह शार्ङ्गरवाद्यञ इत्यादि। बिदस्यापत्यंबैदी अनृष्यानंतर्येविदादिभ्योञ गोत्रंचचरणैः सहे तिजातिः तत्रौत्सीत्यादौचरितार्थमिमंङीषंबाधित्वाजातिलक्षणोङीषप्राप्नोतिपरित्वाद्धितस्यनिबंधनमस्तितदेवाञ्ग्रहणमस्तुकिम त्राञ्ग्रहणेननवाजात्यधिकारात्जातेरितिहितत्रवर्त्ततेअनधिकारेहिपुंयोगादाख्यायांङीनप्रसंगः बैदस्यस्त्रीबैदी। ऊरुद्व्यसी

राम: १६

© Dharmartha Trust J&K. Digitized by eGangotri

ठनादिनिवृत्त्यर्थमिति। इंडो स्यात् आत्ते अन्त इति ठनो इंडिकाका इत्यादिस्य पष्ठस्त्रिश्चौका शिके सा डीमाभूदित्येवमर्थाता दृशी इति सहादिष्वदृशो
नालोचने कञ्चेत्यत्र सर्वनाम्नः कञोञकारो त्वारणमात्रो नुपसर्गे कः गोरेत्वा डीमाभूत। इत्वरीति। इण्णशजिसर्तिभ्यः क्वरप्। आद्यंक
रणीति। आढ्यसुभगेत्यादिना ख्युन्। नञ्स्नञीकक्ख्युंस्तरुणतलुनानामिति। भाष्ये तु कञ् क्वरप् इत्येतावत्सूत्रं ख्युनः पाठो नार्थ इति तस्मा
द्युपसंख्यानमेव कृतं। स्त्रैणपौंस्नीनिति स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्। शाक्तीकी याष्टीकीति ग्रहणाधिकारे शक्तियष्ट्योरीकक्। तरु

।।ठञ्।लावणिकी।।भेदेनग्रहणं ठनादिनिवृत्त्यर्थं।कञ्।यादृशी तादृशी।क्वरप्।इत्वरी नश्वरी।ख्यु
न्।आढ्यंकरणी।सुभगंकरणी।नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं।स्त्रैणी।पौंस्नी।शाक्ती
की।याष्टीकी।तरुणी तलुनी।। ।।यञश्च।। ।।ङीबित्येव यञन्तात् स्त्रियां ङीप्प्रत्य
योभवति।गार्गी।वात्सी।आपत्यग्रहणं कर्त्तव्यं द्व्यह्माभूत्।द्वीपादनुसमुद्रं यञ् द्वैप्या।पृथग्योगक
रणमुत्तरार्थं।। ।।७।। ।।

णी तलुनीति एतयोरेव योर्थग्रहणं तरुणी सुरेन्ति वयसि प्रथम इत्येव सिद्धं न सिद्ध्यति गोरादिपाठा ङीष् प्राप्नोति तस्मात् मस्त्ववयसि चरी
पुडीषो विकल्पः क्वचिद्गौरादिपाठात् सिद्धमिति पठ्यते तद्रूपमात्रसिद्ध्यभिप्रायं द्रष्टव्यं स्वरार्थं तूपसंख्यानं कर्त्तव्यमेव।। ।।यञश्च।। ।।
आपत्यग्रहणमिति अपत्ये भव आपत्यः यञ आपत्यो रिति सूत्रं कर्त्तव्यमिति सूत्रार्थः। द्वैप्येति वाराव र्थेय ञ्योगविभाग उत्तरार्थ इति उ
त्तरत्र यञ एवानुवृत्तिर्यथा स्यादिञादीनां माभूदिति।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।छ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰पृ॰२५

१७

॥ प्राचां ॥ ॥ षकारो ङीषर्थ इति। ननु च ष्फप्रत्ययेनैव स्त्रीत्वस्य द्योतितत्वान् ङीषानर्थक्यं तत्राह प्रत्ययद्वयेनेति तद्धितग्रहणं प्रातिपदिकसं
ज्ञार्थं तु ङीषर्थो ननु च सिद्धोऽत्र ङीष् षित्करणसामर्थ्यात् यातोऽस्तु त्र्यादेश षित्वमद्धि· यौ चरितार्थमिति त्र्यपाक्षमत्याहो ङीषभावः तदेतत्सा
मासिकं तिष्ठतु तावत्। सर्वत्रग्रहणमित्यादि सर्वत्रग्रहणं तावत् उत्तरसूत्रेण कर्तव्यं आरंभसामर्थ्यादेव प्राचामिति सम्पनिहन्तो सर्वत्र सि

॥ प्राचां ष्फ तद्धितः ॥ ॥ यञन्ताल्लेवप्राचामाचार्याणां मतेन यञंतात्स्त्रियां ष्फ प्रत्ययो भवति स च त
द्धितसंज्ञकः। षकारो ङीषर्थः। प्रत्ययद्वयेनेह स्त्रीत्वमभिव्यज्यते। तद्धितग्रहणं प्रातिपदिकसंज्ञार्थं।
गार्ग्यायणी। वात्स्यायनी। अन्येषां गार्गी। वात्सी। सर्वत्रग्रहणमुत्तरसूत्रादिहानुकृष्यते बाधक
बाधनार्थं आवट्याच्चापं बस्तिनमपि बाधित्वा प्राचां ष्फ एव स्यात् आवट्यायनी॥ १६ ॥

द्वत्वारस्तस्मादिहापकृष्यते तद्यमर्थो भवति सर्वत्र बाधकविषयेऽपि प्राचां मतेन यञंतात्ष्फो भवतीति एवं सत्यप्यर्थेऽपि समंजसो भ एम॰
वति। आवट्याच्चापं वस्तीति असति पुनरपकर्षे आवट्याच्चा बुद्धौ चांमते सावकाशः परत्वात् ष्फं बाधेत सर्वत्रग्रहणात्ष्फ एव भवति १७
एवं च षाच्च यञन्त इति वा विषयेऽपि प्राचां ष्फ एव भवति शार्कराक्ष्यायणीत्येतिमाष्यायणी गौकक्ष्यायणीति॥ ॥ १६ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥सर्वत्र॥ ॥लोहितादीति एष्यकपदे लुप्तविभक्तिकं पूर्वत्र च प्राचांमते ष्फो विहितः इह तु सर्वत्र मते कोर्थः सर्वेषां मत इत्यर्थः तदाह सर्वेषा
माचार्याणां मत इति मते नेति तृतीयांतपाठे सूत्रे षष्ठ्यंता तु लस्वतंत्रमिति योन्यस्यावयवो न भवति तत्स्वतंत्रं प्रातिपदिकं। कथं पुनरस्याविस्पत्राह
कपिशब्दात्पर इति। लोहित्यायनी सा दिर्गर्गादिष्वंतर्गणः बभ्रुशब्दोपि तत्रैव पठ्यते यञ तु मधुबभ्र्वोर्ब्राह्मणकौशिकयोरित्यनेनैव भवति। कण्वा
त्तु स्यादिर्यो कण्वशब्दात्पूर्वः कतशब्दात्परः शकलशब्दस्तेनैते कतशकलकण्वगर्गास्तेषां संनिवेशः कार्य इत्यर्थः किमेवं सति भवतीत्याह पू

॥सर्वत्र लोहितादिकतंतेभ्यः॥ ॥अनंतरस्येव पूर्वेणा विकल्पे प्राप्ते नित्यार्थं वचनं। सर्वेषामाचार्याणां मते लोहि
तादिभ्यः कतपर्यंतेभ्यो यञंतेभ्यः स्त्रियां ष्फः प्रत्ययो भवति। कतशब्दः स्वतंत्रं प्रातिपदिकं तदवधित्वेन परि
गृह्यते कपिशब्दात्परः कपिकतेति न प्रातिपदिकावयवः कुरुकतेति। लौहित्यायनी॥ शांसित्यायनी॥ बाभ्रव्या
यणी॥ कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते। पूर्वोत्तरौ तदंतादी ष्फाणौ तत्र प्रयोजनं॥ प्रातिपदिकेषु यस्तथा
पाठः स एवं व्यवस्थापयितव्य इति मन्यते॥ ॥छ॥ ॥

र्वोत्तरावितिसशकलशब्दोंत आदिश्च यथाक्रमं ययोः पूर्वोत्तरयोर्गणयोस्तौ तथोक्तौ पूर्वो गणो लोहितादिः शकलशब्दांतो भवति उत्तरश्च गणः
शकलशब्दादिर्भवतीत्यर्थः सत्यमिदं भवति प्रयोजनं तु किमित्यत आह ष्फाणाविति। श्लोकं माचष्टे प्रातिपदिकेषु यस्तथा पाठ इति कपिकतकुरुक
तस्य न दुहके एव शकले सेवं गर्गादिषु गणसंनिवेशः। स एवं व्यवस्थापयितव्य इति। एवमिति श्लोकोक्तया नुपूर्व्येत्यर्थः अन दुह कुरुकतशब्दाव
सामस्थानोदयलक्ष्मा मत्र पाठ्यौ शकलशब्दस्तु कतकण्वयोर्मध्ये पठितव्य इति यावत्। न चैवं गणद्वयादपि प्रसंगः शकलशब्दः ष्फाणौ द्वावपि
न प्रतिपद्येतेत्यत आह॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कात्तंतेभ्य इति बहुव्रीहितत्पुरुषयोरेकशेष इति कलस्यान्तः समीपभूतः कत्तंन्त इति तत्पुरुषेण शकलशब्दः अत्र शकं धारयित्वा निपातनाद्धापर
रूपं तथा कलोन्तोपेषां ते निकलन्तानीति बहुव्रीहिः तत्र बहुव्रीहितत्पुरुषयोः सह विवक्षायां बहुव्रीहिः शिष्यते स्वरभिन्नानां परस्परेण स्वरः वि
धिः स शिष्यत इति वचनात् । तथेत्यादि । कणवादिभ्य इत्यपि बहुव्रीहितत्पुरुषयोरेकशेष इत्यर्थः कणवस्या । दिः समीपभूतः कणवादिः शकलश
ब्दः कणवन्त्यादिर्येषां तानि कणवादीनि तत्र पूर्ववदेकशेषः । तत्र बहुव्रीहिः । पुरुषयोर्मध्ये तत्पुरुषस्य तत्पुरुषसमासेन । मध्यवर्तीति । ग

कत्तंतेभ्य इति बहुव्रीहितत्पुरुषयोरेकशेषः तथा कणवादिभ्यो गोत्र इति तत्पुरुषस्य समं गृहीतो मध्यपाती
शाकलशब्दोपजन्तः प्रत्ययद्वयमपि प्रतिपद्यते शाकल्यायनी शाकल्यस्येमे छात्राः शाकलाः ॥ ॥ कौरम
मांडूकाभ्यां च ॥ ॥ कौरव्यमांडूक इत्येताभ्यां स्त्रियां ष्फ प्रत्ययो भवति कुर्वादिभ्यो ण्य इत्येकं मंडूकादि
ति च यथासंख्यं टाबपवादः कौरव्यायणी मांडूकायनी कथं कौरवी सेना तस्येदं विवक्षायामणि हृ
ते भविष्यति कौरव्यमांडूकयोरासुरेरुपसंख्यानं आसुरायणी शेषिके घ ष्वत्थ्यासुरेत्यणि प्राप्ते छ प्रत्ययप्र
प्रपते आसुरीयः कल्पः ॥ १७ ॥ ॥

णाद्वयस्य प्रत्ययद्वयमपीति ष्फ ष्णा वित्यर्थः । शाकला इति आपत्यस्येति यलोपः । अपरस्त्वाह पूर्वोत्तरौ तदंतादीयाद्यागिति शेषः पूर्वेणाग्णान राम॰
दन्तो ग्राह्यः सर्वत्र लोहितादिशाकलान्तेभ्य इत्युत्तरेण गणसूत्रादिर्ग्राह्यः शाकलादिभ्यो गोत्र इति एवं ष्फाणोः प्रयोजनमिति ॥ ॥ कौरव्य ॥ ॥ १८
कौरव्यमांडूकयोरीत्यादि । आसुरिर्नाम ऋषिः आसुरेरपि ग्रहणं कर्तव्यं आसुरि कौरव्यमांडूकेभ्यश्चेति वक्तव्यमित्यर्थः आसुरायणीति ष्फ स्य तद्धि
तलाघस्येति चेति यलोपः तस्येदं तद्धितग्रहणमेव लिंगं भवत्यासुरेरपि ष्फ इति यञादिष्वकारान्तेषु सवर्णदीर्घत्वेनापि रूपं सिद्धं शेषिकेषु चा
र्थे षिति आसुरीप्रसंगादिमत्रोक्तं अन्यथा ह्यासुरेर्ग्रहणं कर्तव्यं स्यात् आसुरस्यापत्यमासुरिः तेन प्रोक्त आसुरीयः कल्प इति ॥ १७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥वयसि॥ ॥श्रुत्येति श्रवणमात्रेण प्रकरणाद्यनपेक्षयेत्यर्थः कुमारीति प्रथमवयोवचनत्वादयं न पुंयोगाभावहेतुकः पुंस्यपि प्रयोगात् तथा तु वृ-
द्धानां प्रयोगो वृद्धकुमारीति स पुंयोगाभावात्साधर्म्याद्द्रष्टव्यः वयस्यचरम इति चरममन्त्यं अचरमे अनन्त्ये इह केचिद्बाल्यादिवयांसि षड्इति कौमारं यौ-
वनं मध्यत्वं वृद्धत्वमिति यथाहुः प्रथमे वयसि नाधीतं द्वितीये नार्जितं धनं तृतीये न तपस्तप्तं चतुर्थे किं करिष्यतीति अन्ये तु त्रीणि पिता रक्षति
कौमारे भर्त्ता रक्षति यौवने पुत्रस्तु स्थविरीभावे न स्त्री स्वातंत्र्यमर्हतीति अन्ये तु बाल्यमध्यत्ववृद्धत्वानि त्रीणि आषोडशाद्भवेद्बालो यावत्क्षीरान्न-
वर्त्तकः मध्यमः सप्ततिर्यावत्परतो वृद्ध उच्यते एषु सर्वेषु दर्शनेषु यौवनं द्वितीयं वयो भवति यौवनवचनेनोचवधूः चिरंटशब्दो अतो न प्राप्नोतीति
आह द्वितीयवयोवचनावेनाविति पक्षान्तु द्वे एव वयसी उपचयापचयलक्षणे तेनैतद्वक्ष्यमं यौवनस्यापि प्रथमवयोरूपत्वात् ॥ श्रुत्यावर्त्तत इति प

॥वयसि प्रथमे॥ ॥कालकृता शरीरावस्था यौवनादिर्वयः प्रथमे वयसि यत्प्रातिपदिकं श्रुत्यावर्त्तते ततः स्त्रियां ङी-
प्प्रत्ययो भवति कुमारी किशोरी बर्करी प्रथम इति किं स्थविरा वृद्धा अत इत्येव शिशुः वयस्यचरम इति वक्तव्यं व-
धूटी चिरंटी द्वितीयवयोवचनावेतौ प्राप्तयौवना स्त्र्यभिधीयते कथं कन्या कन्यायाः कनीन चेति ज्ञापकात् उत्ता-
नशया लोहितपादिकेति नैता वयः श्रुतयः ॥ ॥द्विगोः॥ ॥द्विगुसंज्ञकात्प्रातिपदिकात्स्त्रियां ङीप्प्रत्ययो भव-
ति पंचपूली दशपूली कथं त्रिफला अजादिषु द्रष्टव्यते ॥ ॥

द्युक्तं तस्याव्यावर्त्यं दर्शयति उत्तानशया लोहितपादिकेति नैता वयः श्रुतय इति श्रुत्या श्रवणमात्रेण नैते वयः प्रतिपादयन्तीत्यर्थः इह तावदु-
त्तानशयेति क्रियाकारकसंबंधमात्रं प्रतीयते तदेवं च प्रवृत्तिनिमित्तं उत्तानादिषु कर्त्तृष्विति शेरतेरच् प्रत्ययः सर्वे विवक्षितादिडुत्तानाशेते स्त्र्य-
ते चेदमुत्तानशयेति तत्र नियमो गम्यते अन्यथा त्वमुमसामर्थ्यादुत्ताने वृद्धे तरति एवमपि स्यादेह: बालो हि ऽति तस्मादुत्तानेव शेत इति नियमे
न ठुत्वाभावे च प्रकरणादिना वसिते बाल्यं गम्यते लोहितपादिकेत्यत्रापि अन्यपदार्थमात्रं श्रुत्या प्रतीयते प्रकरणादिना त्वभावत एव तस्मार-
कोपासैनालक्तकादिनेति प्रतीतौ मत्सो बाल्ये ति गम्यते इति शाद्वः प्रकारे एवं प्रकारा न वयः श्रुतय इत्यर्थः अत एव बहुवचनं तेन द्विवर्षसा-
शावपि न भवति अत्रापि प्रकरणादिना वयो गम्यते परिमाणमात्रं तु शब्दार्थः शालासावपि प्रयोगात् द्विवर्षे भूमाविति ओकमी त्वविद्यत्ववाचि

॥ [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

का·प८·४
१९

॥अपरिमाण॥ ॥तद्धितलुकि सतीति परसप्तमीत्वेषा नोपपद्यते अभावरूपेण लुका योगो विपर्यासंभवात् । सर्वतो मानं परिमाणमिति परिमाणं
तु सर्वतः तस्य ग्रहणं न परिच्छेदकमात्रस्येत्यर्थः । पंचभिरश्वैः क्रीतेति तद्धितार्थे द्विगुः आर्हीयष्ठक् कालः संख्या च न परिमाणमिति न हि ता
भ्यां सर्वतः आरोहतः परिणाहतश्च मीयते एवं च कालः संख्या चेति प्रत्युदाहरणार्थत्वात् प्रमाणमपि परिमाणं न भवतीति तथा चोत्तरसूत्रे काण्डा
दृप्यापरिमाणे वा बिस्तादिरिति विरूपत्ति प्रमाणविशेषः काण्डमिति च ते न द्वौ ऊर्मो प्रमाणमस्य इति मात्रचः प्रमाणो लो द्विगोर्नित्यमिति लुकि द्वि

॥ ॥अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि॥ ॥पूर्वेणाप्राप्तो ङीप् प्रतिषिध्यते।
अपरिमाणान्तान् द्विगोर्बिस्ताचितकम्बल्यान्ताच्च तद्धितलुकि सति ङीप् प्रत्ययो न भवति। बिस्ता
दीनां परिमाणार्थं ग्रहणं सर्वतो मानं परिमाणं। अपरिमाणान्तात् तावत्। पंचभिरश्वैः क्रीता
पंचाश्वा दशाश्वा। तेन क्रीतं ठक् अध्यर्धपूर्वद्विगोर्लुगसंज्ञायामिति लुक्॥ १८ ॥ ॥

शमाद्विशमेति भवतीत्यर्थेव मुन्मानमपि परिमाणं न स्यात् कश्चिदाह इष्टमेवैतदुन्मानमपि नैवात्र परिमाणग्रहणेन गृह्यते द्वाभ्यां नि
ष्काभ्यां क्रीता प्राग्वतीयष्ठञ् जो द्वित्रिपूर्वान्निष्कादिति लुक् द्विनिष्का त्रिनिष्केति भवतीति। अपर आह बिस्तकम्बल्यग्रहणं ज्ञापकमुन्मान रामः
मप्यत्र परिमाणग्रहणेन गृह्यत इति तयोरुन्मानविशेषत्वात् सुवर्णं बिस्तो हेम्नोऽक्षे कम्बलाच्च संज्ञायां कम्बलस्य मूर्णापलशतमिति निघाम १९
कारस्तु द्वौ बिस्तौ परिमाणमस्येति विगृह्य द्विबिस्तं परिमाणमन्यते॥ ॥१८॥ ॥छ॥ ॥छ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द्विवर्षेति कृतस्तुत्पादानमेतत् द्विशता त्रिशतेति द्वाभ्यां शताभ्यां क्रीतेति पाणमासमाषशतायदिति निमित्ते प्राप्ते शताच्च ठन्यतावशते इति ठन्यत्रशताच्चेति वक्रम
मितिवचनात् शेषं व्याख्याप्रतिशतं तापाः कन्निति कन्न तस्य ध्यर्द्धपूर्वेति लुक् द्विबिस्तेति परिमाणत्वेन ठञो लुक् उन्मानत्वेन ठकः आचितेति प्र
चितो दश भाराः स्युः द्वावाचितौ पचति आढकाचितपात्रात्खोऽन्यतरस्यां द्विगोष्ठंश्चेति पक्षे ठन् खे तु आभ्यामुक्ते प्राग्वतीयष्ठञ् तस्य पूर्ववल्लुक् द्विकंब
ल्येति क्रीतार्थे ठञो लुक् आढकाद्याचितेत्यनेन तुल्यं पंचाश्वीति समाहारे द्विगुः इमौ द्वौ प्रतिषेधावुक्तौ तत्रैकः शब्दोक्तस्तु कथमेवं वक्ष्यामि परिमा
णान्तात् द्वितलुकीति तान्नियमार्थं भविष्यति परिमाणान्ताद् द्वितद्धितलुकि ङीब् भवति नान्येनेति तेनाढकी [redacted] सा दोषो भविष्यति पंचाश्वेत्यादौ चन भ

काल: संख्या च न परिमाणं द्विवर्षा त्रिवर्षा द्विशता त्रिशता बिस्ता द्विबिस्ता त्रिबिस्ता आचिता द्व्याचिता त्र्याचिता द्विकंब
ल्या त्रिकंबल्या अपरिमाणमिति किं द्व्याढकी त्र्याढकी तद्धितलुकीति किं समाहारे पंचाश्वी दशाश्वी॥ ॥काण्डान्ता
त्क्षेत्रे॥ ॥काण्डशब्दान्ताद् द्विगोस्तद्धितलुकि सति क्षेत्रे वाच्ये ङीप्प्रत्ययो न भवति। द्वे काण्डे प्रमाणमस्याः क्षेत्रभक्तेः प्रमा
णे द्वयसज् इति विहितस्य द्विगोर्नित्यमिति लुकि कृते द्विकाण्डा क्षेत्रभक्तिः त्रिकाण्डा क्षेत्रभक्तिः।
काण्डशब्दस्यापरिमाणवाचित्वात् पूर्वेणैव प्रतिषेधे सिद्धे क्षेत्रे नियमार्थं वचनं इह मा भूत् द्विकाण्डी रज्जुः त्रिकाण्डी रज्जुरि
ति। प्रमाणविशेषः काण्डं॥ ॥

भविष्यति ततो बिस्ताचितकंबल्येभ्यो नेति नैवं शक्यं विपरीतोऽपि नियमः संभाव्येत परिमाणान्तात् द्वितलुक्येवेति तत्र को दोषः परिमाणात्समाहारे न
स्यात् द्विकुडवी पंचाढकी पंचाश्वेत्यादौ तु अनर्थकाभावात् स्यादेव ङीप् तस्माद्यथान्यासमेवास्तु॥ ॥काण्डान्तात्॥ ॥मानं दण्डं द्विगोर्लुकि विका
र द्विशर्वसन्नत्रवक्तव्यं न विशेषमिति हे किमर्थमंतग्रहणं अक्रियमाणे तग्रहणे क्षेत्रशब्देन काण्डस्यैव विशेषणं विज्ञायेत क्षेत्रेयः काण्डशब्दस्तदन्ताद् द्विगो
रिति श्रुतत्वात् न तदंतस्य यथोक्तं क्षेत्रे प्रमाणे यः पुरुषशब्दस्तदन्तादिति तत्र इह प्रसज्येत द्वाभ्यां काण्डाभ्यां काण्डप्रमिताभ्यां क्षेत्राभ्यां क्रीता
द्विकाण्डी वडवेति इह तु न स्यात् द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभक्तिरिति अन्तग्रहणे तु सति तदन्तस्यैव विशेषणं क्षेत्रेण काण्डस्य बहुव्रीहेर्गु
णाभूतत्वात्॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ ४ ॥पुरुषात्॥ ॥प्रमाणं यः पुरुषशब्द इति पंचालिः पुरुष इति शुल्बविदः तत्र द्वौ पुरुषौ प्रमाणमस्या इति वाक्ये प्रमाणशब्देन संबंधात्तद्वचनो
पि पुरुषशब्दः प्रमाणे वर्त्तते इह तौ तु तत्स्वभावादेव प्रमाणेऽर्थ इति द्रष्टव्यम्॥ ॥बहुव्रीहेः॥ ॥ऊधसोनङ् इति समासान्ते कृते इति समासार्थाद्‌उत्त
२० रपदाद्‌ऊधःसमासान्तः प्राप्नोति ततः स्त्रीप्रत्ययः। अनो बहुव्रीहेरित्युपलक्षणमेतत् अनो बहुव्रीहेः डाबुभाभ्यामन्यतरस्यामिति चेत्यर्थः। कु
ण्डोध्नीति कुण्डमिव ऊधोऽस्या इति विग्रहः ङीष्यल्लोपेन स्त्र्येकारलोपः प्राप्तो धा इति प्राप्नोति पन्ने च द्वितीयपयेति तत्पुरुषः अत्र ततश्चेति दीर्घः
अनउपधालोपिन इत्यादिः असत्यां पुनरनुवृत्तौ मध्येपवादन्यायेन डाप्प्रतिषेधयोरेवापवादः ङीष् बाधकः स्यात् न तु अनउपधालोपिनस्ततस्त्वसाङीपः

॥पुरुषात्प्रमाणेन्यतरस्याम्॥ ॥द्विगोस्तद्धितलुकीत्येव प्रमाणे यः पुरुषशब्दः तदन्ताद्‌द्विगोस्तद्धितलुकि सत्यन्यतर
स्यां ङीप्प्रत्ययो भवति। द्वौ पुरुषौ प्रमाणमस्याः परिखायाः द्विपुरुषी द्विपुरुषा। त्रिपुरुषी त्रिपुरुषा। अपरिमाणान्ताद्वा
न्निसे प्रतिषेधे प्राप्ते विकल्पार्थं वचनं। प्रमाण इति किं द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा त्रिपुरुषा। तद्धितलुकीत्ये
व समाहारे द्विपुरुषी त्रिपुरुषी॥ ॥बहुव्रीहेरूधसो ङीष्॥ ॥ऊधः शब्दान्ताद्बहुव्रीहेः स्त्रियां ङीष्प्रत्ययो भवति। ऊध
सो नङ् इति समासान्ते कृते अनो बहुव्रीहेरिति डाप्प्रतिषेधयोः प्राप्तयोरिदमुच्यते। कुण्डोध्नी घटोध्नी। बहुव्रीहेरिति किं
प्राप्ता ऊधः प्राप्तोधाः। अनउपधालोपिन इत्यस्यापि ङीपोयमपवादस्तत्रानुवृत्तेर्बाधकः इष्यते। समासान्तश्च स्त्रियामेवइ
ह न भवति महोधाः पर्जन्य इति॥ १९ ॥

ननु च डाबुभाभ्यामित्यत्रानेनान्यतरस्यां ग्रहणेन ङीबपि प्राप्यते अनउपधालोपिन इत्यस्य तु नियमः इत्यवारीति कुतो यमनिष्टप्रसंगः सत्यं अन
उपधालोपिन इत्यस्य तु विधित्वाभ्युपगमेनैतदुक्तं इह बहुव्रीहेरूधसो ङीषू न इत्येतत्कथमूधः शब्दान्ताद्बहुव्रीहेः स्त्रियां ङीष् भवति तत्संनि एम०
योगेन चास्य सनकारः समासान्तप्रकरणे तु ऊधसो नङ् इति नकारान्तमेव नुषो नङ् इत्येव पठितम्। अतः पुनरेवं सति गुणो भवति अनउपधालोपि
न इत्यत्रास्यानुवृत्तिर्न स्यापि तत्राभवति अपि च महोधाः पर्जन्यः कुण्डोधा धेनुकमिति सिद्धं भवति अन्यथा ऊधसो नङ् इत्यत्र स्त्रियामितिव २०
क्तव्यं स्यात् तत्राह समासान्तश्च स्त्रियामेवेति इष्यते इत्यस्तु अनुषंगः तेनैव स्त्रियामिति वक्तव्यमित्यर्थः एतत्यथा हि कविधिप्रसंगः कपो वकाशः अ
नो बहुव्रीहेः अयं बहुकः अवकाशः ऊङीहि कः ङीषस्तु विभाषा कप् परदानकप् सावकाशः कप्प्रसंगे उभयं प्राप्नोति परत्वात्कप् स्यात्॥ १९ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

संख्याव्यय॥ ॥पूर्वेणङीपि प्राप्ते ङीब्विधीयते इति पत्र एवं पदप्रकृतिस्वरः तत्र बहुव्रीहौ अन्तोदात्तेन बहुव्रीहौ अन्तोदात्तेनु बहुव्रीहौ ङीम्ङी
षोर्नास्ति विशेषः सुधीनञ्जुभ्यामित्यन्तोदात्तत्वं तत्राद्युदात्ते ङीवस्तु दात्त निहन्तित्वेएणोदात्तो भवति द्व्यूध्नी सादिहेतु धर्मा यस्याः अतिगतमूर्धो
स्याः निर्गतमूर्धोस्या इति विग्रहः आदिग्रहणं किमिति संख्याव्ययाभ्यामुत्तरेण ऊधः शब्दस्तदन्तो बहुव्रीहेरिति विज्ञायमाने द्व्यूध्नी सादि सिद्धमि
तिप्रश्नः द्विविधोध्नीति ङ्यसस्यादिग्रहणे संख्याव्ययाभ्यामिति पंचमीनिर्दिष्टात्ताभ्यामनन्तरोप ऊधः शब्दस्तदन्तादेवस्यात्समन्ततस्त्वव्यवायेनतु नस्या
दिति भावः॥ ॥दामहायनः॥ ॥स्वरितेनाधिकार इत्यत्र द्वौ पक्षौ शब्दाधिकारोर्थाधिकारश्चेति तत्राद्यपक्षे यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञा

संख्याव्ययादेर्ङीप्॥ ॥पूर्वेण ङीषि प्राप्ते ङीब् विधीयते संख्यादेरव्ययादेश्च बहुव्रीहेरूधः शब्दान्तान्ङीप्प्रत्ययो भ
वति। संख्यादेस्तावत् द्व्यूध्नी त्र्यूध्नी। अव्ययादेः अत्यूध्नी निरूध्नी। आदिग्रहणं किं द्विविधोध्नी त्रिविधोध्नी इत्यत्रा
पि यथा स्यात्॥ ॥दामहायनान्ताच्च॥ ॥ऊधस इति निवृत्तं संख्याग्रहणमनुवर्तते नाव्ययग्रहणं संख्यादेर्बहुव्री
हेर्दामान्ताद्धायनान्ताच्च स्त्रियां ङीप्प्रत्ययो भवति। दामान्तात् डाप्प्रतिषेधविकल्पेषु प्राप्तेषु नित्यार्थवचनं द्विदाम्नी।
।त्रिदाम्नी। हायनान्तात् टापि प्राप्ते द्विहायनी त्रिहायणी चतुर्हायणी। हायनो वयसि स्मृत तत्तेनेह न भवति द्विहायना
शाला त्रिहायना चतुर्हायना। णत्वमपि त्रिचतुर्भ्यां हायनस्येति वयस्येव स्मर्यते॥ ॥

तंस एवानुवर्तते द्वितीये तु द्वंद्वार्थस्यैकत्वात्तस्यैवानुवृत्तिः स्याद्धानवातदिहाद्यं पक्षमाश्रित्याह संख्याग्रहणमनुवर्तते नाव्ययग्रहणमिति हा
यनो वयसि स्मृत इति प्रकृतिरिति शेषः हायनान्तो बहुव्रीहिर्वयसि गम्यमाने ङीपः प्रकृतिराचार्यैः स्मृत इत्यर्थः त्रिहायना शालेति प्राणिध
र्मविषयः शालायां न संभवति। अथ मूलोदाहरणं वत्रिचतुर्भ्यो हायनस्येत्योपसंख्यानिकं णत्वं कस्मान्न भवतीत्यत आह णत्वं चेत्यादि बहुव्रीह्य
धिकारस्वेव तदन्तविधिसिद्धेरन्तग्रहणं विस्पष्टार्थं॥ ॥ २ ॥ ॥ २ ॥ ॥ ३ ॥ ॥ २ २ ॥ ॥ ३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का०वृ०४ ॥अन उपधा॥ ॥ईतिपात्त उपधालोपोपलक्षणं भवति स उपधालोपी॥ ननु सिद्ध एवेत्यादि एतच्च डाबुभाभ्यामित्यत्रैव माभूदतो अनुपधा
२१ लोपिनो ङीप्प्रतिषेधार्थं वचनमिति अनो बहुव्रीहेर्यदन्यतरस्यां ङीविधानं तदुपधालोपिन एवेत्येवं नियमार्थमित्यर्थः अस्य च नियम
स्यानुपधालोपिनो ङीनिवृत्तिः फलमिति फलतः प्रतिषेधवाचोयुक्तिः॥ बहुराजे इति ओङ आप इति शीभावः द्विवचननिर्देशो डापोपि

॥अन उपधालोपिनोऽन्यतरस्यां॥ ॥बहुव्रीहेरित्येव अन्नन्तो यो बहुव्रीहिरुपधालोपी तस्मादन्यतरस्यां ङी
प्प्रत्ययो भवति। ङीपाभुक्ते डाब्विधिप्रतिषेधो भवतः॥ किमर्थं तर्हीदमुच्यते ननु सिद्ध एव डाप्प्रतिषेधो ङीपः
॥अनुपधालोपिनो ङीप्प्रतिषेधार्थं वचनं॥ बहुराज्ञा बहुराजे बहुराज्ञी॥ बहुतक्ष्णा बहुतक्षे बहुतक्ष्णी॥ अ
न इति किं बहुमत्स्या॥ उपधालोपिन इति किं सुपर्वा सुपर्वे सुपर्वाः॥ सुपर्वाणौ सुपर्वाणः॥ डाप्प्रतिषेधावेवा
त्र भवतः॥ ॥नित्यं संज्ञाछन्दसोः॥ ॥अन्नन्ताद्बहुव्रीहेरुपधालोपिनः संज्ञायां विषये छन्दसि च नित्यं ङी
प्प्रत्ययो भवति॥ विकल्पस्यापवादः॥ सुराज्ञी अतिराज्ञी नाम ग्रामः॥ छन्दसि गौः पञ्चदाम्नी॥ एकदाम्नी एक
मूर्ध्नी॥ २० ॥ ॥छ॥ ॥

अन्त्ये एकवचने डाप्प्रतिषेधयो रूपस्य तुल्यत्वात्॥ बहुमत्स्येति सर्यातिष्णपणस्येत्यादिना उपधालोपविधानादुपधालोप्येव बहुव्रीहिः राम०
सुपर्वेति॥ न संयोगाद्वमन्तादिति निषेधान्नायमुपधालोपी॥ ॥नित्यं॥ ॥ननु छन्दसि दृष्टमेवानुविधीयते नापूर्वमुत्प्रेक्ष्यते तत्र वङी २१
वेव दृश्यते तस्य च लक्षणमस्तीति कस्तावाञ्जनदभावं प्रयोक्तुं प्रभवति संज्ञाश्च शब्दा अप्यनादिप्रयुक्ता नियता तु एव किः तत्रापि ङीवेव
वायं दृश्यते न तदभावः शङ्काते कर्तुं किमर्थमिदं सूत्रमस्याछन्दसोरिति पदमुत्तरार्थं विकल्पानिग्रहणमुत्तरत्र विकल्पनिवृत्त्यर्थं॥ २०॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥केवल॥ ॥केवलेति भाषायामिति असंज्ञाविषय इति भावः मामकीति ममेयमिति प्रथमरस्मदोरन्यतरस्यां खञ्चेत्यण् तवकममकावेकवचनइति ममकादेशः तत्राणंतत्वाद्दिड्ढाणञिति ङीब्सिद्धे नियमार्थं मामकग्रहणं संज्ञाछंदसोर्वेति ङीष् अन्यत्रेति मामिकेति टापि ममक नरकयो रुपसंख्यानमि तीत्वं भागधेयेति भागशब्दात्पुल्लिंगात्स्वार्थे धेयप्रत्ययः स्वार्थिकाः क्वचिदतिवर्तंते प्रकृतितो लिंगमिति स्त्रीलिंगता पापेति अभेदोपचारात्तद्वति वर्तमा नः पापशब्दोभिधेयवल्लिंगः अपरी स्त्र्यद्धिती गोवर्णो दृष्टो ष्टोनपवर्गः आर्यकृतेति प्राक् सुबुत्पत्तेः समासिकाणं त्वं भेषजीति भिषजः इयमिति ण्यादित्वाद्दिरभागे अत एव निपातनादेकारः एवं च भेषजग्रहणमपि नियमार्थं ॥ ॥ रात्रेः ॥ ॥ कथमित्यादि दीर्घोतात्ज्जसि दीर्घात् जसि चेति पूर्व

॥केवलमामकभागधेयपापापरसमानार्यकृतसुमंगलभेषजाच्च॥ ॥संज्ञाछंदसोरित्येव केवलादिभ्यः प्रातिपदिकेभ्यः संज्ञायां विषये छंदसि च स्त्रियां ङीप्प्रत्ययो भवति । केवली । केवलेति भाषायां । मामकी । मामिकेति भाषायां । मित्रावरुणयोर्भागधेयी । भागधेयेति भाषायां । पापी । पापेति भाषायां । अपरी भ्योमवत्वा विजिग्ये । अपरेति भाषायां । समानी । प्रतरणी । समानेति भाषायां । आर्यकृती । आर्यकृतेति भाषायां । सुमंगली । सुमंगलेति भाषायां । भेषजी । भेषजेति भाषायां ॥ ॥ रात्रेश्चाजसौ ॥ ॥ अजसविषयादन्यत्र छंदसि संज्ञायां विषये च रात्रिशब्दान्ङीप्प्रत्ययो भवति । या रात्रीः सृष्टा । रात्रीभिः । अजसादाविति किं । यास्ता रात्रयः । अजसादिष्विति वक्तव्यं । रात्रिं होमसेषिता । कथं तिमिरपटैरवगुंठिताश्च रात्र्यः । ङीषयं कृदादिलक्षणस्तत्र हि पठ्यते कृदिकारादक्तिनः सर्वतोक्तिन्नर्थो

सवर्णदीर्घप्रतिषेधाद्यणादेशो रात्र्य इति प्रयोग उपपद्यते इत्यर्थः तस्मात्तु जसि चेति गुणो रात्रय इति रूपं स्यात्तदीयंतिश्च रात्रिशब्दः संज्ञाछंदसोरपि नाप्ति नस्संभवति अजसादाविति प्रतिषेधात् किं पुनर्भाषायामिति प्रश्नः ङीषयमित्यादि बह्वादिषु रात्रिशब्दो न पठ्यत इति चेत् तत्राह तत्र हीति कृदिकारः कृदिकारः न दंतान्ङीष् भवति दृजागम्यां विः दर्विः दर्वी यस्तु क्तिन्नं बंधीत दंतान्न भवति कृतिः कृतिः सर्वत इति कृदिकारात् कृदिकाराच्चेत्यर्थः यस्तु क्तिन्नर्थस्तस्मान्न भवति आक्रोशे नञ्यनिः अकरणिः अहरणिः रात्रिशब्दो यं राशदिभ्यां त्रिबिति व्युत्पत्तिपक्षे कृदिकारान्तः अव्युत्पत्तिपक्षे सर्वतोक्तिन्नर्थादिति ङीषस्त्येव अर्थे रात्रीमन्यत रात्रीभिरस्मा अहोभिर्दशस्येत अत्राद्युदात्तत्वं भवति ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कां०प०२०४ अंतर्वत्नी॥ ॥निपातनसामर्थ्याद्वेति कार्यांतरवदर्थविशेषेऽपि लभ्यत इति भावः॥ कस्मिन्विशेष इत्यत्राह अंतर्वत्पतिवदिति गर्भभर्तृसंयोग इति॥ अंत
र्वदिति गर्भसंयोगे गर्भिण्यामित्यर्थः पतिवदिति भर्तृसंयोगे भर्तृमत्यामित्यर्थः जीवपत्यामिति यावत् इह न भवति अंतरस्यां शालायां विद्यत इति अस्मि
२२ न्विषये एवं विधं वाक्यमेव भवति न तु मतुबादीत्यर्थः क्वचिदंतर्वत्नी शालेत्यपि दृश्यते तदयुक्तं अत्र मतुबभावस्योक्तत्वात् पतिमती पृथिवी॥ तत्स्वामिप
र्यायोऽत्र पतिशब्दः मतुन्नियास्यत इति अधिकरणप्रधानस्यांतः शब्दस्यास्तिना सामानाधिकरण्याभावो मतोरिति कृत्वा वत्वे तु सिद्धमिति माड्य

अंतर्वत्पतिवतोर्नुक्॥ ॥प्रकृतिर्निपात्यते नुगागमस्तु विधीयते अंतर्वत्पतिवतोर्नुग्भवति ङीप् च प्रत्ययः मतु
बंतत्वात्ङीप्सिद्धः निपातनसामर्थ्याच्च विशेषे वृत्तिर्भवति। अंतर्वत्पतिवतोर्गर्भभर्तृसंयोगे इह न भवति
अंतरस्यां शालायां विद्यते। पतिमती पृथ्वी॥ अंतर्वदिति मतुब्निपात्यते गत्वं सिद्धं। पतिवदिति वत्वं निपात्यते म
तुप्प्रसिद्धः। अंतर्वत्नी गर्भिणी। पतिवत्नी जीवत्पतिः। अंतर्वत्पतिवतोर्नुक्तु वक्तव्ये निपातनात् गर्भिण्यां जीव
पत्यां च वा च छंदसि नुग्विधिः। सांतर्वत्नी देवानुपैति। पतिवत्नी तरुणवत्सा। पतिवती तरुणवत्सा २१ ॥

धापाश्चेत्यनेनाद्युपधत्वात्। अंतर्वत्पतिवतोरित्यादि एतयोः शब्दयोर्निपातनान्मतुब्वत्वे भवतः नुक् विधीयते यथाक्रमं गर्भिण्यां जीवपत्न्यां चाभि राम०
धेयायां ङीप्। पतिरस्याः जीवपतिः। विभाषा सपूर्वस्येति ङीप् नकारयोरभावश्च पक्षेऽरूपं तत्र ङितीति ह्रस्वश्चेति न दी संज्ञायां पक्षे इदुद्भ्यामिति ङेराम् आदेशः २२
जीवत्पत्यामिति भवति वा तु छंदसि नुग्विधिः छंदसि विषये तु विकल्पेन नुग्विधिर्भवति अंतर्वती अंतर्वत्नी। पुंस्यपि दृश्यते सोंतर्वान्भवत॥
॥ २१ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥पत्युर्नः॥ ॥यद्यत्र यज्ञशब्देन पतिशब्दस्य संबंधो यज्ञसंयोग इत्यर्थः स्यात्तर्हि यज्ञस्य पतिरियं ब्राह्मणीत्यत्रैव स्यात् अस्ति ह्यत्रार्थद्वारकः संबंधः स्वरूपेणावानंतर्यलक्षणः अथ यज्ञवाचिना संयोगो यज्ञसंयोगः तथापि पत्नीसंयाजा इत्यादावेव स्यान्न त्वियमस्य पत्नीत्यादौ तस्माद्यज्ञशब्दस्यार्थो र्थः तेन पतिशब्दार्थस्य संबंधो यज्ञसंयोग इत्याह यज्ञेन संयोग इति अन्यथा यज्ञशब्देनैव स्यात् एवं च पतिशब्दार्थस्यैव सम्यग्युक्तं भवति तद्धि पतिशब्दस्य यज्ञेनार्थेन वाच्यवाचकभावः संबंधांतरं तु संभवति तत्साधनत्वादिति देवतोद्देशेन स्वद्रव्यत्यागो यागः मध्यकं च द्वयोः पत्न्योर्धनं कुटुंबिनोर्धनस्य तेजायापत्योर्न विभागो विद्यत इति हि स्मर्यते तेन तथाश्वस्यागे भार्यायाः अथ न तु मतिरपेक्ष्यत इति तत्रास्याः अनुमत्या साधनत्वं पत्न्यपेक्षितमात्प्रभवतीसा

॥पत्युर्नो यज्ञसंयोगे॥ ॥पतिशब्दस्य नकारोंतादेशः स्त्रियां विधीयते ङीप्प्रत्ययस्तु नकारांतत्वा
देव सिद्धः यज्ञसंयोगे यज्ञेन संयोगो यज्ञसंयोगः तत्साधनत्वात्फलग्रहीतृत्वाच्च यजमानस्य पत्नी॥
पविवाचं यच्छ॥ यज्ञसंयोग इति किं ग्रामस्य पतिरियं ब्राह्मणी॥ कथं वृषलस्य पत्नी॥ उपमानाद्भविष्य
ति॥ ॥छ॥ ॥

हो च साक्षादेव कर्तृत्वं मदभिलषितसाधनतया मदर्थकर्मेत्येवं रूपोधिकारलक्षणसंबंधोस्तीत्याह फलग्रहीतृत्वादिति कर्तृत्वमात्रं विवक्षितं न स्त्रीत्वमिति ङीप्प्रकृतः कर्तरि चेति समासप्रतिषेधः कर्मणि षष्ठ्या एवं न शेषषष्ठ्या इति तस्यानेनोपपन्नः समासः फलग्रहीतृत्वादिति पाठे गृहीतं फलं ययेति बहुव्रीहौ फलशब्दस्य जातिवचनत्वात् निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनमिति गृहीतशब्दस्य परनिपातः कथमित्यादि शूद्रस्यैव यज्ञेऽनधिकृतत्वाद्यज्ञेनासंयोगात्कथं तद्भार्याया यज्ञसंयोग इति प्रश्नः उपमानादिति अग्निसाक्षिकं यत्पाणिग्रहणं तद्वृषलादीनामप्यस्तीति तत्साम्यमुपमानं॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का.प.८.४ ।।विभाषा।। ।।सहशब्दोयमस्तितुल्ययोगे यथा सह शिष्येणागत इति। अस्ति च विद्यमानवचनः यथा सहैव दशभिः पुत्रैर्भारं वहति गर्दभीति इ
२३ त्यंभूतलक्षणे तृतीया विद्यमाने चैव पुत्रेष्वित्यर्थः पूर्वशब्दोप्यस्ति अवस्थावचनः पूर्वं मथुरायाः पाटलिपुत्रमिति। अस्ति चावयवशब्दः पूर्वं कार्षस्ये
ति तत्र तुल्ययोगे सहशब्दः पूर्वशब्दश्चावस्थायामिति पक्षे ग्रामस्य पतिरियमिति वाक्येप्यनेनाप्नोति पूर्वस्याप्यप्राप्तेरिति विद्यमानवचनं सहशब्दः पूर्वशब्द
श्चावस्थावचन इति पक्षे पूर्वसमासः स्यादेवमवयववचनः पूर्वशब्दः तुल्ययोगे सहशब्द इति पक्षे वाक्येपि स्यात् तत्रापि पतिशब्दस्य पूर्वेणावय
वः प्रकारान्तरस्यापि स्यात् तस्माद् विद्यमानवचनः सहशब्दः पूर्वशब्दश्चावयववचन इति पक्ष आश्रीयते तेन सहेत्यत्र तुल्ययोग इति विशेषणात् स प्रा

।।विभाषा सपूर्वस्य।। ।।पत्युर्न इति वर्तते पत्यन्तस्य प्रातिपदिकस्य सपूर्वस्यानुपसर्जनस्य स्त्रि
यां विभाषा नकारादेशो भवति ङीप् तु लभ्यत एव। दृढपतिः दृढपत्नी। स्थूलपतिः स्थूलपत्नी। अप्रा
प्ते विभाषेयमयज्ञसंयोगार्था। सपूर्वस्येति किं पतिरियं ब्राह्मणी ग्रामस्य।। ।।२१।। ।।

तिपदिकत्वात् समासः एवं च स्थिते सपूर्वस्येति पतिशब्दविशेषणं नोपपद्यते कथं पकारेण सपूर्वत्वस्याव्यभिचाराद् विशेषणानां शब्दान्तरं तु पतिशब्दस्यावय
वो न संभवतीति तस्य सामर्थ्यात् प्रातिपदिकं पतिशब्देन विशेष्यते न तु तेन पतिशब्द इति पतिशब्देन तदन्तस्य ग्रहणात् अनुपसर्जने ग्रहणेनापि तेन तदन्तं प्रा राम०
तिपदिकमेव विशेष्यते न विशेषणभूतः पतिशब्दः अन्यथा बहुव्रीहौ न स्यात् जीवः पतिरस्याः जीवपतिर्जीवपत्नीति षष्ठीसमास एव तु स्या २३
द् ग्रामपतिः ग्रामपत्नीति तदेतत् सर्वमालोच्याह पतिशब्दान्तस्य सपूर्वस्यानुपसर्जनस्येति ग्रामस्य पतिरियमिति असति सपूर्वग्रहणे तदन्तवि
धेरभावात् स्त्रैव स्यात् अथ यथाव्यपदेशे तदन्तेपि भवेत् केवलस्यापि स्यादेव तस्मात् सपूर्वस्येति वक्तव्यं।। ।।२२।। ।।छ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

॥नित्यं॥ ॥यानि समानादिपूर्वपदानि पत्न्यंतानि प्रातिपदिकानि तेभ्यः सपत्न्यादयः कुतएतत् समानादीनामेव गणोपात्तत्वात् सपत्न्यादीनां चायमाशयः
एवं समानादिष्विति वक्तव्ये सपत्न्यादिग्रहणं तु न्याय्यं लेः समानादिषु पूर्वपदेषु अपि वेषु सत्स्विति अर्थः ससमानस्य समानस्य सभावार्थं तु सपत्न्यादिष्विति उक्तं । किंचित्रिंतु द्राहरणान्
तरे समानादिष्विति वक्तव्यं सभावार्थमेवमुक्तमिति हि त्रावेव यद्यतेत्र परत्वाह समुदायोच्चारणसामर्थ्यात् सपत्नीभार्यदृष्टत्र पुंवद्भावो न भवतीति
नात्र सोऽतिरसि किंच सभावार्थं समुदायोच्चारणमिति इति सामर्थ्यमपि चिंत्यं तेथाहे सपत्निनि सपत्निः पत्युरिव तिसपत्न्या सपत्न्ये इत्यादावपि

॥नित्यं सपत्न्यादिषु॥ ॥सपत्न्यादिषु पत्युर्नित्यं नकारादेशो भवति ङीप् सुलभ्य तएव । पूर्वेण विकल्पेप्रा-
प्ते वचनं । नित्यग्रहणं विस्पष्टार्थं समानः पतिरस्याः सपत्नी ॥ एकपत्नी ॥ भद्र समाना एक । पिशाच्या भ्रात ।
पुत्राद्याः समासाद्वेदसि ॥ ॥पूतक्रतोरै॥ ॥पूतक्रतुशब्दस्य स्त्रियामैकारश्चान्तादेशो भवति ङीप् प्रत्ययः ॥ पू-
तक्रतोः स्त्री पूतक्रतायी ॥ त्रय एते योगाः पुंयोगप्रकरणे द्रष्टव्याः । यया हि पूताः क्रतवः पूतक्रतुः सा भवति ॥

पूर्वस्य प्रत्ययस्यादेशो न स्यात् तांता साच्च समावार्थमेव सपत्न्यादिष्वित्युक्तं । नित्यग्रहणं विस्पष्टार्थमिति अन्यथा सामर्थ्यादेव नित्यं भविष्यतीति भावः । दासी कं-
दसीति दासपत्नी ॥ (ह्रिगोपा ॥) ॥पूतक्रतोः॥ ॥यद्ययमैकारः प्रत्ययः स्यात् तदुक्तात् सूत्रे उ ह्रस्व वचनमनर्थकं स्यात् प्रत्ययतादेव सिद्धेः तस्मादादेशोयं
विज्ञायते इत्याह ऐकारश्चान्तादेश इति त्रय एते योगा इति पुंयोगाद्याख्यायामिति सूत्रानुवर्तिपितभ्यो इत्यर्थः । इह करणसामर्थ्याच्च ङीष्सहिता एवानुवर्त्त-
न्ते तेन परायुंयोगात् स्त्रियां पूतक्रत्वादयो वर्त्तंते तेन दाङीषे बाधित्वा ऐकारादेशसहितो ङीप् भवति ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पृ॰ ४ ।वृषाकपि॥ ॥वृषाकपिशब्दो मध्योदात्त इति लघ्वावर्ते द्व्योश्च बह्वषो गुरुरिति वचनात् अस्यार्थः अनेकस्मिन् लघो द्व्योश्च लघोः परतो बह्वषः
शब्दस्य गुरूदात्तो भवतीति बह्वष इति बह्वचस्त्वर्थः यो स्माकं च कारेणाप्रसाहारः सोऽन्येषां षकारेणाऽप्यस्मादि बहुपूनरिति किं चित्त नेनाग्न्यादीना
२४ मंतोदात्तत्वं फिषितिप्रातिपदिकसंज्ञा गार्यसंज्ञाये नुकुसीदेति मध्येगुरुमधीयनेनेषां लघ्वावर्त इति मध्योदात्तप्रसंगः॥ ॥मनोरौ वा॥ ॥
ऐकारश्चोदात्त इति। औकारस्त्वनुदात्त एव गाग्रहणेन द्वावपि विकल्प्येते इति पदद्वयं ङीबपि न भवति तस्तदा ङीबपि न भवति संनियोगशिष्टत्वा

॥वृषाकप्यग्निकुसितकुसिदानामुदात्तः॥ ॥वृषाकप्यादीनामुदात्त ऐकारादेशो भवति स्त्रियां ङीप् च प्र
त्ययः। वृषाकपिशब्दो मध्योदात्तस्तदन्तत्वं प्रयोजयति अग्न्यादिषु पुनरन्तोदात्तेषु स्थानिवद्भावादेव सिद्धं स्थानेंतरतम इत्ये
वृषाकपेः स्त्री वृषाकपायी। अग्नायी। कुसितायी। कुसिदायी। पुंयोगादित्येव वृषाकपिः स्त्री॥ ॥मनोरौ वा
॥ ॥ऐ वा उदात्त इति वर्त्तते मनुशब्दात् स्त्रियां ङीप् प्रत्ययो भवति औकारश्चान्तादेशः ऐकारश्चोदात्तः। वाग्रह
णेन द्वावपि विकल्प्येते तेन त्रैरूप्यम्। मनोः स्त्री मनावी मनायी मनुः। मनुशब्द आद्युदात्तः॥ २३ ॥

नमनुशब्द आद्युदात्त इति मन ज्ञाने भृमृशीङ्चरित्सरितनिधनिमिमाशिभ्य उरिति वर्त्तमाने धान्ये निदिति वर्त्तते स्वृलिहित्रप्यसिवसिहनिक्लिदि एम॰ २४
बंधिमनिभ्यश्चेति उ प्रत्ययः नित्वादाद्युदात्तत्वं भरुः मरुः शयुः तरुः त्सरुः तनुः धनुः मयुः मद्गुः न्यंकादिपाठात् कुत्वं प्रथमस्योदाहरणानि शरुः
त्सरुः स्नेहुः त्रपुः असुः वसुः हनुः क्लेदुः बंधुः मनुरिति द्वितीयस्य॥ ॥ २३ ॥ ॥ २ ३ ॥ ॥ २ ३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

वर्णादनुदात्तात् ॥ ॥ वर्णानां तणतिनितान्तानामिति तशब्दान्तानामेतादीनां णशब्दान्तानां शोणादीनां तिशब्दान्तानां शितिप्रभृतीनां निशब्दान्तानां पृश्निप्रभृतीनां तकारान्तानां च पृषत्प्रभृतीनां वर्णवाचिनामादिरुदात्तो भवतीत्यर्थः । गतिस्वरेणेति गतिरनन्तर इत्यनेन घृतादित्वादिति । घृतादीनां चे निषिध्यते पिशङ्गादिति लघावन्त इति मध्योदात्तत्वादत्र स्वरेणाङीषि प्राप्ते ङीब्विधीयते असितपलितयोरिति वर्णानां तणतिनितान्तानामित्याद्युदात्तावेतौ छन्दसीत्यादि तो नश्तिनकारोऽप्राप्ते कत्वं ङीप्सहितमिच्छन्ति भाषायामपीष्यत इति भाष्ये तु नैतत्प्रदर्शितं अवदातशब्दो न वर्णवाची

॥ वर्णादनुदात्तात्तोपधात्तो नः ॥ ॥ वेति वर्त्तते वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात्तकारोपधाद्ङीप् स्याद्वा तकारस्य नकारादेशः । श्येता श्येनी । एता एनी । हरिता हरिणी । रोहिता रोहिणी ॥ सर्व एते आद्युदात्ताः । वर्णानां तणतिनितान्तानामिति फिट्सूत्रात् । वर्णादिति किं प्रकृता प्रहृता । गतिस्वरेणाद्युदात्तः । अनुदात्तादिति किं श्वेता । घृतादित्वादन्तोदात्तः । तोपधादिति किं । अन्यतो ङीषं वक्ष्यति । अन्त इत्येव शितिर्ब्राह्मणी ॥ पिशङ्गादुपसंख्यानं । पिशङ्गी । असितपलितयोः प्रतिषेधः । असिता पलिता । छन्दसि क्नमेके । असिक्नी पलिक्नी । भाषायामपीष्यते । गतो गणास्तूर्णामसिक्निकानां ॥ ॥ अन्यतो ङीष् ॥ ॥ वेति निवृत्तं वर्णादनुदात्तादिति वर्त्तते तोपधाद्भिन्नमन्यत्तद्वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात्स्त्रियां ङीष् प्रत्ययो भवति । स्वरे विशेषः । सारङ्गी । कल्माषी । शबली । वर्णादित्येव खट्वा । अनुदात्तादित्येव कृष्णा कपिला ॥ ॥

किन्तर्हि विशुद्धवाची एवं ह्याह त्रीण्यप्यवदातानि विद्या योनिश्च कर्म च । एतत्त्रयं विजानीहि ब्राह्मणस्यैव लक्षणमिति तेनावदातेत्यत्र ङीप् न भवति ॥ ॥ अन्यतः ॥ ॥ सारङ्गकल्माषशब्दौ लघावन्त इति मध्योदात्तौ शपयाक्रोशे कलच्प्रत्ययः शपेर्श्वेति कलप्रत्ययः पकारस्य वकारः प्रत्ययस्वरेण मध्योदात्तः शबलशब्दः खट्वाशब्दो नित्स्वरेणाद्युदात्तः खट्कांक्षे अश्रुप्रुषिलटिकणिखटिविशिभ्यः क्वन् कृष्णाशब्दोऽन्तोदात्तः कृषेर्वर्णे इति नक्प्रत्ययः इलचि प्रकृते कपेश्चेति उणादिषु सूत्रे कपिः सौत्रो धातुः कपिलशब्दोऽन्तोदात्तः ॥ ॥ छ ॥ ॥ छ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ षिद्गौरादि ॥ ॥ षिद्भ्यः प्रातिपदिकेभ्य इति ष्वुनादेः प्रत्ययस्य षित्त्वमवयवे चरितार्थं समुदायस्य विशेषकं भवतीति प्रातिपदिकानां षित्त्वं यातो स्तत्र पाठेः षित्त्वम ङि धौ चरितार्थमिति तेन प्रातिपदिकं षिद्भवति रजकी। ति शिल्पिनि ष्वुनिति तत्र युक्ता दिति गौरादिषु गौरशब्दः सवर्णा चिनोप्यंतो दात्तत्वार्थः मत्स्यादीनां योपधानां अयोपधा दिति जातिलक्षणस्य ङीषः प्रतिषेधार्थः पाठः अन्ये जातिशब्दानां स्त्रीविषयार्थः पाठः श्वन्त इत्यनडु नयोगेपि प्राप्ते अनडुही अनड्वाही ति अनकारान्तत्वात् प्राप्ते ङीषि सप्रत्यययोः पाठः ङीषि परतो विकल्पेनाम्यथा स्यात्। एषणा करण इति करणा

षिद्गौरादिभ्यश्च ॥ ॥ ङीषनुवर्त्तते षिद्भ्यः प्रातिपदिकेभ्यो गौरादिभ्यश्च स्त्रियां ङीष् प्रत्ययो भवति। शिल्पिनि ष्वुन्। नर्त्तकी। रजकी। गौरादिभ्यः खल्वपि। गौरी। मत्सी। गौर। मत्स्य। मनुष्य। शृंग। पिंगल। हय। गवय। मुकय। ऋष्य। पुट। द्रुण। द्रोण। हरिण। काकण। पटर। उकण। आमलक। कुवल। बदर। बिंब। तर्क्कार। शर्क्कार। पुष्कर। शिखंड। सुषम। सलंद। गडुज। आनंद। सृपाट। आढक। अन्त्रक। शष्कुल। सूर्म। सुब। सूर्य। शुष। मृषाधातक। शल्लक। मल्लक। मालत। सालक। वेतस। अतस। हस। उमा। भद्द। महामत्र। छेद। अनत। तक्षन्। अनडुही। अनड्वाही। एषणा करण। देह। देहन। काकादन। गवादन। तेजन। रजन। लवण। पान। मेध। गौतम। आयस्थूण। भौरिकि। भौलिकि। भौलिंगि। औद्गाहमानि। आलिंगि। आपिच्छिक। आरट। टोट। नट। नाट। मूलाट। शातन। पातन। पादन। आस्तरण। अधिकरण। एत। अधिकार। आग्रहायणी। प्रत्यवरोहिणी।

धनएषणा शब्दो ङीषमुत्पादयति इष्यते न ये पेषणी आधिकरणे ल्युडिति टित्वान्ङीबेव भवति। अन्येषामपि ल्युडन्तानां ङीपि प्राप्ते पाठः मेधशब्दस्य जातिवाचित्वाद् गौतमस्य शार्ङ्गरवादित्वान्ङीनि प्राप्ते वचनात्प्रेषो भवति। आयस्थूण शब्दः शिवाद्यणन्तः भौरिकाद्य रञन्ताः तेषामणो जौरि निष्यङ् प्राप्तो। आपिच्छिकानपराजानः जनपदशब्दात्क्षत्रियाद्ञ् तस्मात्स्त्रियामिति लुकि कृते प्रसंगे यल्लक्षणो न ङीष् प्राप्नोति। अन्येहायनमस्य अग्रहायनः प्रज्ञादित्वात्स्वार्थिको अण् अस्मादेव निपातनाण्णत्वं आग्रहायण ङीपि प्राप्ते पाठः केचिदाग्रहायणी तिर्कारान्तं पठन्ति तत्र प्रयोजनं माग्रहायणी

© Dharmartha Trust J&K. Digitized by eGangotri

॥सुमंगलात्संज्ञायामिति॰ केवलमामकेतिङीपिप्राप्तेपक्षेसोपिभवतिस्वरेविशेषः सुमंगलशब्दोबहुव्रीहिः तत्रनञ्सुभ्यामितिस्वरोदात्तत्वात्ङीप्यपिमु
सुदात्तत्वनिहन्तिस्वरेणाभाव्यमितिनास्तिविशेषः तथाचछंदसिसुमंगलीरियंवधूरितिंतोदात्तत्वंदृश्यतेतस्मात्ज्ञातिवचनोऽमुत्पन्नः स्त्रीविषयः सुमं
गलशब्दोलघावंतइतिमध्योदात्तोदृष्टव्यः तरुणात्तलुनयोर्नञ्स्नजीकक्करूपोतिङीपिप्राप्तेपक्षेसोपिभवतिबृहन्महच्छब्दयोरनर्थकःपाठइतिप्रागो
वोक्तंमध्यणांतः सोधर्मशब्दः रोहिणीनक्षत्रइतिनक्षत्रात्समत्रोहिणीरेवतीनक्षत्रइतिरायिरितिधननामरायिर्विधतेस्याइतिमतुपिरयेमतीबहुलमिति

॥सुमंगलात्संज्ञायां॥ सुंदर। मंडल। पद। पिंड। पिटक। अर्हीगृह्य। पंड। लोफाउ। बृहत्। महत्। सोधर्म।
केदा। कंदल। कदल। तरुणा। तलुन। रोहिणीभेवयोन क्षत्रे। विकल। निष्कल। पुष्कल। करात्छ्रेणिवचने।
पिप्पल्यादयश्च। पिप्पली। हरीतकी। कोशातकी। शमी। करीरी। पृथिवी। क्रोष्टु। माता। महापितामह।
मातामहयोर्मातरिषिच्चेतिषितादेवसिद्धेज्ञापनार्थवचनं। अनित्यःषित्वलक्षणोङीषितितेनदंष्ट्रेसुपप
त्रभवति॥ ॥छ॥ ॥छ॥

संप्रसारणोनिपातनाद्धत्वंनक्षत्रत्मत्रङीपुभवतिविकलादीनांसपिप्राप्तेकटाच्छ्रेणिवचनेकरीश्रेणिः अन्यत्रकटाविप्पल्यादयश्चेतिगणाहृह्व
पिप्पलीहरीतकीसादिकंतुतस्मोरङ्हारणप्रदर्शनपृथिवीतिप्रथेः षिवत्संप्रसारणंचेतिषितादेशसिद्धप्रत्ययांतस्यपाठः पुंवद्भावनिहत्यर्थःपृ
थिवीभार्यइतिस्त्रीविषयस्यास्यपुंवद्भावप्राप्तिस्त्रियांसाक्रोष्टुशब्दस्यास्त्रियांचेतितृज्वद्भावः क्रोष्ट्रीस्यत्रनिरूपणीयमास्तिस्त्रियांचेसत्रनिरूपयि
ष्यामः षित्वादेवसिद्धइतिमातरिषिच्चेतिवार्त्तिककारवचनात्षित्वंनिपातनसामर्थ्याद्वाअकोहिधातुसाधनकालानांप्राप्त्यर्थनियमस्यचान्य
त्तुबंधविकारणांमन्त्र्यर्थवानिपातनमितिदंष्ट्रेतिपेषामजादिषुदंष्ट्रेतिपाठोनास्तितेषामिदंप्रयोजनं॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पर॰ ४
२६

॥जानपद॥ ॥वृत्तिर्नया सा वृत्तिः जीविका स्वरे विशेष इति तमेव दर्शयति उत्सादिपाठादञि कृत इति॥ अमत्रं भाजनं कुंडान्येति क्रियाशब्दोयं कुडि
दाहे पुरोऽस्य हल इत्सकारप्रत्ययः अवटपर्यायस्तु कुंडशब्दो नपुंसके नियतः यस्तु पत्यौ जीवति कुंडः स्यादिति मनुष्यजातिवचनः ततो जातिलक्ष
णो ङीषू भवत्येव कुंडीयं न गोलीति अमत्रवाचिनस्तु जातिशब्दाद्‌ विस्त्रीविषयत्वान्ङीप् विधीयते। आवपनं चेदितियत्र धान्यादि प्रक्षिप्य नीयते
सा गोणीयस्याः पुनर्गोण्छिकं नाम सा गोणान्या स्थाल्यन्येति कृत्रिमा पुरुषव्यापारेण निष्पादिताय यास्थालयोदकं परिगृह्यते ती ति भाजी ति भज

॥जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णाना-
च्छादनायोविकारमैथुनेच्छाकेशवेशेषु॥ ॥जानपदादिभ्य एकादशभ्यः प्रातिपदिकेभ्य एकादशस्वेव वृत्त्या-
दिष्वर्थेषु यथासंख्यं ङीष् प्रत्ययो भवति। जानपदी भवति वृत्तिश्चेत्। जानपदी अन्या स्वरे विशेषः। उत्सादिपाठा-
दञि कृते ङीपाद्युदात्तत्वं भवति। कुंडी भवत्यमत्रं चेत्। कुंडान्या। गोणी भवत्यावपनं चेत्। गोणान्या। स्थली
भवत्यकृत्रिमा चेत्। स्थलान्या। भाजी भवति श्राणा चेत्पक्वेत्यर्थः। भाजान्या। नागी भवति स्थौल्यं चेत्। नागान्या।
नागशब्दो गुणवचनः स्थौल्ये ङीषमुत्पादयति। अन्यत्र गुणमेव टापं। अगुणवचनात्तु जातिलक्षणो ङीषे
व भवति नागी। काली भवति वर्णश्चेत्। कालान्या॥ २५॥

विश्राणने चुरादिः श्रणास्यार्थोयञि निपुचि प्राप्ते अस्मादेव निपातनात्स्त्रियामप्यरञ्च श्राणेति श्रा पाके क्तः संयोगादेरिति नत्वं स्थौल्यं चे
दितीद्रमेव वर्तमानस्य नागशब्दस्य स्थौल्यं चेन्महत्त्वनिमित्तमित्यर्थः नागशब्दो गुणवचन इति गजवाचिनागशब्दात्सहचरितं स्थौल्यमुप हा॰म॰
दाय प्रवृत्तेः प्रयुक्त उदाहरणं सर्पे दृष्टस्तत्र तेदेर्धमुपादाय प्रवृत्तेरप्रयुक्तः प्रेत्युदाहरणमित्यर्थः वर्णश्चेदिति। महत्त्वनिमित्तमित्यर्थः २६
कालान्येति यस्या पादछिकीयं संज्ञा २५॥

© Dharmartha Trust J&K. Digitized by eGangotri

नीलान्येतिनीलास्त्काशारी नीलायाम्नन्वक्तमइत्सन् अयोविकारश्चेदितिफालइतियस्याभिधानं कुशान्येति। छंदोगाः स्तोत्रियागण
नार्थी नेडुं वएनशं कृ न कुशाइक्षिम्नवहंतिकामुकाम्ने तियस्याभेथुनास्मलकामपि तंशीलं मैथुनेच्छावती भण्यते इतिकामुकशब्द
स्वलघय तेतिकर्त्तरिसुसादितत्वा दिच्छामात्रेहृस्याभागात्त्वेनप्रहस्ति निमित्तमात्रं निष्ठ्योक्तं मैथुने इच्छापस्याः सा मैथुनेच्छेति

॥नीलीभवत्यनाच्छादनंचेत् नीलान्या॥ नचसर्वस्मिन्ननाच्छादनेदृश्यते। नीलाद्दोषधौप्राणिनि
च। नीली ओषधिः। नीलीगौः। नीलीवडवा। संज्ञायांवा। नीली। नीला। कुशी भवत्ययोविकारश्चे
त्कुशान्या। कामुकी भवति मैथुनेच्छाचेत् कामुकान्या। मैथुनेच्छावती भण्यते नेच्छामात्रं। कबरी भव
ति केशवेशश्चेत् कबरान्या॥ ॥शोणात्स्त्रियां॥ ॥शोणादाद्यास्माचामाचार्याणांमतेन स्त्रियांङी
प्रत्ययोभवति शोणी शोणा वडवा॥ ॥छ॥ ॥

व्यधिकरणपदो बहुव्रीहिराप्त्ययणीय इति भावः केशवेश इति केशसन्निवेशविशेषस्त्वर्थः॥ ॥शोणात्॥ ॥शोणादाद्योयंव
र्णगवीवर्णानांतएतिनितंतो नामिस्याधुरास्तः तत्रास्मतो ङीषिसेवासिद्धेनियमार्थवचनं प्राचामेवनामेषामिति॥ ॥ ७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰८॰४ गकोतः॥ ॥गुणमुक्तवान्गुणवचन इति कृत्य स्पुरोवद्भलमिति नि भूजे कर्त्तरि ल्युट् दृश्यपतिस पुनर्यः प्राग्गुणमभिधाय पश्चान्मतुब्लोपादभे
२७ दोपचाराद्द्रव्ये वर्त्तते सर्वे दितव्यः शुचिरिति। उत इत्यस्मिन्नसत्यपि यद्दीसादिष्विष्टं अर्थमेवान इत्यस्या संबंधो व्याख्येयस्ततश्चेहापि प्रसंग इति
भावः। गुणवचनान्ङीविति मनो रौवेत्यस्यानंतरमिदं पठितव्यमित्यर्थः। उत्तरसूत्रं च बह्वादिभ्यो वेति पठितव्यं। आद्युदात्तार्थमिति आद्युदात्तेषु
गुणवचनस्य ङीब्विधानस्य प्रयोजनमित्यर्थः। अंतोदात्तेषूदात्तयणो हल्पूर्वादिति ङीबप्युदात्त इति नास्ति विशेषः आद्युदात्तेषु तु ङीबनुदा
त्त एवावतिष्ठते। बह्वीति शद्वस्य स्विहीत्यादिनावमेरुपतस्य ने तादाद्युदात्तो वसुशब्दः गुणवचनश्चायं नैर्मल्यवचनः प्रशस्तवचन इत्यन्ये

॥वोतो गुणवचनात्॥ ॥गुणमुक्तवान्गुणवचनः गुणवचनात्प्रातिपदिकादुकारान्तात्स्त्रियां वा ङीष्प्रत्य
यो भवति। पटुः पट्वी। मृदुः मृद्वी। उत इति किं शुचिरियं ब्राह्मणी। गुणवचनादिति किं आखुः। वसुशब्दाद्गु
णवचनान्ङीबाद्युदात्तार्थः। वस्वी। खरुसंयोगोपधात्प्रतिषेधः। खरुरियं ब्राह्मणी। पाण्डुरियं॥ ४६॥

तथा चातिशयेन वसुर्वसिष्ठो भवति पतिपटु शब्दोप्याद्युदात्तः धान्ये नित् इस धिकारे फलिपाटिनमिमनिजनां गुक्पटिनाकि धतश्चेति उ
प्रत्ययः फलेर्गुगागमः पाटेश्च पटिरादेशः फल्गुः पटुः नाकुः मधुर्जन्तुरित्युदाहरणानि मृदुशब्दस्त्वंतोदात्तः म्रदश्लोरेकु भ्रश्रिसाधिकोप्र
थिम्रदिभ्रस्जां संप्रसारणं सलोपश्चेति कुप्रत्ययः पृथुः मृदुः भृज्जेः सलोपः संप्रसारणं च सकारादित्वात्कुत्वं भृगुः खरुरिति खरुः कमाय गण॰
तिं वरेति निघंटुः तत्र पाणिग्रहणो लंकदाभिधापिताद्गुणवचनत्वे। तत्परकरणं किं पटुमिच्छतीति पटूयति पटूयतेः क्विप पटूः स्त्री अत्र मा भूत् य २७
द्यपि पंसं प्राति क्रियावचनः तथापि पूर्वं गुणमुक्तवानिति कृत्वा स्यात्प्रसंगः॥ ४६॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ऽग्रहोत इति विशेषणाद्वचनग्रहणाच्च शास्त्रीयो ऽत्र गुणो न गृह्यते लोके तूपसर्जनं गुण उच्यते शास्त्रे ऽपि यस्य गुणस्य हि भाग इति विशेष
णमात्रं गुणो ऽभ्युच्यते शुक्लादीनां च प्रसिद्धतरो गुणशब्दः शेषो विकारो ऽयं स्वरूपप्रसादयश्च तु विंश निर्गुणो इति प्रतिपन्नास्तदिह जिघृक्षितं
गुणं लक्षयति। सत्त्वे निविशत इत्यादि। सोऽयं सन्निजातिगुणक्रिया इति सत्त्वं द्रव्यं तत्र यो निविशते समवैति स गुणः यो निविशते स गुण उ
च्यमाने गुणक्रियाजात्योर्गुणलक्षणं गतः स तत्र इत्युक्तं एवमपि सत्ताजातिर्गुणः स्यात्सा हि द्रव्ये गुणकर्मसु त्रिष्वपि समवैतीति तदर्थं द्रव्यए

॥ सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृ
तिर्गुणः॥ २७॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

वेत्यवधारणं द्रव्यत्वं एवमपि द्रव्यत्वजातिर्गुणः स्यात्सत्त्वे निवेशात्तत्रैव च निवेशादित्यत आह अपैतीति ततः सत्त्वादपैति अपगच्छतीति क
चिद्विवक्षाकदाचिद्विद्यमानं भवतीत्यर्थः यथाम्रफले श्यामता पूर्वमपैति रक्तता यातत्र जातायां अपैतीति वद्द्रव्यत्वजातिस्तु सर्वदा द्रव्यत्वजातिस्तु
सर्वदा द्रव्ये निविशते नापैतीति यदि हि तत्क्वचित्कदाचिद्विद्यमानस्याद्द्रव्यमेवैतन्न स्यात् एवमपि गोत्वादिर्जातिर्गुणः स्यात्सा हि सत्त्वे निविशते
अपैति च ततो ऽश्वादिष्वभावादित्यत आह पृथग्जातिष्विति पृथगिति पृथक्पदं पृथग्भूतासु जातिष्वित्यर्थः जातासाधारेषु द्रव्येषु दृश्यमानो
जातिषु दृश्यत इत्युपवर्ण्यते समासे तु सति जातं ताच्छब्द इति निस्याधिकरणपरिगणितं पृथक्प्रसंज्येत तद्देवमुक्तलक्षणो ऽयं तो यः पृथग्जातीयेषु

नचैवंरूपाणोत्वादिजातिः यद्यपिखंडमुंडादिरूपेण खंडमुंडादयः पृथग्जातीयाः तथापिगोत्वेनतासामेकजातीयत्वमेवयेत्वंपैतीत्यस्यस
त्वेवाधारेतत्परिणामर्थमाह्नः तेषांपृथग्जातिष्वितपनर्थकंगोत्वादिजातेरप्यपैतीत्यनेनैवव्याहृत्तिसिद्धेः तस्मात्पूर्वोक्तएवार्थः एवमपि
हिक्रियागुणाः स्वात्साहिद्रव्ये निविशतेयदाप्रक्रियंतत्रैवचनिविशते अपैतिचततः यदानिष्क्रियंद्रव्यंपृथग्जातीयेषुगवाश्वादिषुद्रष्ट
तेतआह आधेयश्चेतिआधेयोनिष्पाद्यः यथापाकनिक्षिप्तेषुघटादिषुरक्ततागुणः अक्रियाजः अनुत्पाद्यः यथातेजः परमाणुषुभा
स्वरक्ततागुणः तदेवमाश्रयभेदेनोत्पाद्यानुत्पाद्यस्वभावोगुणइतिनिर्लोत्पाद्यस्यकर्मणोगुणत्वाभावः एवमपिद्रव्यंगुणः प्राप्नोतिन
दपिशरीरादिकंपाकादिषुद्रव्येष्वेवपृथग्जातीयेषुनिविशतेसंयोगाद्विनाशेचततोपैतिआधेयंचाक्रियाजंअवयविद्रव्यमुत्पाद्यत्वादाका
शादेश्चानुत्पाद्यत्वादित्यत आह सोसत्वप्रकृतिर्गुणइतिपउक्तलक्षणोपेतः सत्वप्रकृतिर्नभवतिद्रव्यस्वभावकोनभवतिसगुणइत्यर्थः
अत्रोक्तसंदुःनैवसर्वजातीनांव्याहृत्तिसिद्धेः पूर्वोद्दृष्टार्थेनातानीनिसत्वेनोत्पाद्यत्वाभावादनेनतदेवंअसतिपूर्वोद्देनजातिर्व्यावर्त्तितेयथा
तेजसानांपरमाणूनांयद्रूपंयच्चेष्टकादिपाकद्रव्यगतंतदुभयंमिलितमुत्पाद्यनुत्पाद्यस्वभावमितिउभयोरपिगुणत्वंभवति नपुनः अस्येक
मुभयस्वभावत्वात् तथापाकजरूपंजातिश्चेत्तदुभयंमिलितमुत्पाद्यानुत्पाद्यस्वभावमितिजातिरपिगुणः स्यादेवन्नहिसजातीयत्वेसती
तिविशेषणमुपात्तमतः पूर्वोद्दृष्टेनजातिव्याहृत्तिः नचैवमपिपृथग्जातिषुदृश्यतइत्यनेनैवसर्वजातिव्याहृत्तिसिद्धेः पूर्वकंविशेषणं
पंव्यर्थमेवतस्मात्सत्वेनिविशतइतिस्वभावकथनंततोपैतिपृथग्जातिषुदृश्यतइतिचविकल्पेनजातीव्यावर्त्यते अपेतासस्यचत
त्रैवक्रियंतेचित्कालंस्थित्वातमाधारंसजतीसयमर्थः तदेवंसत्वेनिविशतेअपैतिआधेयश्चाक्रियाजश्चेत्येकंलक्षणंसत्वेनिविश
तेपृथग्जातिषुत्वादिकंचापरमितिलक्षणद्वयमनुसर्त्तव्यं॥ २७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥वक्वादि॥ ॥शक्तिः शस्त्रइतिशक्तिशब्दः शस्त्रेभिधेयेङीषमुत्पादयतिशक्तिः शक्तीशस्त्रइतिकिंशक्तिः सामर्थ्येप्यनेशक्तिशब्दी इतिशब्दद्वयंपठंतिशक्तिः शस्त्रीरतः प्राण्यंगादिसादीनित्रीशिवाभ्यानिपर्थोन्तरमधिकविषयाप्रीतश्चोत्तरंवाकाद्यंमत्रेश्वाजसाविति त्रैवमाख्यातंरकारांताप्राण्यंगावाचिनोवाङीषूभवतिधमनिः धमनीसर्वतोक्तिन्नर्थादित्येवङीषिसिद्धेशकधादिनामिकारांतानांप्रा

॥वह्वादिभ्यश्च॥ ॥बह्वादिभ्यः प्रातिपदिकेभ्यः स्त्रियांवाङीष्प्रत्ययोभवति। बह्वः बह्वी। ब ह्न। पद्धतिः। अंकतिः। अंचतिः। अंहतिः। वहतिः। शकटिः। शक्तिः। शस्त्रिः। शारिः। वारिः। राति। अहिः। कपि मुनिः। यष्टिः। इतः प्राण्यंगात्। कृदिकारादक्तिनः। सर्वतोक्तिन्नर्थादित्येके। चंडअरालकृपाणविकटवि शालविसंकटभाद्वाजध्वजचंद्रभागानदीकल्याणउदारपुराणअहन्। बह्वशब्दोगुणवचनस्त स्येहपाठउत्तरार्थः॥ ॥छ॥ ॥

बः प्रपंचार्थः पद्धतिशब्दः क्तिन्नंतः पादस्यहतिः। पाद्धतिः। हिमकाषिहतिषुचेतिपद्भावः अहान्नितिपद्यतेनसकेवलः स्त्रियांवर्ततेन सात्तदंतोबह्वाद्योहिदोर्धः दीर्घमहास्याः दीर्घोद्धी। शक्त्याठसामर्थ्यादुत्नुपसर्जनादितिनप्रवर्ततेअसङीषोविकल्पितत्वाद्राप्र तिषेधावपिभवतः अनडुपधालोपिनइतिङीपश्चबह्वशब्दोगुणवचनइतिअनोराचश्चलंत्विबंघोर्नलोपश्चोपुप्रसपांतः किम र्थंतर्हितस्येहपाठइसत्राहतस्येति॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४ नित्यं ॥ ॥ नित्यग्रहणमुत्तरार्थमिति इह त्वारंभसामर्थ्यादेव नित्यो विधिः सिद्धः योगारंभस्त्वेतत्प्रयोजनः ॥ ॥ भुवश्च ॥ ॥ विभ्वी प्रभ्वी
ति विप्रसंभ्यो ड्वसंज्ञायामिति डुप्रत्ययांतान्ङीष् स्वयंभूरिति भावतः क्विप् कृत्वा देवेयमिति यद्येवं धोर्ङ इतीति गुणो ऽकृते भोरीति निर्देशः
२९ प्राप्नोतीत्यत आह सौत्रो ऽयं निर्देश इति गुणस्येव कृतत्वस्याप्राप्ताद्वस्तत्वङादेश इत्यर्थः ॥ ॥ पुंयोगात् ॥ ॥ पुंसा योगः पुंयोग इति योगः संबंधः

नित्यं छन्दसि ॥ ॥ बह्वादिभ्यश्छन्दसि विषये नित्यं स्त्रियां ङीष् प्रत्ययो भवति बह्वीषु हित्वा प्रपिबन् । ब
ह्वीनामोषधी भवति । नित्यग्रहणमुत्तरार्थम् ॥ भुवश्च ॥ ॥ छन्दसि विषये स्त्रियां भुवो धातोर्ङीष् प्रत्ययो
भवति नित्यं । विभ्वी च प्रभ्वी च शम्भ्वी च स्वः कस्मान्न भवति स्वयंभूः । उत इति तत्परत्वमनुवर्तते कृत्स्नादेवप
पंचमी भुव इति सौत्रो निर्देशः ॥ ॥ पुंयोगादाख्यायाम् ॥ ॥ पुंसा योगः पुंयोगः पुंयोगाद्धेतोर्यस्मात्प्राति
पदिकं स्त्रियां वर्तते पुंसमाख्याभूतं तस्मान्ङीष् प्रत्ययो भवति । गणकस्य स्त्री गणकी । महामात्री । प्र
ष्ठी । प्रचरी ॥ ४८ ॥ ॥

पुंयोगाद्धेतोरिति हेतौ पंचमीं दर्शयति आख्याग्रहणं गुणभूतेनापि पुंसैव संबंध्यते अन्येन संबंधासंभवात् गणकादयो हि शब्दाः पुंयो
गात्स्त्रियां वर्तमानाः न पुंयोगस्याख्या भवंति स्त्रियाश्च पुंयोगमंतरेण न प्रवर्तंत इति स्त्रिया अपि नाख्योक्तत्वाह पुंसमाख्याभूतमि गण॰
ति भूतग्रहणेनेतद्दर्शयति यत्प्रातिपदिकं प्राक्पुंसो वाचकमभूत्संप्रति तु पुंयोगाद्धेतोः स्त्रियां वर्तत इति गणकीत्यादि गणयतीति गण २९
कः ण्वुल् प्रतिष्ठते प्रष्ठः प्रष्ठोऽग्रगामिनीति षत्वं ॥ ४८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।कथं पुनरेते पुंशब्दा इत्यत आह। पुंसि शब्दप्रवृत्तिनिमित्तस्य संभवादिति। गणयति प्रतिष्ठत इति मुख्यया पुंसि रूढा एते न स्त्री गणयति प्रति
ष्ठते वा महामात्रशब्दस्यापि प्रवृत्तिनिमित्तं हस्तिपकानामाज्ञापनं हस्तिपकाधिपतिर्हि महामात्रः। या तु स्वयं गणयति प्रतिष्ठते वा न तस्यां पुं
योगाच्छब्दप्रवृत्तिः अपि तर्हि स्वयमेव क्रियासंबंधादिति। टापेव तत्र भाव्यं। कथं तर्हि स्त्रियां प्रवृत्तिरित्यत आह तद्योगादिति कोर्थः। तस्येद
मिति संबंधादिति चेन्न हि तद्धितो भवेत्। ङीषेव बाधकः स्यात् चेदिति संबंधः प्रसज्यते। गणकस्येयमिति भेदसंबंधे विवक्षिते तस्येदमिति तद्धितः प्रा
प्नोति अथ नाप्राप्ते तद्धिते ङीषारभ्यमाणस्तस्य बाधक इत्युच्यते कदाचिदपि तद्धितो न स्यात् उभयमपि तिष्ठते प्रष्ठी प्राष्ठीति स्यान्मतमेतदए

।।पुंसि प्रवृत्तिनिमित्तस्य संभवात् पुंशब्दा एते तद्योगात् स्त्रियां वर्त्तन्ते पुंयोगादिति। किं देवदत्ताया दत्ता। आ
ख्याग्रहणं किं परिसृष्टा प्रजाता। पुंयोगादेते शब्दाः स्त्रियां वर्त्तन्ते न तु पुमांसमाचष्टे। गोपालिकादी
नां प्रतिषेधः। गोपालकस्य स्त्री गोपालिका। सूर्याद्देवतायां चाब्वक्तव्यः। सूर्यस्य स्त्री सूर्या देवतायामिति
किं सौरी॥ २९॥ ॥७॥ ॥

तदेव ङीषि विधानं ज्ञापकं भेदविवक्षायामपि तद्धितमंतरेणापि षष्ठ्यर्थः स्त्रियां वर्त्तत इति तेन न केवला प्रकृतिः प्रयोक्तव्येति नियमोत्र बाध्यते
सति हि तद्धिते प्राष्ठीत्यादि ङीषो विषये सिद्धः। तस्य चोदात्तनिवृत्तिस्वरेणोदात्तत्वमिति किं ङीषि विधानेनेति तत्र ये नाकारांतास्तद्धिताः भानोरि
यं भानवीयेति तदर्थमेतत्स्यात् एवं तर्हि सामान्याह णं ज्ञापकं नात्र तद्धितोत्पत्तिरिति नहि तद्धितांतः प्रकृत्यर्थे पुंसि वर्त्तते एवमपि ज्ञा
पके न तद्धितस्य निसंबाधात् प्राष्ठीति न स्यात् तस्माद्दुष्ट एवायं पक्षः एवं तर्हि यथा मंचाः क्रोशंति गोर्वाहीकः गंगायां घोषः यष्टीः प्रवेश
येत्यादौ तात्स्थ्यात् ताद्रूप्यात् सामीप्यात् तत्साहचर्याद्वा तद्धर्माध्यारोपेण तच्छब्दप्रवृत्तिः तद्वदत्रापि प्रष्ठादिसाहचर्यात् तच्छब्दप्र
वृत्तिर्भविष्यतीति तत्रोभेदेन भेदसंबंधस्यानिवृत्तत्वात् तद्धितप्रसंगः विवक्षिते च भेदे तद्धितोत्पत्त्या प्राष्ठीत्यादि भविष्यति॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तत्राहुः पाल्यायां धर्मपत्न्यां रतिमः सोऽनया सहेति भार्या याः शास्त्रसिद्धं साहचर्यमिति तस्यामेवैतन्ङीष्विधानमिति भट्टिकाव्येऽनुदुहितर्य
३० पि दृष्टः प्रयोगः। कोसल्यया सार्धं विसुरोन्मामः प्राक्केकयीतो भरतस्ततोऽभूदिति केकयस्य दुहिता केकयी जनपदशब्दादिपत्यप्रत्ययेन
केकयीति प्राप्नोति न च तस्मात्स्त्रियामिति लुक् न प्राच्यभर्गादिति प्रतिषेधात् तस्मात्सोपमित्यभेदसंबंधमात्रमेवमपक्षेऽसङ्गोऽत्यः यद्वा यथा स्वा
मिना सोपचरत इति स्वामिनः संनिधानत्वात्सकृत्वं दासस्युत साक्षान्न तथा पुरुषः साक्षात्प्रतिष्ठते स्वापि संनिधानात् तत्सुरुपगतामप्याः
गम्यान् नक्रियापास्तस्याभारोपणात्प्रतिष्ठत इति तस्यामेव प्रवृत्तः शब्दो व्युत्पाद्यते न तु पुरुषे स्युस्तादिनः मन्यते न सहाभेदोपचारात्तस्या वर्त्त
ते न चैतावता पुंयोगादाख्यहेतोः स्त्रियां वर्त्तते ऽस्य हानिः साक्षात्स्वयमकर्तृत्वात्। अत्र पक्षे प्रस्थ इति स्थिते सुबंतेस्य समासः सु प्स्वंत
स्यानिमित्तः प्रातिपदिकं च पूर्वं लिङ्गमभिधत्ते यच्चात्र संख्यामिति तन्निमित्तं सुब्व्यपेक्षात्समासात्प्राग्वोत्तरपदात्स्य शब्दाद्याप्प्रसंगः
न च स्यशब्दात्स्यत्वे ने नैव ङीष् पूर्वमुत्पन्ने प्रवृत्तः शब्दो हि पुंसि समासान्तस्य शब्दमात्रे नैष दोषः। इति कात्स्न्येनोपपादनेऽपि ङीः सहसमासवच
नं प्राक्सुबुत्पत्तेरिति कृदन्तावस्थायामेव समासः स पुंसि समासेति ङीष् भविष्यति परिभाषाप्रयोजनानुपपद्यमाना ङित्वं अत्र प्रतिपा
दितानि देवदत्तेति स्त्रियाः एवकस्याश्चिद् एषा संज्ञापरी सख्याप्रज्ञातेति प्रसूते स्वार्थः पुंयोगाद्दते। स्त्रियां वर्त्तत इति परिसर्गः प्रसवः प्रज
नं स्त्रस्य नर्थान्तरं स्वचनं पुंयोगमन्तरेणासंभवतितस्मात्पुंयोगाद्धेतोः स्त्रियां वर्त्तते परिसंख्यापञ्जाते ति हि प्रकृतौ एते शब्दा इति बहुव
चनेन तु एवंजातीयकाः शब्दाः प्रसूत्यादयस्तद्रूपे संक्षिप्यं गोपालिकादीनामिति सिद्धम् इति शेषः सूर्याद्देवतायां चाप् वक्तव्य इति ङी एम०
ष एव प्रतिषेधे वक्तव्ये चाब्विधानमन्तोदात्तार्थं सूर्यशब्दोयमाद्युदात्तः तत्र टापि सति आद्युदात्तत्वमेवावतिष्ठेत सूरीति सूर्यस्य स्त्री ३०
मानुषी कुन्त्यादिः सूर्येति च्वेति यलोपः॥ २९॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥इंद्र वरुण॥ ॥येषामिति इंद्रादीनां मृडांतानां मातुलाचार्ययोश्च अमेषामिति हिमादीनां हिमारण्ययोर्महत्त्व इति महत्त्वयोगेनानयोः स्त्री
त्वं अन्यत्र न पुंसकत्वं दुष्टो यव इति णढः यवानीति जात्यंतरमेवाभिधीयते अयमेव च दोषः यदुत यवत्वज्ञाने भावे तदाकारानुकृतिः यवना
ल्लिप्यामिति केचिज्जनपदिनो यवनाः तेषां लिपिः तत्सेदमित्यणो बाधकोऽङीब्लिपिशब्दः स्त्रीलिंगः उपाध्याय मातुलाभ्यां वेति। उपाध्या
यमातुलाभ्यां योऽङीप तत्संनियोगेनानयोर्वा आनुगागमो भवतीति वक्तव्यमित्यर्थः तत्रोपाध्यायस्याप्राप्तो मातुलस्य तु नित्यं प्राप्त आनुग्विक
ल्प्यते। आचार्यादणत्वं चेति सुआरिखुपठितमभिति उक्तं भवति। आर्यक्षत्रियाभ्यां वेति ङीषानुकोद्वावप्यप्राप्तौ विकल्प्येते स्वार्थे स्वार्थे विधि

॥इंद्रवरुण भव शर्व रुद्र मृड हिमारण्य यव यवन मातुलाचार्याणामानुक्॥ ॥इंद्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङी
ष्प्रत्ययो भवति। आनुक्चागमः। येषामत्र पुंयोग एवेष्यते तेषामानुगात्रं विधीयते प्रत्ययस्तु पूर्वेणैव सिद्धः अन्येषां तदुभ
यमेव विधीयते। इंद्राणी। वरुणानी। भवानी। शर्वाणी। रुद्राणी। मृडानी। हिमारण्ययोर्महत्त्वे। महद्धिमं हिमानी महदर
ण्यमरण्यानी। यवाद्दोषे। दुष्टो यवो यवानी। यवनाल्लिप्यां। यवनानी लिपिः। उपाध्याय मातुलाभ्यां वा। उपाध्यायी। उपा
ध्यायानी। मातुली। मातुलानी। आचार्यादणत्वं च। आचार्यानी। आर्यक्षत्रियाभ्यां वा। आर्याणी। आर्या। क्षत्रिया
णी। क्षत्रिया। येनापि पुंयोगे न स्वार्थ एवायं विधिः। पुंयोगे तु ङीषेव भवति तस्मात् आर्यी। क्षत्रियी। मुद्गलाच्छंदसि लिच्च।
रथीरभून्मुद्गलानी गविष्टौ॥ ॥छ॥ ॥

इति पदि तु पुंयोगेयं विधिः स्यात् क्षुद्रापि क्षत्रियस्य भार्या क्षत्रियाणी स्यात् ब्राह्मणभार्या च क्षत्रियाणी न स्यात् स्वार्थे एव स्त्रीत्वविशिष्टेयं वि
धिः मुद्गलादिति ङीषो लित्वात् उदात्तानुगकारस्य लित्स्वरः अथ किमर्थमानुग्विधीयते न आनुगेवोच्येत अकारोच्चारणसामर्थ्यादतो गुणे प
ररूपं बाधित्वा सवर्णदीर्घत्वं भविष्यति। अन्यथानुगेवोच्येत यथेन्द्रताहि पररूपं न भवति तथैव सवर्णदीर्घत्वमपि न स्यात् नैष दोषः प्रवि
धिप्रसुपदेशोनर्थकः सति विधौ वाध्यते यस्तु विधेर्निमित्तमेव नासौ वाध्यते तस्मादानुगेव वक्तव्यः अपर आह इंद्रमाचष्टे इंद्रयति इंद्रयतेः
क्विप् णिलोपः इंद्रः स्त्री इंद्राणी अत्र दीर्घस्याश्रवणं दीर्घोच्चारणसामर्थ्यादतरत्वविधिकारो बाध्यत इति एवमपि क्विवंतः पुंशब्दो न
भवति॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का· प्र· ४ ॥क्रीतात्॥ ॥पूर्वशब्दोऽवयववचन इत्याह करणं पूर्वमस्मिन्निति । दिग्ववस्थावाचिनि तु पूर्वशब्दे करणं पूर्वमस्मादिति वाच्यं स्यात् एवं च
क्रीतस्य करणवाचिशब्दोत्तरमवयवो नोपपद्यत इति लाक्षणिकमेव प्रातिपदिकं करणपूर्वत्वेन विशेष्यते क्रीतशब्देनोऽपि विशेषितस्ये
३१ व विशेषणात्तदन्तविधिरित्याह क्रीतशब्दान्तात्प्रातिपदिकादिति यदि तु अवयवाभ्यावाचिनं पूर्वशब्दमाश्रित्य क्रीतशब्दो विशेष्यते करणपू
र्वमस्मादिति ततो वाक्येऽपि स्यात् अश्वेन क्रीतेति तस्मादवयववाची पूर्वशब्दः प्रातिपदिकं च विशेष्यमिति सम्यगुक्तं वस्त्रक्रीतीतिगति

॥क्रीतात्करणपूर्वात्॥ ॥करणं पूर्वमस्मिन्निति करणपूर्वं प्रातिपदिकं क्रीतशब्दान्तं प्रातिपदिकात्क
रणपूर्वात्स्त्रियां ङीष्प्रत्ययो भवति। वस्त्रक्रीती। वसनक्रीती। करणपूर्वादिति किं सुक्रीता दुःक्रीता। इ
ह कस्मान्न भवति। सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी। टाबंतेन समासः अत इति चानुवर्तते। ग
तिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति बहुलं तदुच्यते कर्तृकरणे कृता बहुल
मिति॥ ३० ॥ ॥

कारकोपपदानामिति वचनात्प्रागेव सुबुत्पत्तेः क्रीतशब्देन सह समासः टाबंतेन समास इति एकादेशस्य पूर्वं प्रसंगत्वात् कृदंततया
अविधानात् विरुद्धश्चाबंतेन समासः। अथ टाबंतेनापि समासे कस्मादेवात्र न भवतीति तत्राह अत इति। तिन्नूदाहरणस्य प्रागेव टाबु
त्पत्तेरत्रापि समासः प्राप्नोति वक्ष्यमाणविशेषात् तत्राह गतिकारकोपपदानामित्यादिना तत्र बहुलग्रहणमस्तीति चेत्तत्राह कर्तृकरणे
कृता बहुलमिति कर्तृकरणे कृता बहुलमित्यनेन तावदत्र समासः स च बहुलग्रहणात्प्राक्सुबुत्पत्तेः क्वचिद्भवति क्वचिदुत्पन्नेऽसु
पीति मन्यते एतावतैव यद्यवबहुलं तदुच्यत इति समासमात्रेणोक्तं न पुनः कर्तृकरणे कृता बहुलमित्यस्यमेव समासः प्राक्सुबुत्पत्तेरिष्यते यथा

[illegible] ३० ॥ ॥

राम०
३१

© Dharmartha Trust J&K. Digitized by eGangotri

॥क्तादल्पा॥ ॥अल्पाख्यायामिति समुदायोपाधिरिति। ननु चाल्पेऽपि विलिप्तेति प्रवर्तिपदार्थस्यैवाल्पता प्रतीतेन विलिप्तार्थस्य। एवं मन्यते अल्पत्वगुणस्याल्पत्वे सति तिलद्विलेपनस्याल्पत्वमवश्यंभावीति अभ्रविलिप्तीति वृत्तौ गतार्थत्वादस्य शब्दस्याप्रयोगः। चन्दनानुलिप्तेति बहुलेन चन्दनेनानुलिप्ते स्पर्धिः कृद्ग्रहणपरिभाषया समुदायस्य क्तान्तत्वं॥ ॥बहुव्रीहेः॥ ॥बहुव्रीहियोनिर्वृत्तः क्तान्तस्तस्मादित्यत्र क्तादित्यनुवृत्तिसामर्थ्यात्प्रत्ययग्रहणपरिभाषात् कृद्ग्रहणपरिभाषा च न प्रवर्त्तत इति बहुव्रीहेः क्तान्तत्वं। शंखभिन्नीति निष्ठान्तस्य पूर्वनिपातो न भव

॥क्तादल्पाख्यायां॥ ॥कर्मणा पूर्वादन्येन करणपूर्वात्मातिपदिकात् क्तान्तादल्पाख्यायां ङीष् प्रत्ययो भवति अल्पाख्यायामिति समुदायोपाधिः। अभ्रविलिप्ती द्यौः। सूपविलिप्ती पात्री। अल्पाभ्रा अल्पसूपेत्यर्थः॥ अल्पाख्यायामिति किं चन्दनानुलिप्ता ब्राह्मणी॥ ॥बहुव्रीहेश्चान्तोदात्तात्॥ ॥क्तादित्येव बहुव्रीहेर्योनिर्वृत्तः तः क्तान्तस्तस्मात् स्त्रियां ङीष् प्रत्ययो भवति। स्वाङ्गपूर्वपदो बहुव्रीहिरिहोदाहरणं। अस्वाङ्गपूर्वपदाद्धि कल्पे वक्ष्यति। शंखभिन्नी। ऊरुभिन्नी। गलोत्कृत्ती। केशलूनी। बहुव्रीहेरिति किं पादपतिता। अन्तोदात्ताज्जातप्रतिषेधः। दन्तजाता। स्तनजाता॥ ॥छ॥ ॥

ति जातिकालसुखादिभ्यः परवचनमिति वचनात् शंखोदयो हि जातिवचनाः अत एव जातिकालसुखादिभ्यः स्यान्तोदात्तत्वं भवति गतोऽल्पकृत्तीति। कृती छेदने कर्तृ वा क्तः। गलमुत्कृतं यस्या इति विग्रहः पादपतितेति कर्तृकरणे कृता बहुलमिति समासः। थाथादिस्वरेणान्तोदात्तत्वं अन्तोदात्ताज्जातप्रतिषेध इति। अन्तोदात्तात् बहुव्रीहेर्ङीविधाने जातशब्दान्तात् प्रतिषेधो वक्तव्यः। सत्यं तद्ग्रहणादेव सिद्धः कथं इहान्तग्रहणं न कर्तव्यं वर्णादनुदात्तादिति वर्तते उदात्तान्तादिति विज्ञास्यते न तत् क्रियते निसर्गे यथा बहुव्रीहिर्विज्ञायेत दन्तजाता।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ८ ४ पाणिगृहीत्यादीनां विशेष इति सिद्धय इति शेषः अग्निसाक्षिकं यस्याः पाणिर्गृह्यते सा पाणिगृहीतीति भवति कथं विविरिति यथोक्तात्मका
३२ रान्तेन प्रकारेणोऽसर्थः अबह्वनञ्सुखादिवक्ष्यमाणपराद्बहुव्रीहेर्ङीप्न भवतीति कृत्वमित्यर्थः बह्वृच इति बहवः ऋचो यस्याः इति वि
ग्रहः बहोर्नञ्वदुत्तरपदभूम्नीतितो नान्तत्वं। अऋचा असुऋचेति नञ्विधेः ऋनेऋतमनया ऋमनंऋमनयेति विग्रहः नञ्सुभ्यामित्यंतोदात्त
त्वं। मासो यातो जातो यस्याः सुखेन यातं प्राप्तमनया दुःखेन यातमनयेति विग्रहः सुखादयः सुखादिभ्यः कर्तृवेदनायामित्यत्र पठितास्वस्थे।
पाणिगृहीत्यादीनामर्थविशेषे पाणिगृहीती भार्या अन्यस्यास्तु कथं यि सा पाणिर्गृह्यते पाणिगृहीता सा भवति।
अबह्वनञ्सुकालसुखादिपूर्वादिति वक्ष्यमाणे। बह्वृच। बह्वृचा। नञ्। अऋचा। सु। सुऋचा। काल। मासजाता। मासजाता एव
मासजाता। सुखादिः। सुखजाता। दुःखजाता। जातिकालसुखादिभ्योऽनाच्छादनादित्यस्मिन्नबहुव्रीहेरन्तोदा
त्तत्वं॥ ॥असंयोगपूर्वपराद्धा॥ ॥अन्तोदात्ताल्लुकादिति वर्तते। असंयोगपूर्वपरादंतोदात्तात्कांतात् बहु
व्रीहेः स्त्रियां वा ङीप् प्रत्ययो भवति। एवं शाकलिसे प्राप्ते विकल्प उच्यते। शार्ङ्गरजग्धी। पलाण्डुभक्षिती। सुरा
पीती। शार्ङ्गरजग्धा। पलाण्डुभक्षिता। सुरापीता। असंयोगपूर्वपरादिति किं। शंखभिन्नी। ऊरुभिन्नी। अन्तो
दात्तादित्येव वस्त्रच्छन्ना वसनच्छन्ना। बहुलमेतन्निदर्शनमिति वक्ष्यते। प्रवृद्धविलूनी प्रवृद्धविलूना। प्रवृद्धा
अथवा बहुव्रीहेश्च जातिपूर्वादिति वक्तव्यं बहुव्रीहावन्तोदात्तनिमित्ते ॥ वासो विलूनं चेति नायं बहुव्रीहिः ३१॥ ए॥॰
श्च नेषु प्रतिषिद्धेषु जातिरेवान्तोदात्तनिमित्तं क्तान्तस्योपदिश्यत इति जातिग्रहणमेवात्र कर्तव्यमित्यर्थः॥ ॥असंयोग॥ ॥ ३२
शार्ङ्गरजग्धीत्यादि शार्ङ्गरजो भक्षमनया पलाण्डुर्भक्षितोऽनयेति विग्रहः शार्ङ्गरादिभ्यः स्वजातिः सर्वत्र जातिकालसुखादिभ्य इत्यन्तो
दात्तत्वेऽवस्त्रच्छन्नेति। छद अपवारणे चुरादिः वासोऽतथान्तेसादिनाच्छन्नशब्दो निपातितः अत्र नाच्छादनादिति प्रतिषेधात्पूर्वपद
प्रकृतिस्वरत्वमेव भवति। प्रवृद्धा चेत्यादिना विग्रहविशेषेणास्य सुखं दर्शयति ३१॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥स्वांगात॥ ॥अतिकेशीति अतिक्रांता केशानिति तत्पुरुषः एकविभक्तिचेति केशशब्दस्योपसर्जनत्वं अशिखेति अतस्त्वपसर्जनग्र
हणेनैव प्राप्नोतिनमूलोदाहरणेष्वनुपसर्जनादित्यधिकारात्‌ अथ बहुव्रीह्यधिकारात्र नभविष्यतीत्युक्ते अतिकेशीत्यत्रापि
तर्हि न स्यात्‌ अंगगात्रेत्यादिमोक्षनुक्तमप्येतत्प्रयोगबाहुल्याद्‌ निकारेणोक्तं यं घत्र स्तोमं गं स्तनं गंस्येत स्वक्षणमुखाशाला अ
त्रापि प्राप्नोति मुखस्य शालांगत्वात्‌ दीर्घकेशीरथ्येत्यत्र चनस्यात्‌ केशानां रथ्यांगत्वाभावात्‌ तदप्याह तिभा प्रिया विहारार्थ्या
गं परिभाषते अद्रवमितितत्र प्राणिस्थस्वांगमित्यनेनस्वक्षणामुखाशालेत्यत्र नभवति एवमपि बहुकफा अत्र प्राप्नोतितदर्शमाहत्र

॥स्वांगाच्चोपसर्जनादसंयोगोपधात्‌॥ ॥बहुव्रीहेः क्रोडंतोदात्तादिति सर्वं निवृत्तं वाग्रहणमनुवर्त्तते स्वा
गंयदुपसर्जनमसंयोगोपधं तदंतात्प्रातिपदिकात्स्त्रियां वा ङीष्‌ प्रत्ययो भवति चंद्रमुखी चंद्रमुखा अति
क्रांता केशानतिकेशी अतिकेशा माला स्वांगादिति किं बहुयवा उपसर्जनादिति किं अशिखा असंयोगो
पधादिति किं सुगुल्फा सुपर्वा अंगगात्रकंठेभ्य इति वक्तव्यं मृदंगी मृदंगा सुगात्री सुगात्रा स्निग्धकंठी
स्निग्धकंठा अद्रवं मूर्त्तिमत्स्वांगं प्राणिस्थमविकारजं॥ ॥छ॥ ॥
द्रवमिति द्रवतीति द्रवं ततोन्यदद्रवं एवमपि बहुज्ञाना अत्रापि प्राप्नोति अतआह मूर्त्तिमदिति असर्वगतद्रव्यपरिमाणं मूर्त्तिः अ
सर्वगतानि च तानि द्रव्याणि तेषां परिमाणं द्रव्यत्वादिशामूर्त्तिः स्पर्शवद्द्रव्यपरिमाणं मूर्त्तिरित्यन्ये सा यस्यास्तितन्मूर्त्तिमत्‌ एवम
पि बहुशोफा अत्र प्राप्नोति अतआह अविकारजमिति विकारो धातूदि वैषम्यं ततो यज्जायते तन्न भवतीत्यविकारजं शोफस्तु
अपृथुस्तनकोविकाजः यदिप्राणिस्थं स्वांगं रथ्यादिपरिगता नाकेशानां स्वांगत्वं न स्यात्‌ संप्रत्यप्राणिस्थत्वात्‌ ततश्च दी
र्घकेशी रथ्येति न सिद्ध्यति॥ ॥छ॥ ॥

भिर्‌ इत्य
अर्थं अदंतत्वा भोवा
द्भ्यामित्येव तास्तिः
बहुव्री हौतु स्तन नभे
त्यनिषेधात्‌ स्याच्चिरव
त्वि तु अंजोतच्च भत्व प्रह
यस्य प्राचीन पत्ते ध्रुत
पैव पाठात्‌

© Dharmartha Trust J&K. Digitized by eGangotri

का·पद·४
३२

अत आह अतत्स्थमिति संप्रत्यप्राणिस्थमपि कदाचित्प्राणिनि दृष्टं चेत्तदपि स्वांगं भवत्येवेत्यर्थः एवमपि प्रतिमावयवानां मुखादीनां स्वांगत्वं न प्राप्नोति
अप्राणिस्थत्वात् ततश्च दीर्घमुखी प्रतिमेत्यत्र न सिध्यतीति तत्राह तेन चेदिति अतत्स्थमित्यनुषंगः अप्राणिस्थमपि मुखादि स्वांगं तेन चेन्मुखादिना तद
प्राणिद्रव्यं तथायुतं भवति यथा प्राणिद्रव्यमित्यर्थः अन्येषां पाठस्तस्य चेत्तत्तथायुतमिति तत्रार्थः अप्राणिस्थमपि मुखादि स्वांगं तस्य चेदप्राणिनः
तन्मुखादि तथायुतं भवति तादृशं संस्थानं भवति यादृशं संस्थानं प्राणिन इत्यर्थः ॥ ॥ नासिकोदर ॥ ॥ सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो भव

अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतं ॥ ॥ नासिकोदरोष्ठजंघादंतकर्णशृंगाच्च ॥ ॥ स्वांगाच्चोपसर्जना
दित्येव । बह्वच्लक्षणो संयोगोपधलक्षणो च प्रतिषेधे प्राप्ते वचनं । सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो
भवत्येव । नासिकाद्यंतात्स्वांगात्तिप्रदिकात्स्त्रियां वा ङीष्प्रत्ययो भवति । तुंगनासिकी । तुंगनासिका । तलोदरी त
लोदरा । बिंबोष्ठी । बिंबोष्ठा । दीर्घजंघी । दीर्घजंघा ॥ समदंती । समदंता । चारुकर्णी । चारुकर्णा । तीक्ष्णशृंगी
तीक्ष्णशृंगा ॥ पुच्छाच्चेति वक्तव्यं । कल्याणपुच्छी । कल्याणपुच्छा । कबरमणिविषशरेभ्यो नित्यं । कबरपुच्छी ।
मणिपुच्छी । विषपुच्छी । शरपुच्छी । उपमानात्पक्षाच्च पुच्छाच्च । उलूकपक्षी सेना । उलूकपुच्छी शाला ३२ ॥

त्येवेति कथं नासिकोदरयोः स्वावदस्य योगः पुरस्तादपवादन्यायेनानंतरं बह्वच्लक्षणमेव प्रतिषेधं बाधते ओष्ठादिषु पि मध्येपवादन्यायेन पूर्वं संयो
गोपधलक्षणमेव प्रतिषेधं बाधते न सहादिलक्षणं अतोसौ भवत्येव सनासिका अनासिका विद्यमाननासिकेति बिंबोष्ठीति ओष्ठयोर्वा स
मासे पररूपं वक्तव्यमिति पररूपं कबरपुच्छीति कबरं नानावर्णं पुच्छमस्याः सा मयूरी मणिः पुच्छमस्याः विषं पुच्छमस्याः मणिपुच्छी विषपुच्छी
वृश्चिकी उलूकस्येव पक्षोस्या उलूकस्येव पुच्छमस्या इति विग्रहः ॥ ३२ ॥ ॥ राम०
३२

© Dharmartha Trust J&K. Digitized by eGangotri

॥ नक्रोडादि ॥ ॥ कल्याणक्रोडेति। अश्वानामुरः क्रोडा स्त्रीलिंगोयं तत्र बहुव्रीहौ पूर्वपदस्य पुंवद्भावः उत्तरपदस्योपसर्जनह्रस्वत्वं कल्याणनखेति।
अस्य थोयं नखमुखात्संज्ञायामिति प्रतिषेधात्। असंज्ञायां ङीष् स्यादेव तस्मात् कल्याणो खेपाठः उखेति हि पठ्यते। क्रोडा वाल खुरो खाः शफो मुदं भागा
लोचेति॥ ॥ सहनञ् ॥ ॥ पूर्वग्रहणमनुवर्तमानं सह नञ् विद्यमानेभ्यः सुप्यमाने प्रहादिभ्यः परं पर्यङ्गं तदन्तान्ङीष् भवतीत्यर्थो भवति तत ङीषो प्रतिषे
धः प्रसज्येत विद्यमानं मुखमस्य विद्यमानमुखः कल्याणो विद्यमानमुखो स्याः कल्याणी विद्यमानमुखीति भवति द्येतत् यथोक्तविशेषणग्रहणं च तस्मा

॥ नक्रोडादिबह्वचः ॥ ॥ स्वाङ्गादिति ङीषः प्रतिषिध्यते। क्रोड यं तावद्बह्वजन्तात्स्व प्रातिपदिकान्ङीष्प्रत्ययो
न भवति। कल्याणक्रोडा कल्याणखुरा कल्याणगुल्फा कल्याणमुखा कल्याणशफा कल्याणवाला कल्याण
गुदा कल्याणघोणा कल्याणनाभा। क्रोडादिराकृतिगणः॥ सुभगा सुगला बह्वचः खल्वपि पृथुजघना महा
ललाटा॥ ॥ सहनञ्विद्यमानपूर्वाच्च ॥ ॥ स्वाङ्गाच्चोपसर्जनादिति ना प्राप्तो ङीषेति च ङीष् प्रतिषिध्यते।
सहनञ्विद्यमानशब्देभ्यः पूर्वात्स्वाङ्गात् प्रातिपदिकान्ङीष्प्रत्ययो न भवति। सकेशा अकेशा विद्यमानकेशा सनासिका
अनासिका विद्यमाननासिका॥ ॥ नखमुखात्संज्ञायाम् ॥ ॥ नखमुखान्तात्प्रातिपदिकात्संज्ञायां विषये
ङीष्प्रत्ययो न भवति। शूर्पणखा वज्रणखा गौरमुखा कालमुखा संज्ञायामिति किं ताम्रनखी कन्या चन्द्रमु
खी॥ ॥ दीर्घजिह्वी च छन्दसि ॥ ॥ दीर्घजिह्वीति छन्दसि विषये निपात्यते संयोगोपधत्वाद्ङीष्प्रवि
धीयते। दीर्घजिह्वी वै देवानां हव्यमलेट्। चकारः संज्ञानुकर्षणार्थः दीर्घजिह्वा मा। निपातनेनिसार्थं ॥ ॥

न विद्यमानकल्याणमुखेति न स्वत्र यथोक्तं विशेषणमस्ति तस्मात्पूर्वग्रहणं॥ ॥ नखमुखात् ॥ ॥ शूर्पणखेति पूर्वपदात्संज्ञायामगः इति णत्वं
एवं च शूर्पणखा वाचा श्वसी शूर्पनखी वा पदियोग मात्रं न संज्ञा शूर्पनखी संज्ञायां शूर्पणखा न पुनः शूर्पणखीति णत्वङीषोः समावेशः साधुः॥
॥ दीर्घ ॥ ॥ निपातनं नैसार्थमिति दीर्घजिह्वादिस्तु च्यमाने प्रकृतस्य ङीषो विकल्पितत्वादिहापि विकल्पो विज्ञायेत॥ ॥ ७१ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰८॰४
३४

॥ दिक्पूर्वा ॥ ॥ दिक्पूर्वपदान्ङीषो नुदात्तत्वं स्वाङ्गाच्चेतः स्त्रियां विहितस्य ङीष एवास्मिन्विषये नुदात्तत्वं वक्तव्यं ङीब्विधाने स्यात्तत्रापि ङीब्विषया
ङीप्प्रसक्ताः अप्रवेहि ङीपि विधीयमाने प्राग्गुल्फा प्राग्जङ्घेनेति ङीब्विषयास्यात्तत्रापि ङीप् प्राप्नोति ङीपः प्रतिषेधाभावात् इत्यस्मिन्पूर्वपक्षे इदमा
ह विधिप्रतिषेधविषयः सर्वोपि स्यात् इति तत्र विधिविषयाये सायाः फलं दर्शयति यत्र ङीब्विहित इत्यस्मिन्विशेष इति ङीपः पित्वादनुदात्तत्वं भवति ङी
षस्तु प्रत्ययाद्युदात्तत्वप्रसक्तः प्राङ्मुखेति ङीपा मुक्ते स्वाङ्गाच्चोपसर्जनादिति ङीषपि न भवति कथं तर्हि क्रमेतत् यत्रोत्सर्गापवादौ द्वावपि विकल्पि
तौ तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्तते इति प्रतिषेधाये सायाः फलं दर्शयति इह न भवतीति एवं च हल्लौ वाक्यभेदः कर्तव्यः दिक्पूर्वपदा

॥ दिक्पूर्वपदान्ङीप् ॥ ॥ स्वाङ्गाच्चोपसर्जनादित्येवमादि विधिप्रतिषेधविषयः सर्वोप्ययं सूत्रे यत्र
ङीब्विहितस्तत्र तदपवादः दिक्पूर्वपदात्प्रातिपदिकात् ङीप्प्रत्ययो भवति स्वरे विशेषः प्राङ्मुखी प्राङ्मु
खा प्राङ्नासिकी प्राङ्नासिका इह न भवति प्राग्गुल्फा प्राक्क्रोडा प्राग्जङ्घेनेति ॥ ॥ वाहः ॥ ॥ ङीषेव स्वर्यं
तेन ङीब्वहेरयं ण्विप्रत्ययान्तस्येति ऊठ् सामर्थ्याद्वहन्तं विज्ञानं वाहं तदन्तात्प्रातिपदिकात्स्त्रियां ङीष्प्र
त्ययो भवति दित्यौही प्रष्ठौही ॥ ३३ ॥ ॥

दसंयोगोपधस्वाङ्गान्तान्नासिकाद्यन्तान्ङीष् भवति क्रोडादिबह्वजन्तान्नेति अपरः कल्पः अत्र ङीषनुवर्तते तस्य दिक्पूर्वपदादिति पंच एम॰
म्याः षष्ठी प्रकल्प्यते दिक्पूर्वपदादुत्तरस्य ङीषो ङीबादेशो भवतीत्यर्थः तेन यत्र ङीष् तत्रैव ङीबिति सिद्धं एवं चोत्तरत्र ङीषेव स्वर्यत इत्यु ३४
पपन्नं भवति ॥ ॥ वाहः ॥ ॥ सामर्थ्यादिति कर्मण्युपपदे वहेर्ण्विविधानात्केवलस्य वाहः संभवो नास्तीत्येतत्सामर्थ्यं दित्यौहीति छन्द
सि सहः वहश्चेति ण्विः उपधावृद्धिः ङीषि वाह ऊठ् तत्र संप्रसारणमित्यनुवृत्तेः संप्रसारणाच्चेति पूर्वत्वं एत्येधत्यूठ्स्विति वृद्धिः ३३ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥सख्यशिश्वीति॥ ॥भाषायामिति सुब्अन्तेऽत्रैतन्नपिष्यन्तिसखी सप्तपदी भव। आधेनवो धुनयन्तामशिश्वीरित्निनेष्टयोष्टः इति करणोऽत्र क्विपन्तेऽस्मिन्क्रमः भाषायामिति स्यानन्तो दृष्टः सच प्रकारेऽव त्ते तेन नछन्दसि पिङ्क्तिविङ्विष्यतिभाषाग्रहणन्तु नित्यार्थं॥ ॥जातेः॥ ॥अस्त्रीविषयादित्यनन्तत्र भावे विषयशब्दः इत्याह न च स्त्रियामित्रियामेव यस्य नियमेन स्त्रीत्वं अस्त्रीविषयं ततोऽस्त्रीविषयमित्यर्थः। इह लोके किं जातिग्रहणे ब्राह्मणत्वादीनां गोत्वस्य च नाजयनादेर्जातित्वे वादिनां विप्रतिपत्तेः वरणशब्दानां चकारादीनामध्ययनक्रियासंबन्धनिबन्धनत्वेनपाचकादिवल्लिङ्गाशब्दत्वेन्यायात्तिरस्तमभिमतां जातिं लक्षयति आकृतिग्रहणा जातिरिति गत्यन्तेनेनेति ग्रहणामिति करणसामान्येयं दं संक्रियते पश्चात्तदाकृतिशब्दसमेव यानेस्त्रीत्वं प्रतीयमानं न हि लिङ्गत्वात्प्रत्ययस्य निमित्तं न भवति ग्रहणमाकृतिर्यस्या इति ग्रहणरूपो देशो नाकृतिरूपता विधीयते न

॥सख्यशिश्वीति भाषायां॥ ॥सखी अशिश्वी इत्येतौ ङीषन्तौ शब्दौ भाषायां निपात्येते। सखीयं ब्राह्मणी। नास्याः शिशुरस्तीति अशिश्वी। भाषायामिति किं। सखा सप्तपदी भव। अशिश्वीमिव मामयं शिशुरभिमन्यते॥ ॥जातेरस्त्रीविषयादयोपधात्॥ ॥जातिवाचि यत्प्रातिपदिकं न च स्त्रियामेव नियतं अयोपधं तस्मात्स्त्रियां ङीष् प्रत्ययो भवति। आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभा

त्वाकृतिरूपोद्देशेन ग्रहणस्मृतेत्यर्थः आकृतिः संस्थानं सा ग्रहणं यस्याः सा आकृतिग्रहणा अवयवसंनिवेशविशेषव्यङ्ग्येत्यर्थः अनेन गोत्वादिजातिर्लक्षिता ब्राह्मणत्वादिजातिस्तु न संगृहीता भवति ब्राह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वादिति तत्संग्रहायाह लिङ्गानां चेति सर्वलिङ्गानि न भजन्तीत्ययमर्थो विवक्षितः तत्र सर्वशब्दस्य लिङ्गापेक्षत्वेपि गमकत्वाद्द्वन्द्वोत्तरेख प्रत्ययः समासश्च लिङ्गानामिति कर्मणि षष्ठी अप्राप्तश्यणार्थं चेदं वचनं न त्वाकृतिग्रहणोसस्य समकोचकं तेन नतटादेः सर्वलिङ्गत्वेप्याकृतिग्रहणत्वाज्जातित्वं भवत्येव इह कस्मान्न भवति देवदत्तः देवदत्तेति उपदेशापेक्षमिदं लक्षणं कोर्थः असर्वलिङ्गेषु येषु जातित्वाचित्वमाचार्यउपदिशन्ति तेष्वेव भवतीत्यर्थः आकृतिग्रहणाया जातेरेकत्वान्

त्वत्प्रत्येकपरिसमाप्तत्वलक्षणाण्याभ्युमीनाह॥ ॥७१॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सकृदितिएकस्मिन्पिंडेसकृदुपदिष्टाज्जातिर्गोरितिपिंडांतरेनिर्ग्राह्या निश्चेतुंशक्येत्यर्थः पदिवैकानसप्तलेकरस्यैतत्तथा नित्यत्वाभावेपिपिंडेन
सहविनाशात्पिंडांतरेकरस्येतपरिचिप्रत्येकंसर्वात्मनापरिसमाप्तानस्यात् तस्मिन्नुपितावत्पिंडेसर्वात्मनानगृह्येतयत्रारब्धातार्किपुनःपिंडांत
रेकथंपुनरेकमेववस्तुबहुत्रयुगपत्कार्त्स्न्येनवर्त्ततेनहिदेवदत्तस्तदानीमेववस्तुघ्नेभवतिमथुरायांचदृश्यतेचेत्कोदोषःनहिदृष्टेनुपपन्नंनामगो
त्रमितिअपत्यमित्यर्थःचरणशब्देनशाखाध्यायिनोगृह्यंतेगोत्रस्यानाकृतिग्रहणात्सर्वलिंगत्वाच्चपृथगुपादानंनाडायनंनपुंसकमिति
दर्शनात्चरणानांस्वत्वध्ययनक्रियासंबंधेनप्रवृत्तत्वात्क्रियाशब्दएवनजातिशब्दःकुक्कुटीसूकरीतिआकृतिग्रहणाज्जातेरुदाहरणंब्रा

सकृदाख्यातनिर्ग्राह्यागोत्रंचचरणैःसहप्रादुर्भावविनाशाभ्यांसत्व
स्ययुगपद्गुणैः॥ असर्वलिंगांबह्वर्थांतांजातिंकवयोविदुःकुक्कुटीसू
करीब्राह्मणीवृषलीनाडायनीचारायणीकठीबह्वृची॥ ३४ ॥

ह्मणीवृषलीत्यसर्वलिंगायाःतत्रब्राह्मणीतिरूपेदाहरणंशार्ङ्गरवादिषुपाठात्वृषलीत्येतदेवङीषुदाहरणंनाडायनीचारायणी
तिगोत्रलक्षणायाःनडादिफःफक्अपत्यमात्रस्यग्रहणादनंतरापत्येपिभवतिअवंतीकुंतीतिइतोमनुष्यजातेरितिङीषुभवतिइहतुकुल ३४०
स्यापत्यंकुल्लीनास्माद्ब्राह्मणीतिङीषुनभवत्यजादिषुदर्शनात्दित्याङ्कःकठीतिकठेनप्रोक्तंवैशंपायनांतेवासित्वात्णिनिःतस्यकठचरकाल्लुगि ३५
तिलुकततस्तदधीतइत्यणतस्यप्रोक्ताल्लुक्तिलुक्बह्वृचीतिबह्व्योऋचोस्याइतिबहुव्रीहिःबह्वृचश्चरणाख्यायामितिअकारःसमासांतःकथं
पुनःस्त्रीजातमधीतेमानामाक्षिणीष्टतदध्ययत्वात्तुताच्छब्द्यंभविष्यति यथानधीयानेमाणवके॥ ३४ ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अत्रापरं जातिलक्षणमुक्तं भाष्ये प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः। असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुरिति सत्त्वस्य प्रादुर्भावविनाशाभ्यां या आविर्भावतिरोभावौ प्राप्नोति यावद्द्रव्यभाविनीत्यर्थः। गुणैश्च युगपद्द्रव्येण संबध्यते यथा निर्गुणं द्रव्यं न भवति तथा जातिरहितमपीत्यर्थः। बह्वर्थामिति अर्थशब्दो विषयवाची बहुविषयां बहुव्यक्तिव्यापिनीमित्यर्थः। असर्वलिङ्गामिति पूर्ववल्लक्षणान्तरं तत्र यथा पूर्वलक्षणं तथा कुमारी भार्येति भवितव्यं कौमारस्य यावद्द्रव्यभामपि आकृतिग्रहणात्वाद्भवति जातिः ततश्च जातेश्चेति पुंवद्भावप्रतिषेधः एतद्रूपस्य विरोधे च जातिलक्षणेन ङीष् प्राप्नोति यथा पुनरुत्तरं तथा कौमारादिके जातिर्न भवति अयावद्द्रव्यभावित्वात् तत्र पूर्वकं लक्षणं भाष्यकारस्याभिमतं नोत्तरम् अपरमाहेत्यभिधानात् तथा च भाष्यसूत्रे प्रवर्तितरेत्यत्र तसिलादिष्विति प्राप्तस्य पुंवद्भावस्य जातेश्चेति निषेधमाश्रितः अत एव वृत्तिकारेणाप्येतदेव लक्षणमुपन्यस्तमिति केचिदाहुः एवमपि पुंवज्जातिरित्र पुंवद्भावो न प्राप्नोति स्मात् द्वितीयमेव लक्षणं साधीय इति मन्यामहे अत एव वृद्धा

जातेरिति किं मुण्डा। अस्त्रीविषयादिति किं मक्षिका बलाका। अयोपधादिति किं क्षत्रिया। योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः हयी गवयी मुकयी मत्सी मनुषी॥ ॥छ॥ ॥

स्य विरोध इति जातिलक्षणेन ङीष् भवति युवतिरित्यत्र तु भाष्यकारप्रयोगात्पुंवद्भावाभावः मुण्डेति गुणशब्दोऽयं मक्षिकेति स्त्रियामेवायं नियतः इहकस्मान्न भवति मालाबेलाकेति मालाशब्दो मलनं माल इति घञन्तः पुंल्लिङ्गः क्षेत्रविशेषे नपुंसकः स्रजि स्त्रीलिङ्गः बलाकाशब्दो हि बलं कायतीति यौगिकः सर्वलिङ्गः एकजातिवचनः स्त्रीलिङ्गः नात्र यथा कथंचित् स्त्रीलिङ्गत्वं विवक्षितं किं तर्हि यस्मिन्प्रवृत्तिनिमित्ते स्त्रीलिङ्गस्तस्मिन्नेव निमित्ते पुंल्लिङ्गान्तरेऽपि वर्तते तद्दृष्टाविषयं यथा पुनरयं शब्दार्थस्तथा स्त्रियाः पुंवदित्यत्र वक्ष्यामः तेन निमित्तभेदेन नानालिङ्गेषु नायं विधिर्भवति यथा वं द्रोणी कुटी पात्रीत्यत्र न प्राप्नोति द्रोणशब्दः प्रमाणविशेषे पुंल्लिङ्गः गवादन्यां तु स्त्रीलिङ्गः कुटशब्दो घटे पुंल्लिङ्गो गेहे तु स्त्रीलिङ्गः पात्रशब्दो भाजनसामान्ये अर्धर्चादित्वादुभयलिङ्गः भाजनविशेषे स्त्रीलिङ्गः गौरादिपाठात्सिद्धं हयगवयेत्यादि गौरादिष्विदानीं तेन हयादयः प्रक्षिप्ता

इति वार्त्तिककारवचनाद्विज्ञायते॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ द॰ ४

३६

॥पाक॥ ॥स्त्रीविषयत्वादेतेषामिति। पूर्वत्र समानाधिकरणोपपदस्त्रीविषयमित्यप्रतिपत्तौ निमित्तमेतेन नानालिङ्गानामेषां नामिष्यतीति भावः। ओदनपाकादयः संज्ञाशब्दा यथा कथंचिद्व्युत्पाद्याः॥ ॥इतो मनुष्य॥ ॥अवन्तीकुन्तीति अवन्तिकुन्तिशब्दाभ्यामपत्ये ऽर्थे वृद्धेत्कोसलाजादाञ्ञ्यङ्, तस्य स्त्रियामवन्तिकुन्तिकुरुभ्यश्चेति लुक्। दाक्षी प्लाक्षीत्यत्र इञ्। विट्टदरदिति विट्शब्दाज्जनपदशब्दात्क्षत्रियादञ्, दरच्छब्दा

॥पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च॥ ॥पाकाद्युत्तरपदाज्जातिवाचिनः प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो भवति। स्त्रीविषयत्वादेषां पूर्वेणाप्राप्तः प्रत्ययो विधीयते। ओदनपाकी शङ्कुकर्णी शालपर्णी शङ्खपुष्पी दासीफली दर्भमूली गोवाली। पुष्पफलमूलोत्तरपदान्नञ्पूर्वान्नेष्यते तदन्ताद्विधिप्रसक्तेः। सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात्। सम्भस्त्राजिनशणपिण्डेभ्यः फलात्। मूलान्नञः इति॥ ॥इतो मनुष्यजातेः॥ ॥इकारान्तात्प्रातिपदिकान्मनुष्यजातिवाचिनः स्त्रियां ङीष् प्रत्ययो भवति। अवन्ती कुन्ती दाक्षी प्लाक्षी। इत इति किम्। विट्। दरत्। मनुष्यग्रहणं किम्। तित्तिरिः। जातेरित्येव। तस्मिन्नेव नाम्नि जातिग्रहणं योपधादपि यथा स्यात्। औदमेयी। इञ उपसंख्यानमजात्यर्थम्। सौतङ्गमी मौनिचित्ती। सुतङ्गमादिभ्यश्चातुरर्थिक इञ्। नेयं जा

तिः। यञश्च। कौसलादिनाञ्ञ्यङ्, तयोरवन्त्यादिभ्यश्चेति लुक्। उदाहरणमिष्यर्थमेव। तत्र तस्यानुवृत्तिर्नशक्यते आश्रयितुम्। तत्रापि प्रसङ्गः। औदमेयीति उदकं मेयमस्य उदमेयः। उदकस्योदः संज्ञायामिति उदभावः। तस्यापत्यमत इञ्। सौतङ्गमी मौनिचित्तीति सुतङ्गममुनिचित्तशब्दाभ्यां तेन निर्वृत्तमि

त्यत्रार्थे इञ्प्रत्ययः॥ ३५ ॥ ॥छ॥ ॥

एस॰

३६

॥ऊङुतः॥ ॥कुरूरितिकुरुनादिभ्यो ण्यः तस्य स्त्रियामवंतीसादिना लुक् ब्रह्मबंधूर्ज्जीवबंधूरिति न ह्याध्याय हीनापांक्रान्त्या ज्ञानावेतो बहु
व्रीहीवर्त्ततेऊ कारकृत्वा दिनोधात्वोरित्युऊ प्रतिषेधायवगवश्वेत्रप्युदाहरणो हल् पूर्वीरितिप्रत्ययविभक्त्युदात्तस्य निषेधः स्यात्त्वे
र्णग्रहणोऽसार्थवग्रहणपरिभाषानेयातिष्ठते अथदीर्घोच्चारणं किमर्थमऊङु तइत्येवो च्येत सवर्णदीर्घत्वेनसिद्धं नसिध्यतिमसपिसवर्णदीर्घ
त्वेगोस्त्रियोरुपसर्जनस्येतिह्रस्वत्वं प्राप्नोतिनप्राप्नोतिकिंकारणं उभयतआश्रयणेनांतादिवत्तथाहिएकादेशस्यांतवत्त्वेनप्रातिपदिके
संज्ञासंपाद्याअप्रत्ययइतिनिषेधात् आदिवत्त्वेनचस्त्रीप्रत्ययत्वंसंपाद्यंरहतहिब्रह्मबंधूच्छत्रंब्रह्मबंधुच्छत्रंचत्वंतुकोरसिद्धत्वात्ह्रस्वत्वं

॥ऊङुतः॥ ॥मनुष्यजातेरितिवर्त्ततेउकारांतान्मनुष्यजातिवाचिनः प्रातिपदिकात्स्त्रियामूङ्प्र
त्ययोभवति॰ कुरूः ब्रह्मबंधूः वीरबंधूः जीवबंधूः ऊ॰ कारोनोङ् धात्वोरितिविशेषणार्थः दीर्घोच्चारणं
रूपबोधनार्थं अयोपधादित्येतस्त्रापेक्षतेऽध्वर्युब्राह्मणी॰ ॥ ॥श्री॥ ॥७॥ ॥

स्यणोनित्यत्वस्तुकप्रसंगेतदीर्घोच्चारणात्त्वेकादेशस्यासिद्धत्वेपिदीर्घएवायमितिदीर्घत्वसदंतादितिविकल्पःसिध्यतिएतदपिनास्तिप्रयोज
नंपदांतपदाद्योरेकादेशोसिद्धः नचेषपदांतपदाद्योरेकादेशः तस्मात्तत्र्थकंदीर्घोच्चारणमित्याशंक्याहदीर्घोच्चारणंरूपबोधनार्थमिति
शेषाद्विभाषेतिकपोवकाशःअयवकःउङोवकाशः कुरूरितिब्रह्मबंधादेर्वऊङ्ङीहेउभयप्रसंगेपरत्वात्कप्प्राप्नोतिदीर्घोच्चारणान्नभवतिक
थंउकारद्वपंदीर्घेणनिर्दिष्टंतत्राह तीपउकारः रूपोबोधनार्थःअध्वर्युरितिअध्वरंयातीतिमृगयादपश्चेत्युणादिषुदर्शनात्कुप्रत्ययोध्वरश
ब्दस्यांतलोपश्चचरणलक्षणोयंजातिःअध्वर्युशाखाध्यायिनिवृत्तोभवेत्यर्थः॥ ॥७॥ ॥७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ ४

३७

अप्राणिजातेश्चेति। अत्रोत इति नापेक्ष्यते तेनालाबूकर्कन्धूशब्दाभ्यां दीर्घान्ताभ्यामपि भवति। कृषिचमितनिधनिसर्जिखर्जिभ्य ऊरिति वर्त्तमा
नेणिल्कशिपघेत्नेरिसतोणिरिति च नजिलम्बेर्नलोपश्च लं चेति अवृहंमनेतस्मान्नञ्पूर्वाद्रूप्रत्ययो भवति नलोपश्चाणित्वाद्वृद्धिः अंहृतं हूककर्क
धूरिति निपातनाद्धकारान्तः कर्कन्धूशब्दः एवमलाबूकर्कन्धूशब्दौ दीर्घान्तौ ऊङ्विधानं अलाबूकर्कन्धूभ्यां रसारोनोङ्गलोरिति विभक्त्युदात्त
त्वप्रतिषेधार्थं कृकवाकुरिति कृके वचः कश्च कृकशब्द उपपदे वचेर्धातोरुण्प्रत्ययो भवति ककारश्चान्तादेशः रज्जुरिति सृजेरसुम्च आदिलो
पः प्रकृतः सृजेरुप्रत्ययः आदेश्च लोपः असुमागमश्चेत नोपरत्नादेशः सकारस्य जश्त्वचुत्वे रज्ज्वनेन सो रज्जुः हनुरिति शृस्वृस्निहित्यादि

अप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यम्। अलाबूः। कर्कन्धूः। अप्राणिग्रहणं किम्। कृकवाकुः। अरज्ज्वादीनामिति किम्। रज्जुः। हनुः॥ ॥बाह्वन्तात्संज्ञायाम्॥ ॥बाह्वन्तात्प्रातिपदिकात्संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति। भद्रबाहूः। जालबाहूः। संज्ञायामिति किम्। वृत्तौ बाहू अस्याः वृत्तबाहुः॥ ॥पङ्गोश्च॥ ॥पङ्गुशब्दात्स्त्रियामूङ् प्रत्ययो भवति। पङ्गूः। श्वशुरस्योकाराकारलोपश्च वक्तव्यः। श्वश्रूः॥ ॥ऊरूत्तरपदादौपम्ये॥ ॥ऊरूत्तरपदात्प्रातिपदिकादौपम्ये गम्यमाने स्त्रियामूङ् प्रत्ययो भवति। कदलीस्तम्भोरूः। नागनासोरूः। करभोरूः। औपम्य इति किम्। वृत्तोरूः स्त्री ३६॥

नोहृतेरूप्रत्ययः॥ पङ्गोश्च॥ ॥श्वशुरस्येति पुंयोगलक्षणस्य ङीषोऽपवादत्वादूङ् विधीयते शावशेरातो श्वशुरशब्दे अश्नोतेरुरन्प्रत्ययो भव एम॰
ति किमिदं श्वशुरेति आशुशब्दस्य पादिलोपो निपात्यते। आशु श्वसः श्वशुरः तस्य स्त्री श्वश्रूः श्वशुरः श्वश्र्वेत्यादि निपातनोऽदिभक्तादि प्रातिपदिकका ३७
र्यं भवति॥ ॥ऊरूत्तर॥ ॥उपमीयते नयेत्युपमानं तद्भाव औपम्यं। कथं वि च करो च करेणुकरोरुमिति निरङ्कुशाः कवयः करेणावरोरूमिति

पाठः। करेणाविव करेवरोरूमिथिति॥ ३६॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥संहिता॥ ॥संहितशब्दः सहितशब्दः सहितपर्यायः लक्षणशब्दः आघ च प्रत्ययांतः वामशब्दः शोभनपर्यायः सहितसहाभ्यां चे
ति॰ समो वा हितततयोरिति मलोपे सति॰ संहितशब्दस्तस्य संहितग्रहणे नैव सिद्धं एकदेशविकृतस्यानन्यत्वात् यस्तु सह हिते न वर्त्तत इति युक्त
नः संहितशब्दस्तस्येदं ग्रहणमिमाङ् ॥ सहोरुरिति । सहे ते इति सहो तादृशाव्रूरुरस्याः इत्यर्थः विद्यमानवचनस्य वा सहशब्दस्य तु वर्तिशयप्रति
पादनाय प्रयोगः॥ ॥कद्रु॥ ॥उ गुल्लादीनां छंदसि अस्य येन स्त्री लेपतपालुशब्दः सहित सहा ततिगा कालुजंतः॥ ॥शार्ङ्गरव॥ ॥एते

॥संहितशफलक्ष्मणवामादेश्च॥ ॥संहितशफलक्षणवामादेरेवमादेः प्रातिपदिकादूरूत्तरपदात् स्त्रियामूङ् प्रत्ययो भव
ति अनौपम्यार्थ आरंभः संहितोरूः शफोरूः लक्षणोरूः वामोरूः सहितसहाभ्यां चेति वक्तव्यं सहितोरूः सहोरूः॥ ॥कद्रु
कमंडल्वोश्छंदसि॥ ॥कद्रुशब्दात् कमंडलुशब्दाच्च छंदसि विषये स्त्रियामूङ् प्रत्ययो भवति कद्रूश्च वै सुपर्णी च मा स्म क
मंडलूं शूद्राय दद्यात् छंदसीति किं कद्रुः कमंडलुः गुग्गुलु मधु जतुपतयालूनामिति वक्तव्यं गुग्गुलूः मधूः जतूः पतया
लूः॥ ॥संज्ञायां॥ ॥कद्रुकमंडल्वोः शब्दाभ्यां संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति अछंदोर्थ वचनं कद्रूः कमंडलूः
संज्ञायामिति किं॥ कद्रुः कमंडलुः॥ ॥शार्ङ्गरवाद्यञो ङीन्॥ ॥शार्ङ्गरवादिभ्योञंतेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन्प्र
त्ययो भवति॰ शार्ङ्गरवी कापटवी॰ अञंतेभ्यः वैदी और्वी॰ जातिग्रहणं चेहानुवर्त्तते तेन जातिलक्षणो ङीषनेन बाध्यते तेन
पुंयोगलक्षणः वैदस्य स्त्री वैदी॰ शार्ङ्गरव कापटव गौगुलव ब्राह्मण एते अणंताः कामंडलेय ब्राह्मकृतेय आनिचे
य आनिधेय आशोकेय एते ढगंताः वात्स्यायन मौंजायन इत्येतौ फगंतौ जातिः कैकसेय ढगंतः काव्य शैव्य एङ

गंता इति॥ अंगारु कपद गुग्गुलु ब्रह्मविशसे तेभ्यः प्राग्दीव्यतोण् गोत्रमण् शाखायण गौरादिष्वपपंपठितः एते ढगंता इति बाहुल्यादेव पुत्रात् क
मंडलुशब्दाच्च तुभ्यं घो ढक् इतरेभ्यस्तु शुभ्रादिलक्षणो ढक् एतौ फगंतौ वितिवात्स्यशब्दात् गर्गादि यञंताच्च यूनि यञिञोश्चेति फक् न तु वनात्स्त्रियां
युवसंज्ञा गोत्राद्यूनस्त्रियामिति वचनात् गोत्रे चेत् कौ गोत्र इति नियमः एवं तर्हि वात्स्यायन शब्दस्य कित्वानाये भवति त्वसामर्थ्यात् स्त्रियां युव संज्ञाभ
विष्यति गोत्र एव वा प्रत्ययः पद्यं॥ मुंजशब्दो नडादिः जातिरिति गोत्रलक्षणाद् ढगंत इति कीकसे शब्दः शुभ्रादिः ढक् तावितिशब्दो लोहमकाव्य

दाक्षड्. तिकगिरिशिरिभ्यांस्वड् पड् प्रसावत्रप्राप्नोति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ ४ एहिपर्येहीतिर्ईहिचेष्टायां आङ् पूर्वात् सर्यथेः पूर्वाच्च सर्वधातुभ्य इतीन् प्रत्ययः अश्मरथश्शास्त्रोगाङ्गोदिः उदपानशब्दः शुंडिकादिः उत्सादिश्चतत्र
३८ शुंडिकाद्यणंतः प्रयोजयतीति अत्र तेतुङी योङीनो वा नास्ति द्विविधः जातिरिति आलंचशालयोरसर्वलिंगत्वाज्जातित्वं वतंडशब्दस्य गोत्रत्वा
त्वतंडस्यापत्यं स्त्री वतंडाच्चेतियञ् कृत् स्त्रियामिति तस्य लुक भोगवद्गौरिमतोरितिमत्वेतत्वाद् उगितश्चेति ङीपि प्राप्ते वचनं अनुभोगाशब्दो वजंतः गौ
रिशब्दोत इजिति इजंतः तो जित्त्वे रेगाघुदात्तो ताभ्यामनुमपि त्वादनुदात्तः ततश्च नश्च न ङीम ङीनोरत्रास्ति विशेषः तत्राह बादिषु नित्यमि

एहिपर्येहीक्वस्किमंतोऽग्राश्मरथ्योयत्रंतः क्रोरपानः शुंडिकाद्यणंतः प्रयो
जयति॥ आलंचशालवतंडाज्जातिः भोगवद्गौरिमतोः संज्ञायां बादिषु नित्यं
द्वसार्थे॥ ॥३७॥ ॥श्रीः॥ ॥श्री॥ ॥श्री॥ ॥

ति॰ उगिल्लक्षणो ङीपि प्राप्ते तिनद्याः शेषस्यान्यतरस्यां उगितश्चेति विकल्पेन ङस्सत्वं स्यात ङीनि तु सति तच्च न प्रकल्पेति निलंभवति॰ कथंभव राम॰
तिपावत्वात् उगितः परायानदी तस्याविकल्पो विहितः ङीनपि चो गितः परानदी भोगवद्गौरिमतो हगित्वात्। नैष दोषः उगितश्चेति इत्यर्थेयं ३८
च शब्दः उगितः इत्येव मुगित्वं शब्देनेनयानदी विहिता न चाने न विहितो ङीनेवं विहिता नदी भवति यथानुयुक्तो रत्नाकारविस्तत्र भाष्यं तथो
गितः परायानदी सेत देवाप्येतं। संज्ञाया अन्यत्र ङी बेवम पतिङ्गस्तस्य विकल्पितः॥ ३७ ॥ ॥छ॥ ॥छ॥ ॥
लि

© Dhármartha Trust J&K. Digitized by eGangotri

-नृनरयोर्हृद्धिश्चेति नृशब्दात् नरशब्दाच्च ङीषि नरशब्दाज्जातिलक्षणो ङीषि प्राप्तेवचनं हृद्धिश्चेति वक्ष्यतीति च अनन्तरस्य ग्रहणेपि नारीती ष्टं सि
द्धम् यतरस्यानिष्टमिह स्यर्थेनुद्धयो रूपादानं तत्र नरशब्दे अंतस्य हे द्वेम सांप्रेति लोपणदानर्थकामेतिपस्येति लोपस्तावद्भवति तत्र हृ तो फस्य
हृद्धिः प्राप्नोति का अविशेषात्पर्यायेण सर्वेर्विने षदोषः स्थानेन्तरतमस्य प्रत्ये तरतमेस्थानेष ष्टीत्यपिपक्षो आप्यातः ततो नृनरयोरितियेषा षष्ठी
सा वृद्धेरंतरतमेन नरावपवेस्थानि मनुसंद्धिपते पत्रच षष्ठी तत्रादेश इति अकारस्य वृभविष्यति अत्र पुत्रशब्दं केचित्सदंतिन सकेवलः स्त्रिया
कर्तिति इति तदंतस्य समासस्य ग्रहणं तत्रापि बहुपुत्रा अतिपुत्रे सा दावनुपसर्जनाधिकारान्न भवति कृतार्हि भवति पुत्र प्रधानेननु पुत्रप्रधाने

नृनरयोर्हृद्धिश्च अत्र यथायोगं ङीबादिषु प्राप्तेषु ङीब्विधीयते॥ ॥पडः श्वाप्॥ ॥पडंता
त्प्रातिपदिकात्स्त्रियां चाप्प्रत्ययो भवति ष्पडः ष्पडः अवसामासग्रहणमेतत् औपबध्यासो
दीर्घकौमल्याष्पडः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥छ॥ ॥

समासेसेव पुल्लिंगतासत्संस्तत्तो अराजभोजमेरुभ्यो दुहितुः पुत्रड्वेति वार्तिककारेणापत्र पुत्रडादेशो विहितः तामुदाहरणानि सूतपुत्री राजपु
त्रीति अत्र स्वमातु पुत्रशब्दो दुहितृशब्दे समानार्थेन पुत्रगादेश इति पठतामभिप्रायः अन्येतु प्रयोत पुत्री शैलपुत्रीति वार्तिकविषयास्म दे
वदीनस्याद्भस्याणां पुत्रडादेशस्तु ङीप्त्वत्यर्थे इति ममन्तेनात्राप्रभाषितमस्ति॥ ॥यङश्चाप्॥ ॥यकारोन्ताप्प्रातिपदिकादस्त्र सामान्य
ग्रहणार्थः स्वरस्तु परत्वाच्चित्स्वर एव भवति ष्पडः ष्पडः असामान्यग्रहणमितियथपिष्पडः स्त्रियामेव विधीयते तथापि ङि करणसामर्थ्या
त्तस्याप्यत्र ग्रहणमितिभावः आंबष्ठ्योसादिआंगष्ठादिष्वोपस्येह द्वेलोकोसला ज्ञादाउपडः॥ ॥छ॥ ॥छ॥ ॥छ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कारीषगंधेतिसुत्रादिसूत्रेकृत्यादितं वराहशाब्दादतउज शार्कराक्षपुत्रिमाषगोकक्षशाङ्गगार्ग्यः ननुगोकाक्षशब्दः क्रौड्यादिषुपठ्यतेततः
ष्याङ् प॰ उ॰ इत्येववा प्रसिद्धः मायाठितत्रयाद्व इजइत्यनेनैव शाकाराक्ष्यादिवत गोकाक्षेति सिद्धयथेवं गौकाक्षीपुत्रः ष्यङः संप्रसारणेनप्राप्नो
तिनात्रसंप्रसारणमिष्यतेगोकाक्ष्यापुत्रइत्येवभवतिएवं हिसोनागाः पठंतिष्यङः संप्रसारणेगोकाक्ष्यायाः प्रतिषेधः॥ ॥तद्धिताः॥ ॥
युवतिरिति तद्धितसंज्ञायांसत्यांकृत्तद्धितसमासाश्चेतिप्रातिपदिकसंज्ञाभवतिबहुवचनमित्यादिप्रत्ययइत्यादिवदेकवचनमेवकर्तव्यं

कारीषगंधाबाराह्याबालाक्याः षाङ्मयजः षात्सरोपीपज तदंता न्वाप्रवकृत्याः शार्कराक्षायोतिमाष्या
गोकाक्ष्याः न्त्र्यस्त्रेचकारेणनुकृष्टमपत्यार्थतेनवामविष्यति॥ ॥आवट्याश्च॥ ॥आवट्यशब्दोगर्गादिः त
स्माद्यञि कृतेङीपि प्राप्तेवचनमेतत आवट्याच्चस्त्रियांचाप्प्रत्ययोभवति आवट्या प्राचांतुष्फएवसर्वत्र
ग्रहणादावट्यायनी॥ ॥तद्धिताः॥ ॥अधिकारोयंआपंचमाध्यायपरिसमाप्तेर्यानितऊर्ध्वमनुक्रमि
ष्यामस्तद्धितसंज्ञास्तेवेदितव्याः वक्ष्यतियूनस्तिः युवतिः बहुवचनमनुकृतद्धितपरिग्रहार्थं शथिमा
जानौ अग्रपश्चाड्डिमजिरेवृमादित्वंभवति तद्धितप्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः॥ ॥
यूनस्तिः॥ ॥युवनशब्दात्प्रातिपदिकात्स्त्रियांतिप्रत्ययोभवतिसचतद्धितसंज्ञः ङीपोपवादः युवतिः॥

बहुवचनेनसंज्ञिनांबहुत्वसूचनादनुक्तोपितद्धितः परिगृह्यतइतिमन्यते स्त्रीप्रत्ययानामादितस्तद्धिताधिकारेक्रियमाणेप्राचांष्फत
द्धितइत्यत्रतद्धितग्रहणंनकर्तव्यंयस्येतिचेत्यत्रचैकारग्रहणं ष्याप्प्रातिपदिकादित्यत्रतुतदंतात्तद्धितविधानार्थंस्यात् ग्रहणंकर्तव्य
मेवसत्यं ङीबादीनांङ॰ कास्येत्संज्ञानस्यात् अतङ्तइतिप्रतिषेधात्सत्यामपिवायद्वीसारावोर्गुणाः स्यात्तस्माद्यथान्यासमेवास्तु॥ ॥
यूनः॥ ॥युवतिरितिसतांदितोमनुष्यजातेरितिङीष्प्रभवतिप्रत्ययेनैवस्त्रीत्वस्योक्तत्वात्यौवनस्यवा जातित्वात्॥ ॥३८॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ऋणिञोः॥ ॥इह संभवे व्यभिचारे च सति विशेषणं विशेषणविशेष्यभावो भवति तेन न गोत्रे अनार्षे योरिति च ऋणिञ्मात्रस्य विशेषणं गुरूपो
त्तमयोरिति तत्तदंतस्य तदाह गोत्रे यावणिञौ विहितावनार्षाविति दंतयोरिति यद्यपि प्रत्ययाधिकारादस्यत्र लौकिकस्य गोत्रस्य ग्रहणं तथाप्यत्र पारि
भाषिकस्य ग्रहणं लौकिकग्रहणात् स्यानार्षयोरिति पर्युदासाश्रयणेनैव सिद्धत्वात् इहाप्यङ् प्रसंगो गार्ग्यादेशो वा प्रत्ययविधावपि ग्रहणं पोष्ट
गोत्रादीषु स्त्रीदर्शनात् उत्तरत्र क्रौड्यादिभ्यश्चेति पंचमीनिर्देशाच्च प्रत्ययपक्षोपि संभवत्येव तत्राघेपक्षे उदमेघस्यापत्यं स्त्री अत इञ् औदमेघि
रिति स्थिते तदंतो तस्य ष्यङ् विहिते औदमेघ्या याः छात्राः औदमेघाः छात्राः औदमेध्यानां संघः औदमेघः संघः इत्यत्र संघांकलक्षणेति चेञ्
ताद्धितीयमानो ण्यङ् नादपि स्यात् एवमप्यापत्यस्य च तद्धिते नातीति
यल्लोपेन स्यात् ष्यङो नापत्यत्वात् नैष दोषः भस्याढे तद्धिते इति पुंवद्भावात् गोत्रा उत्पन्नेः ष्यङ् वर्त्तिते तस्मिन्निवृत्ते इञ् इत्यस्य भविष्यतीति यका
रस्य चश्रवणं न भविष्यति इहते घोदमेध्या याः अपत्यं स्त्री ष्योढक् औदमेयेय इति यलोपेन स्यात् पुंवद्भावः स्यान्नास्ति अट इति प्रतिषेधादितीयमा

॥ऋणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे॥ ॥गोत्रे यावणिञौ विहितावनार्षौ
तदंतयोः प्रातिपदिकयोर्गुरूपोत्तमयोः स्त्रियां ष्यङादेशो भवति॥ ॥छ॥ ॥

घेपक्षे दोषं दर्शयति द्वितीयपक्षमाश्रित्याह ष्यङादेशो भवतीति ननु स्मिन्पक्षे उडुलोम्नोपत्यं स्त्री बाह्वादिषु लोमंनुड्वपपाठात्केवलस्यापत्येनपोगा
भावात्ता मध्यन्त्रिरंतस्य ग्रहणादिति तस्य ष्यङादेशे सति येचाभावकर्मणोरिति प्रकृतिभावान्नस्तद्धिते इति टिलोपो न स्यात् ततश्चौडुलोमत्येति स्या
दौडुलोम्येति चेष्यते प्रत्ययपक्षे तु इञामवधानान्नास्ति प्रकृतिभावः यस्येति लोपे पित्कृते स्यान्निवङ्गावाच्च व्यवधानमेव नैष दोषः नात्राह्लने टि
लोपे ष्यङ् प्राप्नोति किं कारणं गुरूपोत्तमत्वात् तस्मादिञ्येव टिलोपः ततो गुरूपोत्तमत्वं ततः ष्यङ् सानुपूर्व्यास्ति दृष्टं अपत हि दोषः प्रसंग्रहः
णपरिभाषया ऋणिञंतयोर्ग्रहणात्तयोर्विधीयमानः ष्यङ् अनेकाल्त्वात् सर्वादेशः प्राप्नोति ङिच्चेत्संस्यस्य भविष्यतीति तातङ् न्यायेन सर्वादेशः प्राप्नोति
यत्र हि ङकारस्य प्रयोजनं तत्र स पित्संभाव्यते तत्र ङिच्चेत्येतदनन्यार्थं ङित्वं च गुणवृद्ध्यादिषु सावकाशं बाधित्वा अनेकाल्शित्सर्वस्येत्येतद्भवतीति यथा ना
नङ् इह च सर्वादेशत्वेपि यङ् श्वादिति विशेषणं प्रयोजनं संभवति तस्मात्सर्वादेशः प्राप्नोति तत्राह॥ ॥छ॥ ॥छ॥ ॥

का·प्र·द·४
५०

निर्दिश्यमानस्यादेशा इति षष्ठ्युत्तमशब्दो ऽप्युत्तमः स्यात्तदा उत्तरेणान्तमपि कृते किमेतन्निर्देशस्य पर्यादित्वम् प्राप्नोति नवा द्वयप्रकर्षत्वात् उच्चैः
र्गोहिंसहिंसाधनक्रियावचनः उत्तेर्वर्त्तितेतस्य क्रियाद्वारकः प्रकर्षः अतिशायने तमप्रत्ययेतितस्य द्रव्यनिष्ठत्वात् प्रकर्षस्याद्रव्यप्रकर्षइतिप्र
तिषेधो भविष्यति एवमपि तमपपिता दाद्युदात्तत्वप्रसंगः नवोर्ध्वादिषु पाठात् उच्चादिषु हि उत्तमशब्दस्त्रमीसर्वत्रेतिपठ्यते एवमपि सिता
वत्याठः कर्तृत्वः क्रियामात्रस्यैव प्रकर्षे उत्तमामित्याम प्रसंगश्च अतो न मिथानाद् उच्चैस्तमरो न त्रय तिरेधिनमाकिंचमुत्तमस्तउत्तमश

निर्दिश्यमानस्यादेशा भवन्तीति अणिञोरेव विज्ञायते न समुदायस्य। ङकारः सामान्यग्रहणाविघातार्थः। षकार
स्तद्धितविघातार्थः। पङ्क्त्या वितेति। उत्तमशब्दः समानाम्नि त्रिप्रभृतीनामन्त्यमाह उत्तमस्य समीपमुपोत्तमं गुरुरु
पोत्तमं यस्य तत् गुरूपोत्तमं प्रातिपदिकं। करीषस्येव गन्धोऽस्येति करीषगन्धिः कुमुदगन्धिः तस्यापत्यमित्यण् त
स्य ष्यङादेशः। कारीषगन्ध्या कौमुदगन्ध्या वाराहस्यापत्यं अत इञ् वाराहिः तस्य ष्यङादेशः वाराह्या बालाक्या।
अणिञोरिति किं आतभागस्यापत्यं विदादित्वादञ् आतभागी गुरूपोत्तमा इत्येकं सर्वमस्ति न त्वणिञौ स्त्रि
याञ्जितिङीवेव भवति॥ ३९ ॥ ॥४॥ ॥

इत्यत्र त्वप्राप्तेः तिषु वर्त्तते कथं ऊर्ध्वमुच्चारितउत्तमः सच प्रथमोच्चारितमपेक्ष्यते तत न त्रिषु द्वावुत्तमोतयोश्च द्वितीयो तिशये नोत्तमः द्वयोश्च संप्र एल·
धारणायां तरपा भाव्यं ततश्चपत्त्रोऽत्तमाएवतत्रयः तत्रैवस्यात् कारीषगन्ध्येत्यादौ तु न स्यात् तत्रैव द्वयोसत्वि पक्षेदोषं पश्यन् बहुत्वानिपक्षमाश्रि ५०
त्याह उत्तमशब्द इति स्वभावादिति न बहुत्वनिवर्शादिलवर्थः त्रिप्रभृतीनामिति वचनाद्दाक्षी प्लाक्षीत्यादौ न भवतीति द्वाराणां जितिङीवेव भवतीति
प्रातिमात्राभिप्रायेणेदमुक्तं अत्र हि जातित्वाच्छाङ्गरवाद्यञ इति ङीना भाव्यं ३९ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

वासिष्ठीति अध्यंधकेत्यादिना अण्। आहिच्छत्रीति जातादावर्थे अण् एवमत्रादेशापक्षः स्थापितः यद्येवं हस्तिशिरसोपत्यं बाह्वादिलादिञ् अविशीर्षशिति
शीर्षादेशः इञः ष्यङादेशः ततः स्थानिवद्भावेन शीर्षशब्दस्य शिरोग्रहणेन ग्रहणाद्येन तद्धितइति शीर्षन्नादेशः प्राप्नोति अस्तु न स्यादिति इति लो
पो मविष्यति पेचाभावकर्मणो रितिप्रकृतिभावः प्राप्नोति तस्य हाग्नि शीर्षण्ये तिस्यात् प्रत्यय पक्षे तिज्ञाप्यवहि तत्वान्ना स्ति शीर्षन्नादेशः यस्य
ति लोपे पिकृते स्थानिवद्भावाद्व्यवधानमेवतेन हुष्यति शीर्ष्णिति सिद्धानित स्मात्प्रत्यय पक्षे अण्यय णीयः तदेव धेचतद्धितइस्तत्रवामनो वसति।
यदि प्रत्ययः कथमो दमे द्वेयइति आपत्यादि हितः ष्यङ् सोप्यापत्य एव तत्र यलोपे सिद्धमिति जयाभेति जपादित्यस्तु भेने शीर्षादेशः संनिपातेन
ष्यङ् मतद्विघातंनकरिष्यतीतियद्येवं अजादिप्रत्ययनिबंधनः शीर्षादेशः कथंतन्मात्रादिं विहन्यात् ततः किं ष्यङादेशोपि न प्राप्नोति। अनित्यासन्नि

अनार्षयोरिति किं वासिष्ठी वैश्वामित्री। गुरूपोत्तमयोरिति किं औपगवी काप
टवी। गोत्र इति किं तत्र जाता आहिच्छत्री कान्यकुब्जी॥ ॥५०॥ ॥

पातपरिभाषा तेन ष्यङ् भवति शीर्षादेशस्तु न भविष्यति अयंयत्तद्यादेशपक्षे दोषः अनुबंधोकर्तव्यो यङ् स्यादिति सामान्यग्रहणार्थ विघातार्थो अस्य
न्यथा गार्ग्येशेष्यङ् द्विज्ञाणाजिसादिना ङीष्यात् इञादेशेत्विञ उपसंख्यानमिति ङीषुप्रसंगः नैषदोषः दिद्धाणञ्जित्यत्र तनिवर्तते तत्रचाराग
अकारो विशेष्यते अणो यो कार इति तत्र ष्यङादेशेन स्त्रियामिति स्थानिवद्भावाभावात् ङीप् न भविष्यति अणोंतादकारांतादितिहि विज्ञायमाने स्थाप्य
यम कारांतत्वे स्थानिवद्भावाददणांतत्वं चेति स्यात् ङीपः प्रसंगः इञ उपसंख्यानमित्यत्रापि इञो मनुष्यजाते रित्यत इत्यनुवर्तते इञ इकारः तदंता
दिति इञंतादिकारांतादितिगति ज्ञायमाने ष्यङादेशे सति वाएतस्य इकाराभावान् ङीषभावः एवमपि स्वरार्थश्चानुबंधः अस्मयार इञादेशः ष्य
ङ् स्थानिवद्भावेन जित इति पिपिलादित्युदात्त इति जित्स्वरेणाद्युदात्तं पदंस्यात् स्यादेतत् इञो जिकारस्येत्संज्ञायाः प्रागेवप्रातिपदिविधानात् ष्यङोदे
ङः करिष्यते तत्र जित्स्वराभावात् प्रत्ययस्वरेसति दाप्यपि सिद्धः स्वरस्ति। यथैवं तर्हि जित्स्वरो न भवति एवं वृद्धिरपि न स्यात् अतो जकारस्य स
स्यामेवेत्संज्ञायामादेशइत्याश्रयेयं तत अस्वरे दोषप्रसंगाच्चार्थमनुबंधो कर्त्तव्यमावेवप्रत्ययपक्षेतु सतिशिष्टं ष्यङः प्रत्ययस्वरेकृते न दंताद्यपि

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प्र॰४

४१

सिद्धमिष्टं न रूपभेदो न स्वरभेदः ननु च ष्यङो वस्त्रीत्वस्य घोतितत्वाट्टाप् स्यात् नैष दोषः यथा गार्ग्यायणीत्यादौ द्वाभ्यां स्त्रीत्वं घोत्यते तथात्रा
पि द्वयोरेव सामर्थ्यमिति टाबपि भविष्यति ष्यङः संप्रसारणमित्यत्र विशेषणार्थं तर्हि त्वया ष्यङ्नुबंधौ कर्त्तव्यौ इह मा भूत् शाशानो समूहः पाश्यापा
शाद्विभ्यो यः पाश्यायति ष्यङ्ती इति एवं तर्हि एको नुबंधः करिष्यते ककः एकः षकारो ङीषु प्रसंगः ङकारो यङः संप्रसारणमित्युच्यमाने लोलूयापुत्र इत्यत्रापि प्रा
प्नोति अप्रत्ययादित्यकारे अतो लोपे च सति अकारेणाम्व्यवहितत्वान्न भविष्यति वाराहीपुत्र इत्यत्रापि तर्हि यपाऽव्यवधानं। एकादेशस्य पूर्व
प्रत्यंतवत्त्वान्नास्ति व्यवधानं- ननु ष्यङः संप्रसारणमित्यत्र लिटि धातोरिति धातोर्धातुग्रहणमनुवर्त्तते आदेच उपदेशे शिति त्यात्वं धातोर्य
था स्यात् गोभ्यामित्यादौ मा भूदित्येवमर्थं तत्र यङः तस्य धातोः पुत्रपत्योरनंतरयोः संप्रसारणं भवतीत्युक्ते यो धातुर्लोलूयादिर्न सोऽनंतरः पश्चा
नंतरो वाराह्यादिर्न स धातुरुक्त धातुत्वानंतर्ययोरन्यतरस्य परित्यागेन भवत् संप्रसारणं यथा वाराहीपुत्र इत्यादौ असत्यपि धातुत्वे आनंतर्यमा
त्राश्रयणे न भवति तथा लोलूयापुत्र इत्यत्रासत्यप्यानंतर्ये धातुत्वाश्रयणेन स्यात्। अथ त्वया यः यङ् धातोर्न परस्तेरेण विशेषणं विशेष्याभावः
अपि तर्हि समुच्चयः पुत्रपत्योरनंतरस्य यङो धातोश्चेति तत्र वाराहीपुत्र इत्यादौ न भविष्यति न तु लोलूयापतिरित्यादौ धातोर्व्यवधानात् तत्र सामा
र्थ्याद्धातुग्रहणस्योत्तरार्थे वानुवृत्तिः संपद्यते इति पघे वां कुर्वाति इत्यत्र वच्छे संप्रसारणप्रसंगः एवं तर्हि धातोरिति निवर्त्तिष्यते आत्वं पुनर्ग
वदिः प्रातिपदिकस्य न भवति उपदेशाभावात् स्वरूपग्रहणे न प्रधानो निर्दिश उपदेशः गोभ्यां चः नौभ्यां च इत्यादौ तु कार्यित्वार्थमुच्चारणं न स्वरूपज्ञाप
नार्थं तदेवं प्रत्ययस्यैक एवानुबंधः कर्त्तव्यः अत्र संग्रहश्लोकाः। पूर्वं द्वावाघजादौ यलुगणापि पास्मिन् ष्याङ्‌ षोदस्मे घेस्वार्थे ष्यङ् न खलु रे
क्रमतरह भवेदौडुलोप्यापरस्मिन् ष्यङ् शीर्षी धीनलाभस्तदभिविहतये नप्रभुह्नीस्ति शीर्षी सर्वादेशोपि नानाङ्‌ इव न यङ् णिञोः स्थानिनोस्त्र
क्रिहेतोः १ स्त्रीकारव्याप्तपरस्मिन्निह सुलभतरस्तिष्ठेो विधेयो न वा ये ष्णादेशो ङीनिरस्तैत्वणाइज इति चेद्द्वौ विशेष्यौ न दोषः। जिताद्यादेरुदात्तः
प्रसजति सह जादेशने हृष्यभावः पाश्यापुत्रे निरस्तैषणारकरह षित्त्वे कके ङीषु ङ्येसु लोलूयापुत्र इत्यस्य व्यवहितत्वात्रापि दीर्घोतवत्स्याद्धा रामः
त्वानंतर्ययोगो विधिरिति सयथानंतरे धीतथानंतरे धीनथाधीः धात्वानंतर्ययोश्चेन्मिथ इह न हि ते पेक्षिता वाक्यतात्विकं धीनेत्याधिकि ४१
यात्वेघुपरिश्चिरितिगोत्रेति देवं समेकः॥ ॥३॥ ॥४०॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ गोत्रावयवात्॥ ॥ गोत्रशब्दोयमस्ति पारिभाषिकः अपत्यं पौत्रप्रभृति गोत्रमिति। अस्ति च लौकिकोपत्यमात्रवचनः अस्ति च प्रसिद्धः पू-
र्वजे शब्दस्ते अनेन स्वसंतानप्रभवा इति प्रधानभूत आदिपुरुषः स्वप्रभवस्यापत्यसंज्ञाकारी गोत्रमित्युच्यते यथा भरतो रघुर्यदुरिति अवय-
वशब्दोप्यस्ति एकदेशोपत्ये संबंधादवयवीति समुदाय उच्यते अस्ति च पृथग्भावे अवयवप्रसिद्ध्यनुवादः सारावयवपूर्वस्य पौत्रेः पृथग्भावे विदर्शिना-
त् अस्ति चाप्रधाने अवयवभूतोयमस्मिन्ग्राम इति तत्र पारिभाषिके गोत्रे एकदेशे चावयवे वचनमनर्थकमिदं स्यात् कथं पौत्रप्रभृत्यपत्य-
समुदायो गोत्रं तदवयवश्च तुर्यादि सत्यपि गोत्रमेव तद्वाचिनो णिञन्तात्पूर्वेणैव सिद्धः ष्यङ् अथ कस्मिंश्चिन्महागोत्रे यामवान्तरगोत्रा-

।गोत्रावयवात्॥ ॥ अणिञोरिति वर्तते। गोत्रावयवा गोत्राभिमताः कुलाख्याः पुणिकभुणिकमुखरप्र-
भृतयः ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशो भवति॥ अगुरूपोत्तमार्थ आरंभः। पौणिक्या।
भौणिक्या। मौखर्या। येषां त्वनन्तरापत्येपीष्यते ते क्रौड्यादिषु द्रष्टव्याः ४१ ॥

णि यथा भार्गवगोत्रस्य च्यवनादीनि ते गोत्रावयवाः तेष्वगुरूपोत्तमार्थोयमारंभः यद्येवं समर्षीणामगस्त्याष्टमानामृषीणां महागोत्राणि
प्रवराध्याये पठ्यंते तत्र व्यतिरिक्तेभ्यः सर्वेभ्यः ष्यङः प्रसंगः न चैतदिष्टं अगुरूपोत्तमेभ्यः पौणिकादिभ्य एवेष्यते एतदभाववचने त्ववयवशब्दे
गोत्राद्यप्रवाचिनो णिञन्तात् ष्यङ् विधीयमाने पूर्वसूत्रे गोत्रगोत्रग्रहणमनर्थकं। अथाप्रधानवचनोवयवशब्दः पारिभाषिकमेव
गोत्रं प्रवराध्याये पाठाच्चाप्राधान्यं ततोयमर्थः स्यात् ये णिञन्ता गोत्रापत्यवाचिनः प्रवराध्यायेन पठ्यंते तेभ्यः ष्यङिति तत्रान्यस्मिन्योगुरू-
पोत्तमेभ्यः पौणिकादिभ्यः आगुरूपोत्तमेभ्यस्तु संज्ञाकारिभ्य एवेष्यते पारिभाषिके च गोत्रे संज्ञाकारित्वविशेषो न लभ्यत इति॥ ॥

॥ ॥३ ३॥ ॥३ ३॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

इहापि प्रसज्येत तत्र यज्ञको नाम कश्चित् तस्य गोत्रं स्त्री अतस्तज्ञनो यज्ञकी अपत्यमात्रे तु गोत्रे यथैकदेशो ऽवयवः तथा ऽपत्यसमुदायस्य
पौत्रप्रभृत्यपत्यमवयव इति तद्वाचिनो ऽणिञन्तात् पूर्वेणैव सिद्धः पृथग्भावे त्वपत्यादन्यवाचिन आहिच्छत्रादेरेव प्रसङ्गः अप्रधाने त्वप्र
धानापत्यवाचिनो ऽणिञन्तादगुरूपोत्तमान्न सर्वत्रेष्यते किन्तु संज्ञाकारिभ्यः तत्रापि गोत्रे। मुख्ये गोत्रे एकदेशवचनो ऽवयवशब्दो
न संभवति न हि पिता पुत्रस्यैकदेशः स्वसंतानप्रभवत्वाद्यन्ते तदवयवा भूतापारादेर्गोत्रिगोत्रिणोः संभवः आद्यं गोत्रं च तत्स्वयवश्चेति कर्मधा
रयः तदा भार्गवादिगोत्रेषु ये ऽवान्तरैकदेशाः काशिक्यामनुकृतास्तेभ्यः प्रसङ्गः पृथग्भावे तु ये संज्ञाकारिभ्यः पृथग्भूतास्तु षष्ठ
कादयः तेभ्य एव स्यात् अत एवमेषु पक्षेषु दोषसंभवात् मुख्यो गोत्रशब्दः अप्रधानवचनो ऽवयवशब्दः कर्मधारयश्च समासः नि
पातनाद्विशेषणस्य परनिपातः प्रवराध्याये अपाठाच्चाप्राधान्यं तदेतदाह गोत्रावयवा गोत्राभिमता इति गोत्रमित्येवमभिम
ताः गोत्राभिधायिन इत्येवं लोके प्रसिद्धाः न पुनः प्रवराध्याये पठिता इत्यर्थः काः पुनस्ता इत्यत्राह कुलाख्या इति कुलमाख्याय
न्ते आभिरिति कुलाख्याः पुणिकादिभिर्हि कुलमाख्यायते पुणिकावयवं गोत्रमित्येव मा भूदिति तत इति यथोक्तविशेषणेभ्यो विशिष्टे
भ्यः कुलाख्याभ्यः अगुरूपोत्तमार्थ आरम्भ इति गुरूपोत्तमयोरिति निवृत्तं अन्यत्सर्वमनुवर्तत इति भावः पौणिक्येत्यादि पु
णिकभुणिकमुखर इत्येभ्यो यञ् तस्य ष्यङादेशः ते क्रौड्यादिषु द्रष्टव्या इति अरहत्कृतत्वात्तस्येति भावः ४१ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥क्रौड्यादिभ्यश्च॥ ॥ष्यङ् प्रत्ययो भवतीति क्रौड्यादिभ्य इति पंचमीनिर्देशात् अस्य यपक्षेप्यत्र दोषाभावाच्चैवमुक्तं अगुरूपोत्तमार्थ इमा
इति तत्र क्रौड्यादयः प्राक्कौपयत शब्दात् तदन्ता इञंताः चौपयत प्रभृतयः प्राक् सौधातकि शब्दात् गोत्ताः सौधातकि शब्दः सुयानुरकडु इति इञन्तः सूत
युवत्यामिति सूतशब्दः ष्यङ् सूत्रोदपाति पुत्रसाः प्राप्तयोवनायामभिधेयायां सूत्रा अन्यत्र क्रियाशब्दादेव भवति सूजा जातिवाचिनस्तु ङीषम्
वति सूजी भोजक्षत्रिय इति जातिलक्षणात्स्यङ् ङीषोपवादः भोज्या क्रियाशब्दात्तु यथैव भवति भोजयतीति भोजा जानतः परे इञन्ताः गौकक्षशब्दो
गर्गादि यञन्तः॥ ॥दैवयज्ञि॥ ॥दैवायज्ञापक्षमान्यस्य दैवयज्ञः पुनिर्देशो सात्यमुग्रि हक्षः सत्यमुग्रमस्य सात्यमुग्रः निपातनाद्वृद्धिशेषस्य

॥क्रौड्यादिभ्यश्च॥ ॥क्रौडीत्येवमादिभ्यश्च स्त्रियां ष्यङ् प्रत्ययो भवति अगुरूपोत्तमार्थ आरंभः अनणिञर्थश्च क्रौ
ड्या॥ क्रौडि लाडि व्याडि आपिशलि आपिक्षिति चौपयत चैटयत सैकयत वैल्वयत सौधातकि सूत युवत्यां भोजक्ष
त्रिये भौरिकि भौलकि शाल्मलि शालास्थलि कापिष्ठलि गौकक्ष्य॥ ॥दैवयज्ञि शौचिवृक्षि सात्यमुग्रि कांठेविद्धि मन्य
तरस्यां॥ ॥दैवयज्ञि शौचिवृक्षि सात्यमुग्रि कांठेविद्धि इत्येतेषामन्यतरस्यां ष्यङ् भवति इञंता एते गोत्रग्रहणं ना
नुवर्त्तते नोभयत्र विभाषेयं गोत्रे पूर्वेण नित्यं ष्यङादेशः प्राप्तो अकल्प्यते अगोत्रे त्वनंतरे पक्षे विधीयते तेन मुक्ते इतो
मनुष्यजातेरिति ङीषेव भवति दैवयज्ञ्या दैवयज्ञी शौचिवृक्ष्या शौचिवृक्षी सात्यमुग्र्या सात्यमुग्री कांठेविद्ध्या कांठेवि
द्धी॥ ॥समर्थानां प्रथमाद्वा॥ ॥त्रयमर्थाधिक्रियन्ते समर्थानामिति प्रथमादिति च वेति च स्वार्थिकप्रत्ययावधि
((कारः प्राग्दिशो विभक्तिरित्यावत्॥
इति निपातः सत्यमुग्रमस्य कांठेविद्धः कण्ठेविद्धमस्य कण्ठेविद्धः अमूर्द्धमस्तकात्स्वांगादकामे इत्यलुक् कांठेविद्धि
भाष्यसम्मेपठंति कांडेन विद्धः कर्तृकरणे कृता बहुलमिति समासः निपातनात् कांडशब्दस्यैकारः सर्वे इञंताः॥ ॥समर्थानां प्रथमाद्वा॥
॥प्रत्येकमत्र पदानीत्याहुः तं प्रति ज्ञापतेन समुदायस्यैकमिति सा हि त्रयमपीति। अत्र च प्रयोजनं केषांचिन्नावपरस्मैपदिनां भूरिति
एतद्देवस्य प्रत्ययाः समर्थानामिति चेति स्वार्थिकप्रत्ययावधि स्वार्थमिति स्वस्याः प्रकृतेरर्थे भवाः स्वार्थिकाः अध्यात्मादिः भाष्यकारप्रयो
गात् दूरादिकार्यभावः स्वशब्द स्वत्तुध्वरादि युवादि इति प्रसंगः तद्धितविधि हितत्र भवति आद्यन्विशेषणात् वाद्धारादीनां यथाहारपाल
सेदेहो गारणलमिति प्राग्दिशो विभक्तिरितिनवादित्तितत आरभ्य हि स्वार्थिकाः प्रत्ययाः विधीयन्ते किं पुनः कारणं स्वार्थिकेष्वेषु न प्रवर्तन्ते

का॰प॰४ स्वार्थिके घित्यादितत्र समर्थानामिति संबद्धार्थानां संसृष्टार्थानां चेत्यर्थः तत्र वाक्ये संबद्धार्थतामपेक्षा हि तत्र सामर्थ्यं ज्ञमपेक्षा आ
४३ कांक्षा अन्योन्यापेक्षा अपेक्षा अनया आकांक्षा संनिधियोग्यत्वेषु सत्सु यः संबंधः स लक्ष्यते द्वन्द्वे तु समस्तशार्थता एकार्थीभावो हि तत्र सा
मर्थ्ये द्वितीयौ सुप्सर्जनपदानि स्वार्थमुपसर्जनीकृत्य प्रधानार्थपराणि भवंति यथा गंगायां घोष इति गंगोपसर्जनं तीरमाह अथोपगव
इत्यत्रोपगुशब्दः स्वार्थोपसर्जनमपत्यमाह अत एव अत्र ह्रस्वोपगाव इति न ह्रस्व सुपां विशेषणानि भवति यत्र हि शब्दः पथि वस्यातितत्रे
व विशेषणासंबंधः पश्चिमाकाशवृत्तावपि स्वार्थ एव यथा पञ्च एते वृ देवं विशेषणासंबंधो भवेत प्रधानं ए दा मण्युपसर्जनं विशिष्टमेव स्वार्थं
ब्रुवते परिनिष्ठा वृत्तावपि प्रधानपदानि स्वार्थमेव ब्रुवीरन् ततो यथोपगोरपत्यं देवदत्तः कल्याणा श्लेषुभाभ्यामपत्यार्थस्य संबंधस्तथोप
गवः कल्याणा श्लेषम्यक्ते स्यात् न चैवमतो वाक्यशास्य संबंधस्याभावात् विशेषः स एकार्थीभावः नच स्वार्थिकेषु प्रकृत्यर्थादर्थान्तरं संभवति य

स्वार्थिके षु घ्यणोपयोगो नास्ति विकल्पो पि तत्रानवस्थितः केचित् समेव भवंति लक्षणा वाक्यानि तस्या पत्यं
तेन रक्तं तत्र भव इत्येवमादीनि भविष्यंति तेषु सामर्थ्ये सति प्रथमनिर्दिष्टादेव विकल्पेन प्रत्ययो भवतीति वेदित
व्यं ॥ ॥४१॥ ॥श्री॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

प्रत्यायनाय शब्दांतरं प्रयुज्येत येन सह समर्थता स्यात् एते न प्राथम्यं मा भूत् अतः प्रतिपाद्यपक्षयोः सामर्थ्यप्राथम्ययोरभावात् स्वा
र्थिकेषु नास्त्योपयोग इति सिद्धं विकल्पो पि तत्रानवस्थित इति। क्वचित् प्रवर्तते क्वचिन्न एव बाधकं स्यादित्यत्रैव सते। इह प्रथमादित्येतद्वि
शेषणं शाब्दवाक्यगतमाश्रीयते न विग्रहवाक्यगतं अनियतत्वात् वाक्ये हि प्रयोगो नियत इति सर्वेषां प्राथम्यसंभवात् कदाचिदपत्य राम॰
वद्रूपादिनोपत्ये प्रत्ययः स्यात् कदाचिदपत्यवाचिनस्तद्धुति अयं च प्रकारो सत्यपि प्रथमादित्यस्मिन् लभ्यत इत्यनर्थकं तस्मात् लक्षणवाक्य ४३
स्मिन् यत्प्रथमोच्चारितं तस्मिंस्तत एव पञ्चाशा स्वरमोच्चारिता का भूदित्येतत्प्रयोजनं शब्दं ननु नहि हि निवाक्यर्योः सहप्रयोगः त
न्नश्च वाक्यगते प्रथम्येमवस्थापके मतिरन्त्रैः प्रयोगो न नियत इति मर्थमेव प्रथमादिति विशेषणं स्यात् स्यात् तस्माच्छाब्दवाक्यगतमेव प्राथम्य
मवस्थापकमित्याह लक्षणवाक्यानीत्यादि ॥ ४२ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।समर्थानामितिनिर्धारणे षष्ठी। तत्र च निर्धारणस्य तुल्यजातीयविषयत्वात् प्रथमात् समर्थात् प्रत्ययो भवति तत्र समर्थात् प्रथमादिति वक्तव्ये समर्थानां
प्रथमादिति वचनं प्रधानपदस्याप्युपसर्जनपदेनैकार्थीभावप्रतिपादनार्थं अन्यथा वाक्ये बहुत्वाविशिष्टे प्रधानपदस्यानेनापि संबंधः शंक्येत यदि तर्हि
लक्षणवाक्ये प्रथमो ङ्यापि तात्प्रत्ययः एवं सति तस्यापत्यमित्यादौ सर्वनाम प्रथमनिर्दिष्टमिति तत एव प्रत्ययः स्यात् नोपग्वादेः नहि तल्लक्षणवाक्ये प्र
थमनिर्दिष्टमित्यत आह तस्येति सामान्यमित्यादि विशेषलक्षणं विशेषोपलक्षणमित्यर्थः तस्यापत्यमित्यादौ हि विशेषा एव निर्दिष्टा इष्टास्तेषां तु सर्वेषां
प्रत्येकमुपादाने गौरवं स्यात् एकस्योपादाने अनुपात्ताद्विशेषान्तराणामसाधुत्वादिः संरक्षितमित्यादाविति सर्वेषामुपलक्षणत्वेन तस्येत्यादिकमुपात्तं

समर्थानामिति निर्धारणे षष्ठी समर्थानां मध्ये प्रथमं प्रत्ययप्रकृतित्वेन निर्दिश्यते
तस्येति सामान्यं विशेषलक्षणार्थं तदीयं प्राथम्यं विशेषाणां विज्ञापयते उपगोरपत्य
मौपगवः समर्थानामिति किं कंबल उपगोः अपत्यं देवदत्तस्य॥ ॥४३॥ ॥

सोपग्वादेरिति ननु स्वयं कल्पितया नहि तस्येत्यस्य सामान्यवचनस्य प्रकरणाद्यभावेन विशेषेणैव व्याप्तिः तस्यायत्तं प्रति संबंधिविशेषप्रतिपादनेन संबंधो
नरवच्छेदात् उपकारः संभवति संबंधिसामान्यं त्वपत्याद्यर्थस्य संबंधिशब्दत्वादेवावगतं प्रतीयते तत्र साक्षात् प्रथमो ङ्यापि तस्य सामान्यवाचिनस्तस्मात्प्रत्य
यः यस्मात् प्रत्ययः नन्वत्र सूत्रे साक्षात् प्रथमो ङ्यापितमिति अगता उपलक्षणार्थं तत्प्राथम्यमुपलक्षणेन विज्ञापयेत तत्राह तदीयं प्राथम्यं विशेषाणां
विज्ञापयत इति कंबल उपगोरित्यादि यथा परस्परशब्दस्य पूर्वपदाभ्यां अपत्येष्वमभिसंबंधो भवति एवं समासोऽपि संभाव्यते इति भावः अत्र च समस्यमानेषु समर्थकस्मा
पि समुदायस्य तद्धितान्तत्वेन प्रातिपदिकसंज्ञायामेकत्वाद्यभावेऽपि अव्ययेभ्य इव स्वादयः स्युः ननु तस्यापत्यमित्यत्र प्रमाणासंबंधाद्ये तस्यायां विभ
क्तौ विधायकान्यायां नात्र प्रसंगः॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प८०४ नेतदेवं नहि लक्षणया कोविभक्त्यनुवृत्त्याख्यां संबंधप्रतिपादनार्थं सामान्यस्य संबंधासंभवात् किं तर्हि षष्ठ्यंतात्प्रत्ययविधानार्थं अथापि विशेषोपलक्ष
५५ णार्थं रोऽसंबंधः स्यात् एवमपि क्रमह्रस्वोपदेशोपपत्तिमित्यादौ सापेक्षत्वात् इ षिसादेवमसमर्थपरिभाषया तर्हि व्यवस्था भविष्यति सादेवं पद्येत स्मात्सूत्रा
न्यागेवमनुवृत्तान्नहिता इति औपस्थितं स्यात् इह तु ज्याप्रातिपदिकाधिकारात् षष्ठ्यादिविभक्त्यर्थं ह्यनेन तत एव तद्धिताः स्युः सति तस्मिन्संबंधप्र
तिपत्तेर्विभक्त्यापन्नत्वात् सुवंतादेव तद्धितापवर्तिन चैवं सति पदकार्यप्रसंगः तथा हि राजन्यः वार्त्रघ्न इत्यादौ भसंज्ञयोपजातया लुप्तविभक्त्याश्र
यापि पदसंज्ञा एकसंज्ञाधिकाराद्बाधिष्यते राजत्वं राजते सादौ तु प्रातिपदिकादप्युत्पन्नौ स्वादिष्विति पदसंज्ञा भवत्येव ननु तद्धि तल्लुकि स
र्वनामस्थाने दोषः काश्यपेन प्रोक्तमधीयते काश्यपकौशिकाभ्यामृषिभ्यां णिनिः छंदो ब्राह्मणानीति तद्विषयतायां तदधीते तद्वेदेत्यण् तद्धि
यांता काश्यपिनः शाखाद्धुतलक्षणाः प्रोक्ताल्लुक् इत्यण् काश्यपिन इत्यादौ भसंज्ञया लुप्तविभक्तिनिमित्तया पदसंज्ञाया बाधात् दो
षः काश्यपिभ्यामित्यादौ तु भवत्येव पदसंज्ञा तथापि काश्यपिनौ काश्यपिन इत्यादौ सर्वनामस्थाने भसंज्ञाया अभावात् लुप्तामन्तर्वर्तिनीं विभक्ति
माश्रित्य पदसंज्ञा स्यात् न चासर्वनामस्थान इति प्रतिषेधः किं कारणं स्वादिष्विति प्राप्तिस्तत्रैव स निषेधः एवं तर्ह्यसर्वनामस्थान इति वि
भज्यते प्रसज्यप्रतिषेधश्चाश्रीयते तत्सामर्थ्याद् अनंतरस्य विधिर्वा प्रतिषेधो वेति न्यायाश्रीयते तेन सर्वनामस्थाने परतः पूर्वस्यावधेर्याच यावती पदसंज्ञा स्वादि
ष्विति वा सुवंतमिति वा सा सर्वा प्रतिषिध्यते यद्येवं राजा दंडी इत्यादौ स्वपि न स्यात् पद विभमिसतो वीत्ये तद् सर्वनामस्थान इत्यत्रापेक्ष्यते तेन राजा
इत्येवमेव सर्वनामस्थाने सर्वा पदसंज्ञा निषिध्यते सौहृदादौ स्वादिष्विति वा सुबंतमिति वा भविष्यतीत्यदोषः तदेवं सत्यस्मिन्नर्थे न सुवंतात्त एम॰
द्धितेन कश्चिद्दोष इति स्थितं अत एव पूर्वाह्णेतरां पूर्वाह्णेतमामित्यादौ घकालतनेषु इति अलुक् विधास्यते॥ ४३ ॥ ॥श्री छ॥ ॥ ५५

© Dharmartha Trust J&K. Digitized by eGangotri

।ननु मत्वर्थ्यस्मिन्स्वार्थिके षष्ठ्या आगमात्कथं स्तुवंतां त्वम् प्रस्मात् एवं तर्हि स्वार्थिके क्रमए वायमीदृशः यत्तु तमर्त्वं विभक्त्यायोगः पश्चात्तरपाठकं हि प्रिय
कुर्मनारिषु तत्र प्रवर्त्तते सो विभक्त्यंत इति एवं च कृत्वा लुग्विधानमप्युपपद्यते यदि तु तरेण लुग्विधानं ज्ञापयेत् तस्यापत्यमित्यादौ न विभक्त्यर्थमात्रे
तात्पर्यं किंतु षष्ठ्यादिविभक्त्यंता एवोपलक्षयितुमिष्टाः स्याप्तातिपदिकाधिकारस्तु ह्याद्यादिविशेषणात्वेनैवोपयुज्यत इति तथा सति यदविभक्त्या
त्समर्थीपरिभाषयैव अव्यवस्था सिध्यति किंच अनभिधानादथ सामर्थ्येन भविष्यतीनार्थः समर्थवचनेन इदं तर्हि प्रयोजनं पदार्थाभिधाने समर्थ
तस्माद्यथा स्यात् किं पुनः स्यात् कृतवर्णानुपूर्वीकं पदं सौत्थितिः वैक्षमाणिरिति अत्र सवर्णदीर्घत्वे कृते प्रत्ययो भवति सुउत्थित विई क्षमाणाइस
स्याम व्यवस्थायां न भवति यदि स्यात्सौत्युत्थितिः वायीक्ष्माणिरिति प्राप्नोति वार्णादांगं बलीय इति न हि प्रसंगात् न वर्त्तरंगत्वाद्वार्णो बहुकृतेषु

।प्रथमादिति किं षष्ठ्यंताद्यथा स्यात् प्रथमांतान्मा भूत्॥ ॥

प्रत्ययो भविष्यति एवं तर्हि एतदर्थं समर्थवचनं कुर्वन्नेतत् ज्ञापयति अस्तीयं परिभाषा अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्त्तयंतीति यह:
शास्त्रकार्यं प्रतिरंतरंग तात्स्यादपि पश्चादस्यानिमित्तं विद्यातो भविष्यतीति बुद्ध्या न कृतं ये स्ते अकृतव्यूहाः एवंभूताः पाणिनीया इत्यर्थः कृत
मपीत्यत्र माश्रहोक्ष्याहार्यः कृतमपि वा शास्त्रकार्यं निवर्त्तयंति निमित्ताभावउपपद्यमान इत्यर्थः तेन पपुष इत्यादि सिद्धं भवति अत्रांतरंग
त्वात्पूर्वं कृतो पि आगमः एतत्परिभाषावशान्निवर्त्तते पूर्वमेव वा न क्रियते ततः शासिवस्योः संप्रसारणे कृते वलादिलाभादिडभावः प्रथमा
तादिति प्रथमानिर्दिष्टादपसर्विशेषणाद्विनोदेवदत्तादिशब्दादित्यर्थः अन्यथा सामर्थ्येन तेनेति पद्याईशो देवतास्य ऐंद्रः स्थालीपाक इति प्रथ
मांतान्न षष्ठ्यर्थे प्रत्ययो भवति एवमिहापि स्यात् देवदत्तोपसमस्य देवदत्तिरुपगुरिति॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ ५८.४
४५

वाग्रहणं किमिति हन्तिवाक्ययोर्व्यपेक्षैकार्थीभावलक्षणयोर्भेदादेव बाध्यबाधकभावो न भविष्यतीति प्रश्नः वाक्यमपि यथा स्यादिति तत्र
यथा गोशब्देन गावीशब्दो निवर्त्तते समासमपि स्वार्थात्प्रतिपत्तौ तथेहाप्यौपगवमानयेत्युक्ते य एवानीयते उपगोरपत्यमानयेत्यपि स एवेति प्र
धानार्थाभेदाद्वृत्त्या वाक्यं बाध्येतेति भावः॥ यद्येवं समासवृत्तिस्तद्धितवृत्त्या बाध्येतेति यत्रोत्सर्गापवादौ विभाषा तत्रापवादेन मुक्ते उत्सर्गो
न प्रवर्त्तते उत्तराह्णोनन्तरो राजानन्तरः इत्यादिषु सावकाशा समासवृत्तिस्तद्धितवृत्त्या बाध्येत यथा दाक्षिरित्यण्प्रत्यय इञेति भावः एतदपि

वाग्रहणं किं वाक्यमपि यथा स्यात् उपगोरपत्यमिति यद्येवं समासवृत्तिस्तद्धितवृत्त्या बाध्ये
त उपग्वपत्यमिति नैष दोषः पूर्वसूत्रादन्यतरस्यांग्रहणमनुवर्त्तते तेनेदमपि भविष्यति॥
१८३॥ प्राग्दीव्यतोऽण्॥ ॥तेन दीव्यतीति वक्ष्यति तदेकदेशो दीव्यत्शब्दो गृह्यते तेन गृह्यते प्रा
ग्दीव्यत्संशब्दनाद् इत ऊर्ध्वमनुक्रमिष्यामः अण्प्रत्ययस्तत्र भवतीति वेदितव्यं॥ ४४ ॥

ति समासवृत्त्या वाक्यं कार्यमित्यर्थः॥ ॥प्राग्दीव्यतोऽण्॥ ॥तेन दीव्यतीति वक्ष्यतीति वक्ष्यतीति पदितस्येदमनुकरणं प्राग्दीव्यतेरिति वक्तव्ये रास॰
यं प्राग्दीव्यत इति निर्देशो ततः आह तदेकदेश इति भवति हि समुदायगुणीभूतस्याप्येकदेशस्य पृथक्त्वमनुकरणं यथा स्यवामीयमित्यत्रेति भा ४५
वः प्रत्ययः स्यादिवद्दरणीसे बाधिकमेव स्यात् तदिञ्जिसादिनापवादप्रकरणे न विच्छिन्नस्यापि तेन स्यात् रागाद्दित्यादिष्वर्थेषु प्रत्ययानं न स्यात् तस्मा
दधिकारपरिमाणज्ञापनार्थं प्राग्दीव्यत इत्युक्तं ४४ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्रिष्वपि दर्शनेष्वित्यादिना अधिकारस्य पक्षेऽपि प्रातिपदिकानुपस्थानात् तद्धितजन्म अराणेत्ताणि प्राप्नोतीति परिभाषायाः पक्षेऽपि प्राग्दीव्यतोऽणः प्रकृतयः ताभ्यः सर्वाभ्योऽण् परिभाष्यमाणः केनापवादविषये न स्यात् एवं विधिपक्षेऽपि सर्वत्र प्रसंगः एवं मन्यते परं पीलाया वेति सूत्रमारभते न ह्यश्वपतिनापवादविषयेण भवतीति अन्यथाश्वपतिटक् सिद्धः अनेन चाणि स्यनर्थकं तत्स्यादिति उदश्वितोऽन्यतरस्यामिति विकल्पवचनमप्यस्मिन्नर्थे लिंगं यत्तु ब्रूमः प्राग्दीव्यत इति नेदं दीव्यतीति शब्दैकदेशस्य दीव्यच्छब्दस्यानुकरणं किं तर्हि तत्र योयो निर्दिश्यते दीव्यतोऽर्थात्प्रागिति तत्र दिवि र्लिट् कृते अर्थादित्यनेन गम्यमानार्थत्वात् प्रयुक्तेनाप्यप्रथमान्तेन समानाधिकरण्याल्लटः शत्रादेशः कृतः तत्रावधेरर्थत्वात् स्वविधिमतोऽप्य

॥ अधिकारः परिभाषा विधिरिति त्रिष्वपि दर्शनेष्वपवादविषयं परिहृत्याण् प्रवर्त्तते कस्य जितस्यापत्यं कौपगवः कापटवः ॥ ८३ ॥ ॥ अश्वपत्यादिभ्यश्च ॥ ॥ अश्वपत्यादिभ्यः प्रातिपदिकेभ्यः प्राग्दीव्यतीयेष्वर्थेषु अण् प्रत्ययो भवति पत्युत्तरपदलक्षणस्य ण्यस्यापवादः ॥ आश्वपतं शातपतं अश्वपति धनपति गणपति राष्ट्रपति स्थानपति यज्ञपति राष्ट्रपति कुलपति गृहपति पशुपति धान्यपति बन्धुपति धर्मपति सभापति प्राणपति क्षेत्रपति ॥ ८४ ॥ ॥

यौ एव प्रतीयन्ते सजातीयविषयत्वेन प्रसिद्धतरत्वात् स्ववच्छ्यवधिमद्भावस्य ततश्च प्राग्दीव्यतोऽर्थाः तेष्वेवास्य त्रिष्वपि पक्षेषु व्यापारः तत्र समानेऽर्थे प्रकृतिविशेषादुत्पद्यमानोऽपवादोऽणं बाधत इति सिद्धमिष्टम् ॥ ॥ अश्वपतेः ॥ ॥ प्राग्दीव्यतीयेष्वित्यत्र परिबर्हिं च कः पंचम्ये सव्ययीभावाद्वार्थे वृद्धाच्छः अव्ययानां भमात्रे इति टिलोपो न भवति लुप्तनुस्वारस्योपचारा इति परिगणनात् अत एवाव्ययात्यपि न भवति अमेहक्वतसित्रेभ्य इति परिगणनाद् गणपतिशब्दस्यात्र पाठात् गाणपत्यो मन्त्र इत्यपशब्दः एतेन क्षेत्रपत्यमाम्नातं क्षेत्रपत्यं चरुं निर्वपेदिति तु छान्दसं क्षेत्रपतमाम्नातीति तु छन्दोऽनपेक्षः कुर्वीति ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पू॰ २॰ ४

४६

दित्यदित्या ।। ।। पतिशब्दस्योत्तरपदशब्देन बहुव्रीहौ कृते पश्चाद्द्वंद्वः नहि द्वंद्वस्योत्तरपदशब्देन बहुव्रीहिरित्याह पत्युत्तरपदाच्चेति एतच्च प्रत्यासत्ते
र्व्याख्यानाद्वा लभ्यते अदितिग्रहणं तु नद्युत्तरपद इत्यिहार्थं स्यात्तन्न स्यादित्युत्तरपदं दित्युत्तरपदं भवति यत्तन्नादितिर्नोक्तं बहुव्रीह्यर्थं वाऽन्या भूदितिवाऽन्
तिपित्तमतानिति कुर्वीरिषुमतिपित्तम स्वस्य योः पावोपत्यार्थे भाषायाम पिरणेय यथा स्त्रा इति अनेन तु छंदसि सर्वेष्वेव प्राग्दीव्यतीयेषु ण्य वि
धिः केचिद्वाक शब्दमपि तत्रैव पठंति तेन तानो वाच्या एते वत्सा इति प्रयोगोपपत्तिः यमाच्चेति यमशब्दोपि सूत्रे पठितव्य इत्यर्थः पृथिव्या ञाञा ।

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।। ।। प्राग्दीव्यतस्त्वेव दितिः अदितिः आदित्य इत्येतेभ्यः पत्युत्तरपदाच्च प्राति
पदिकात् प्राग्दीव्यतीयेष्वर्थेषु ण्यप्रत्ययो भवति · दैत्यः आदित्यः आदित्यः पत्युत्तरपदात् · प्राजापत्यः सैनापत्यं ·
यमाच्चेति वक्तव्यं याम्यं · गाङ्कः · तिपित्तमत्तां छंदस्युपसंख्यानं · वाच्यं मा स्यै पैत्तमत्स्यं · पृथिव्या ञाञौ · पार्थिवा
पार्थिवी · देवाद्यञञौ · दैव्यं दैवं · बहिषष्टिलोपश्च · बाह्यः · ईकक्च · बाहीकः · ईकञ्छंदसि · बाहीकाः
हारेति ईकषः टिलोपवचनमव्ययानां भमात्रे टिलोप इत्यस्यानित्यत्वज्ञापनार्थम् आरातीयः स्थाम्नोऽकारः ।
अश्वत्थामः ।। ४५ ।। छ ।। ।।

राम॰

४६

विति ञाञौः स्त्रियां विशेष इत्याह पार्थिवा पार्थिवीति स्थाम्न इति केवलवचनोऽयं तस्य केवलस्य प्रयोगाभावात्तेन योगाना स्त्रिञोनादिना तु योगः सं
भवत्येव सर्वेषु च प्राग्दीव्यतीयेष्वयं विधिः तस्मादश्वत्थाम इति भाष्योदाहरणाद्यत्र तदंतविधिर्भवति अश्वत्थाम इति अश्वस्येव स्थामयस्येति ब
हुव्रीहौ अकारः टिलोपः पृषोदरादित्वात्सकारस्य तकारः ।। ।। ४५ ।। ।। छ ।। ।। छ ।। ।। छ ।। म

लोम्नोपसंख्यानं बहुष्विति वाक्यादिष्वपंपद्यत इति जिप्राप्ते बहुषु काराः केवलस्यापत्येनायोगात्सामर्थ्याभावात् कर्त्तव्यमिदं उडुलोमा इति उडूनीवलोमान्य
स्य शरा इव लोमान्यस्येति बहुव्रीहिः ततो कारः इत्लोपः ननु शंका द्विलक्षणो इत्यपि न तत्तस्य बहुत्वम् इति लुकि सुबंतादिनुसल इतिप्रत्ययलक्ष
णेन सुबंतं पदमिति पदसंज्ञायां नलोपेन सिद्धं सिद्धमनुनासिकंतं उडुलोमैः उडुलोमभ्य इत्येवमादौ नुमुच विधौ नलोपस्यासिद्धत्वात् दैत्यादिनस्या
त इत्तो लुगपि प्राप्नोति भरतगोत्रात् इत्यत्र नसि इति न वा त्रपदसंज्ञा असर्वनामस्थान इति निषेधात् यथा च प्रत्ययलक्षणेन प्राप्नोति सुबंतमि
त्यस्य अपि पदसंज्ञायाः स निषेधस्तथोक्तं पुरस्तात् सर्वत्रेति नायत एव पद्धा प्राग्दीव्यतीये मत्वचेते गावाचरंतीसत्रापि गम इति भवति गोरूप्य
मिति हे तुमनुष्येभ्यो मतरस्यां रूप्यः मयट् चेति रूप्यमयटो णात्परत्वात् इति येन नाप्राप्तिन्यायेन णस्येव बाधकत्वे यगादावपवाद इत्युक्तं इतिः सह संप्र

लोम्नोपसंख्यानं बहुषु। उडुलोमाः। शरलोमाः। बहुष्विति किं। औडुलोमिः। शारलोमिः। सर्वत्र गोरजादिप्रत्य
यप्रसंगे यत्। गव्यं। अजादिप्रत्ययप्रसंग इति किं। गोभ्यो हेतुभ्य आगतं गोरूप्यं गोमयं। णाद्यपोर्थविशेषल
क्षणादपवादात्पूर्वविप्रतिषेधेन द्वितीयपक्षे दोषः। बहूनां तानीनां समूहो गार्गकं तस्ता। कथं दैत्यपदः द्वितीयचाल
द्वितीयादिकिं नडिणोङीषं कृत्वा ततो णो तत्कृते। लिंगविशिष्टस्यापि भाषा वाक्यं नित्या॥ ८५॥ ॥ ॥

धाराणां पांपरत्वात्तदेव स्युरिति वार्त्तिकारंभः अर्थविशेषोपस्यादिलक्षणं निमित्तं यस्य सोर्थविशेषलक्षणः यस्तु तस्येदमित्यर्थसामा
न्यलक्षणो णाद्यपवादः स परत्वाद्बाधते उडुपातिनां भिषत्रं तत्येदम्यो डुपतं यत्रापुर्णरिषदश्वेस जभवति न तु शेषः। द्वितीयपक्ष इति अत्रेतच्चा
निज इति टक् भवति डौले परसादावेव तु भगिनी गानस्य तामि। नित्येअचि चाहिलक्षणाहृङ् भवति आपूपिकादावेव तु भवति कथं दैत्येपरतिम्न
त्रत हीति गाम्यमा नत्वा न्नप्रयुक्तं परिहरणाद्योर्थविशेषलक्षणा द्वणापवादात्सर्वविप्रतिषेधेन भवतिकथं न हि द्वितीयपक्षः सिध्यतीत्यर्थः। द्वि
तीया द्विसा द्विन नुमाति पदिक ग्रहणे लिंग विशिष्टस्यापि ग्रहणमिति ङीषंतात् पिणप एव प्राप्नोति तत्राह लिंगविशिष्टस्यपरिभाषा चा
नित्येति अस्मे तु भाष्यवार्त्तिकयोरनुक्तत्वादैतेयपरस्य साधुरिति स्थिताः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४

८१

उत्सादिभ्योऽञ्॥ ॥तदपवादार्थं चेति इञादीनां बाधकत्वादस्यापवाद इति वक्तव्ये शार्ङ्गरवाद्यञ् भुसाद्यर्थमिति यत्र समासस्तस्यार्थः पूर्वाचार्यसंज्ञेयं वक्त्व्यस्यापत्यं बाष्कयः असइति किं गोबष्कयिः ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादेवात्र न भविष्यति ज्ञापनार्थं तु एतज्ज्ञापयति भवत्यत्र तदन्तविधिरिति किं सिद्धं भवति धेनुशब्दोऽत्र पठ्यते तेन ढण्डादपि भवति अधेनूनां समूहः आधेनवमिति उदस्थान देशे इति उदस्थान शब्दोऽत्र भुसाद्यपति देशे वाचेऽयो उदस्थानो देशः देशादन्यत्र यदृच्छया कश्चिदुदस्थानः तस्यापत्यमौदस्थानिरिञ् भवति एष देशे इति एषद

उत्सादिभ्योऽञ्॥ ॥प्राग्दीव्यतः अणेव उत्सादिभ्यः प्राग्दीव्यतीयेष्वर्थेष्वञ् प्रत्ययो भवति अणस्तदपवादानां च बाधकः औत्सः औदपानः। उत्स। उदपान। विकर। विनद। महानद। महानस। महाप्राण। तरुण। तलुन। बष्कयासे। धेनु। पृथिवी। पङ्क्ति। जगती। त्रिष्टुप्। अनुष्टुप्। जनपद। भरत। उशीनर। ग्रीष्म। पीलु। कुल। उदस्थान देशे। पृषदंश। भल्लकीय। रथन्तर। मध्यन्दिन। बृहत्। महत्। सत्वन्तु। सन्त्वत्। कुरु। पञ्चाल। इन्द्रावसान। उष्णिह्। ककुभ्। सुवर्ण। देव। ग्रीष्मादच्छन्दसि। तिवर्णी

अन्हमान्नतग्रैष्मी त्रैष्टुभ। छन्दसि इह हस्तं गस्यते न भवेद। ४६ ॥

शार्ङ्गरवाद्यञ् भुसादयेति अंशेवाथपार्षतो शः अंशादन्यत्राणेव भवति ग्रैष्मी त्रिष्टुबिति ग्रीष्मो देवता अस्याः इत्यशो पार्थ विवक्षायामौत्सर्गिकोऽणेव रा॰म॰

भवति ग्रीष्मे भवेत्यादि शेष विवक्षायां तु अत्यन्तरोऽणेव सिद्धं न भवने नाना ज्ञेषिकत्वाणो बाधप्रसङ्गः अर्थविशेषलक्षणानामेव प्रत्ययानां शेषादि ४७

निर्बाधनात् अत्यन्तरान्तु शेषमात्रे विधानात् अर्थविशेषलक्षणाः कक्षोत्तस्मात्प्रत्यय कथं कालाट्ठञ् अणोपवादः तस्याप्यलाणोछन्दस्येवेह

हन्तं गम्यत इति यथा त्रिष्टुबाद्यो विशेषाः निवर्तन्ते नित्येन गतेर्दविषये पिबन्ते मिथयेऽञः प्रतिषेधात् अणेव भवति ग्रैष्मी त्रिष्टुबिति॥ ४६ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ स्त्रीपुंसाभ्यां ॥ स्त्रिशब्दात्पुंशब्दाच्चेति स्याधिकारविहितानां टाबादीनां पुंसि संज्ञायामित्येतदधिकारविहितानां च प्रत्ययानां ग्रहणं न भवति स्त्रीपुंसश
ब्दयोरव्युत्पन्नत्वात्तन्नापि स्त्रीपुंसार्थग्रहणे स्वरूपग्रहणं स्मेति वचनात् पौंस्नमिति संयोगान्तस्य लोप इति पुंशब्दस्य सकारस्य लोपः तत्र कृते म्मो नुस्वारस्यासिद्ध
त्वात्सकारस्य संयोगान्तत्वात् अत एव संयोगान्तलोपप्रसंगान्नञ्स्नञौ भाभ्यां न क्रियते एवं हि मा भून्नञ् मा च भूत्स्नञ् अस्त्र तु प्रकृतः तत्रैतावदस्तु स्त्रीपुं
सयोर्नुक् इति तत्रायमप्यर्थः स्त्रैणी पौंस्नी अस्य इतीकारः सिद्धो भवतीति नैवं शक्यं स्त्रैणाः पौंस्नाः यञञोश्चेति बहुषु लुक् प्राप्नोतीति इह च स्त्रैणानां संबं
धीनां कलत्रणे ष्ठञ्जिज्ञासित्वं प्राप्नोतीति नैष दोषः उभयत्रापि गोत्र इति वर्त्तते लौकिकस्य च गोत्रस्य ग्रहणात् ऋषिप्रजननं च लोके गोत्रमुपचरन्ति

॥ ८६ ॥ स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ ॥ धान्यानां भवने क्षेत्रे खञ् इति वक्ष्यति तस्मात्प्रागितस्तेनेन संबंधः प्राग्भ
वनसंशब्दनाद्येष्वर्थेषु स्त्रीपुंसशब्दाभ्यां यथाक्रमं नञ्स्नञौ प्रत्ययौ भवतः । स्त्रीषु भवं स्त्रैणं पौंस्नं स्त्री
णां समूहः स्त्रैणं पौंस्नं । स्त्रीभ्य आगतं स्त्रैणं पौंस्नं । स्त्रीभ्यो हितं स्त्रैणं पौंस्नं । स्त्रियाः पुंवदिति ज्ञापकादत्र तस
र्थेन भवतः योगापेक्षं च ज्ञापकमिति स्त्रीभ्यो ढगित्यपि सिद्धं ॥ ८७ ॥ ॥ श्रीः ॥ ॥ छ ॥ ॥ छ ॥

न च स्त्रीमत्यर्षिर्नापि पुंशब्दवाच्यं माभ्यां नञ्स्नञ्स्थितौ इति टिलोपस्तर्हि प्राप्नोति प्रकृत्यैकाजिति प्रकृतिभावो भविष्यति इष्टेमेयस्विति तत्रानु
वर्त्तते एवं तर्हि नुग्विधानसामर्थ्याट्टिलोपो न भविष्यति यो विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते तत्र टि
लोपार्थमेव नुग्विधानं स्यात् स्त्रीशब्दस्यापि नुगेव लोपस्य निमित्तं अन्यथा यस्येति लोपात्परत्वात् हि स्यात् यथा स्त्रीष्विताअस्य स्त्रायं हि
रिति तस्मात् यथान्यासमेवास्तु योगापेक्षं चेति । स्त्रीपुंसाभ्यामिति नयं योगो वत्सार्थेन प्रवर्त्तते । स एवं ज्ञापनशरीरे ननु स्नञ्वत्यर्थेन प्रवर्त्तते स्यर्थः
कथं स्त्रीत्वं स्त्रीता पुंस्त्वं पुंस्ता चेति आ च त्वात् इत्यत्र परिहारो भविष्यति ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ५

५८

द्विगोर्लुक्॥ ॥द्विगोरिति षष्ठीति॥ आनंतर्यलक्षणायां तु पंचम्यां पंचकपालस्य पुरोडाशस्येदं तस्येदमित्यण् पंचकपालमित्यत्रापि प्राप्नोतीति भा

वः षष्ठ्यामपि प्राधान्येन तद्योगे स्यात् स एव दोषोऽप व्यपांतलस्य षष्ठ्याश्रयणमनर्थकं स्यादिति मत्वाह द्विगोर्यः संबंधी निमित्तत्वेनेति यस्य तद्धितस्यो

त्पत्तौ द्विगुरर्थो निमित्तं यथा प्रागदीव्यतीय इति द्विगुर्विहितः सनिमित्तत्वेन संबंधी पंचकपाल इति संस्कृतं भक्षा इत्यत्रार्थे विवक्षिते द्विगुः अणा तस्य लुक् द्वाभ्यां वेदाभ्यामित्यस्मि

न्नर्थे द्वैवेद्यः। द्विवेदः। द्वयोर्वेदयोरध्ययनात् द्वैवेदस्तयोरपत्यं स्वत इञ् अपत्यतद्धितप्रत्ययस्यापि त्वादिशु द्वैवेदी द्विवेदनं इति द्वौ द्वैवेदकोस्य एव वा मुच्यते एकस्मात् सा

ग्रादयः पुत्रो न सप्तमाषाधा सुतः द्विगुनिमित्तविज्ञानादिति। द्विगुनिमित्तस्यापत्यप्रत्ययस्य लुग्विधानादित्यर्थः। पंचकपालस्येदमिति अत्र संस्कृता

द्विगोर्लुगनपत्ये॥ ॥प्राग्दीव्यतः इत्येवन भवताऽऽदिति। द्विगोरिति षष्ठी द्विगोर्यः संबंधी निमित्तत्वेन तद्धितः प्रा

ग्दीव्यतीयोऽपत्यप्रत्ययवर्जितस्तस्य लुग्भवति। पंचसु कपालेषु संस्कृतः पंचकपालः दशकपालः। द्वौ वेदावधी

ते द्विवेदः त्रिवेदः। अनपत्य इति किं द्वैदेवदत्तिः त्रैदेवदत्तिः प्राग्दीव्यत इत्येव द्वैपारायणिकः द्विगुनिमि

त्तविज्ञानादिह न भवति पंचकपालस्येदं पांचकपालं दाशकपालं अथवा द्विगोरेवायं लुग्विधीयते द्विगोरि

ति स्थानषष्ठी ननु च प्रत्ययादर्शनं लोपालुक्श्लुलुपः समुत्पत्ते उपचारेण तु लक्षणा द्विगुनिमित्तमज्ञः प्रत्ययः

यद्यपि प्रथममुत्पन्नः प्रत्ययः स एव द्विगोर्निमित्तं न द्वितीयस्तथापि तस्य लुङ् भवति अथवेत्यादि। पूर्वं लुगित्यनेनोपस्थापितस्य प्रत्ययस्य द्वि

गोरिति तेनैवेत्यधिकरणमात्रिसंख्यातं तदानीं सामानाधिकरण्यमित्येषविशेषः कथं पुनर्द्विगोरेव लुग्लभ्यत इत्यत्राह द्विगोरिति स्था

नषष्ठीति। ननु चेत्यादि। प्रत्ययस्य लुक्श्लुलुपः इति प्रत्ययादर्शनस्य लुगादयः संज्ञा विहितास्ततश्च द्विगोर्लुगिति नैव समंजसमिति भावः

उपचारेणेत्यादि अतस्मिंस्तद्रूपारोप उपचारः परत्र परशब्दप्रयोगो लक्षणा उपचारेण निमित्तेन फललक्षणा तथेत्यर्थः अस्मिन्नुपचा

रे शोभनस्य निरर्थकस्य लक्षणायेत्येतदिति सा द्रुः आद्विगुसमुपस्थितो हि प्रत्यय पतयाययाबुद्ध्या विवक्ष्यते सा लक्षणा उपचारेणैवेति उपचारस्य

निबंधनं द्विगुनिमित्तत्वं भगतिहि कारणे कार्योपचारः आयुर्घृतमितिपथा ५७ ॥

राम॰

५८

द्विगुनिमित्तकोपि तर्हि स[illegible]दि कार्येपि कारणवदुपचारो दृश्यते यथा पुरातनं कर्म भुज्यत इति न तथा द्विगुर्यस्य प्रत्ययस्य निमित्तं सोपि गुणकल्पनया
गुणशब्देनोपचारस्य निमित्तभूतो धर्मो विवक्षितः तन्निमित्ता कल्पना गुणकल्पना सा पुनरुपचारात्मिका बुद्धिः तया कस्मान्न द्विगुरित्युच्यते अत्र हि द्वि
वायमेवंविधं वचनमित्यर्थः परिहरति नन्वनस्येति तत्र हि संनिहितमपि द्विगुत्वं प्रत्यययोगस्य तेनोपयुज्यते नन्वस्मै द्विगोरित्येवं विधीयते किं तर्हि प्राति
पदिकाद्धि सेवन्ति स्यर्थः इतरस्त्विति तिमत्यमः यस्य लुगिष्यते द्विगुत्वस्यैव निमित्तमिति तदर्थं हि समासो विधीयते तत्स्यैव च द्विगुसंज्ञा तेनासौ द्वि

द्विगुनिमित्तकोपि तर्हि गुणकल्पनया कस्मान्न द्विगुरुच्यते पाञ्चकपालमिति ननु त
स्य द्विगुर्निमित्तं इतरस्तु द्विगुत्वस्यैव निमित्तमित्यस्ति विशेषः यद्येवमिह कथं पं
चकपाल्यां संस्कृतः पंचकपाल इति नेवात्र तद्धित उत्पद्यते वाक्यमेव भवति ॥

गुत्वस्यैव निमित्तं यद्येवमित्यादि उभयोरपि पक्षयोरेतच्चोद्यं न ह्यत्र द्विगोर्निमित्तत्वेन संबन्धी तद्धितः नापि द्विगुनिमित्तत्वादुपचारेणात्र द्विगुर्व्यप
देशार्हः अत्र हि समाहारे द्विगौ निष्पन्ने पश्चात्तद्धित उत्पद्यते स च द्विगोर्निमित्तं न भवतीति चोद्यार्थः परिहरति नैवात्र तद्धित उत्पद्यत इति अनभि
धानादिति भावः यदि नोत्पद्यते कथमस्मिन्नर्थे पंचकपाल इति रूपसिद्धिः तस्मादुत्पद्यत एवात्र तद्धितस्तस्य च लुग्विधेयः स्यात् अत आह ॥ ॥

॥ ॥८ ३ ॥८ २ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४
५९

त्रैशब्द्यं हीति त्रय एव शब्दास्त्रैशब्द्यं चातुर्वर्ण्यादिः अहृत्यस्माभिः त्रैशब्द्यं साध्यं तत्र पंचकपालीशब्दात् तद्धितोत्पत्तिमंतरेणापि सिध्यतीति तिना
स्मात्तद्धित उत्पद्यते तानेव त्रीन् शब्दान् दर्शयति पंचसु कपालेषु संस्कृत इति द्वयोः शब्दयोरिति यः समाहारे द्विगुः पश्चात् तद्धितार्थे द्वावपि तौ समानार्थौ
तयोरेकेन पूर्वेणैव विग्रहः अवधारणमत्र इष्टमंत्यविग्रह एव न तद्धितोत्पत्तिः अनभिधानात् अपरस्मात्पंचकपालादुत्पत्तिः सोयमसावि
कल्पायउच्यते तत्तथा अत्र वेमं सिमिसविशद्धेन विग्रहः स्वेअविकशब्दादुत्पत्तिर्विग्रहश्च आविकस्यमं समावैकमिति साचव्यवस्थित विभा

त्रैशब्द्यं हि तः साध्यं त्रैशब्द्यं हि पंचसु कपालेषु संस्कृतः पंचकपालां संस्कृतः ४
पंचकपाले इति तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः अपरस्मादुत्पत्ति
र्भवति अथेह कस्मान्न भवति पंचभ्यो गार्गिभ्य आगतं पंचगार्गिरूप्यं पंचगार्गिमयमिति
वेत्यनुवर्त्तते सा च व्यवस्थितविभाषा विज्ञायते ४८

षेति एवं कृत्वा त्रैविद्यः पांचनदः षाड्कुलः तस्यात्रापि लुङ् भवति अथवा अवयवविद्या त्रिविद्या शाकपार्थिवादित्वात् तामधीते त्रैविद्यः विद्यात्रयस्य
पस्यैव समुदायस्य विद्यात्वं विवक्षितमित्यर्थभेदाभावः पंचानां नदीनां समाहारः पंचनदं नदीभिश्चेत्यव्ययीभावः गोदावर्यश्चेति यथाश्चेत्स राम॰
व समासांतः पंचनदे भवः पांचनदः अथवा अभिधाने हि सति समाहारद्विगोरपि भवत्येव तद्धितः तथा च समासादि पुरुषाणां कुलानि त ५९
त्र भवः षाड्कुलः अथवा विकल्पा णाणात्त्रि तिस्रो विद्या अधीते पंचसु नदीषु भवः षट्सु कुलेषु भव इति विग्रह एव न द्विगुर्नापि तद्धितः ४८ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥गोत्रेलुगचि॥ ॥पूर्वत्रोक्तस्त्रयेणलुग्विधानादिहनञ् प्रश्लिष्यते यस्कादिभ्यो गोत्र इत्यादिनेति। प्राग्दीव्यत इत्युपजीवनाय नु प्रकरणोत्कृ
र्षः प्रसक्तप्रतिषेधश्चायं अवातिपर्येषापरमस्मभ्यात् छविधावितरेतराश्रयं प्राप्नोतिगार्गीयावात्सीया इति छे परतो ऽलुका भवितव्यं
अलुकि च सति छ इत्येषा छेन भवितव्यमिति तन्नु छे परतो ऽलुग्विधीयते किं तर्ह्यजादिमात्रे तत्र प एवाजादिः संभवति तत्रैवालुग्भविष्य
तीति घ्यां गार्गीणां छात्राः प्राग्दीव्यतो ऽण् तत्र परतो ऽञ् जो ऽश्वेति प्राप्तस्य लुकः प्रतिषेधे गार्गा इति भवति य घ्य त्र सत्सु सति का लुकि ना

॥गोत्रेऽलुगचि॥ ॥प्राग्दीव्यतः इत्येव यस्कादिभ्यो गोत्र इति प्रकरणेन येषां प्रत्ययानां लुगुक्त
स्तेषामजादौ प्राग्दीव्यतीये प्रत्यये विषयभूते प्रतिषिध्यते। गार्गाणां छात्रा गार्गीयाः वात्सीयाः
आत्रेयाः खारपायणीयाः गोत्र इति किं कौबलं बादरं अचीति किं गर्गेभ्य आगतं गर्गरूप्यं गर्गमयं
प्राग्दीव्यतः इत्येव गर्गेभ्यो हितं गर्गीयं ॥ ॥ ४९ ॥ ॥ ७ ॥ ॥ ७ ॥ १७ ॥ ॥

त्ति विशेषः आपत्यस्य च तद्धित इति यलोपविधानात् इह त्वत्रेरपत्यानि बहूनि इत्यत्रानि ञ् इति ढकोऽत्रि भृग्विति लुकि कृते अत्रीणां छात्रा
इत्यणि परतः प्रतिषेधे सति आत्रेया इति भवति असति तु प्रतिषेधे आत्रा इति स्यात् स्यादेतदेवं यदि लुप्तस्य प्रत्ययस्य पुनः प्रादुर्भावो विधी
यते इह त्वलुगिति वचनात् लुकः प्रतिषेधो विधेयः प्राप्तस्य चानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः अकृते कृते तु तत्रश्व पर यत्र गार्गा
दिरभिप्रेतः स्यात् प्रागेव लुकः प्रवृत्तिरभ्युपगतमा अयथा हि छ इत्यानुछ एव स्यात् लुक् च ते स्मरह नः प्रतिषेधः किं कारिष्यतीति योऽहि भुक्तवं

© Dharmartha Trust J&K. Digitized by eGangotri

का·पृ२·४ तद्धितोत्पत्तौ प्रवृत्तेः लुक् न भवति यथं अलुकि प्रवृत्ते अजादिर्न भवति अमिति अक्रमितरेतराश्रयं विप्रतिषेधात्सिद्धं लु
५० कोव काशः यत्र प्राग्दीव्यतीयोर्थो न विवक्षितो गार्ग्यवत्साः इति छुग्णात्काशः शालीय इति गार्गीयश्लोमय प्रसंगे अग्लात्सो
भविष्यति तत्र परत्वाल्लुकः प्रतिषेधः अन्तरंगो लुक् अपत्यबहुत्वमात्रापेक्षत्वात् बहिरंगश्छः प्राग्दीव्यतीयार्थापेक्षित्वा
त् अन्तरंगबहिरंगयोश्चायुक्तो विप्रतिषेधः एवं तर्हि उच्यते चेदं अजादौ परतो लुग्भवतीति यदि च तावत् अपवादनिमित्तं समस्तीति
बहुत्वमात्रापेक्षो लुक् प्रवर्तेत प्रतिषेधविधानमनर्थकं स्यादिति प्राग्दीव्यतीये अजादौ त्यज्यते तावल्लुक् प्रवर्त्ते
त इति कल्प्यते ततश्च इह इष्टलाच्छेऽसति लुकि प्रतिषिद्धे गार्गीय इति सिद्धम् विषयप्रसंगोत्पन्ने न किंचित् फलमाध्यं गार्गीयाः
छात्रा इत्यस्यार्थस्य विवक्षायामजादौ प्रत्यये विवक्षिते बुद्धिस्थे तु सत्येव लुकि प्रतिषिद्धे इह इष्टलाच्छो भवतीति तस्मादिष
यसप्तमी सा अत्र साहि प्राग्दीव्यतीये प्रत्यये विषयभूत इति वा रयापणीया इति स्वरूपस्यापत्यानि बहूनि नड्वादिभ्यः
फक् कृते तस्य यस्कादिभ्यो गोत्रे इति प्राप्तस्य लुकः प्रतिषेधः कौञ्जलंबाद इमिति कुञ्जलीबदीश द्वौ गोरादिङीषं तावत्तो
द्विगोता आपंफले विकारे अमुष्य तातश्चेस जातस्य फले लुगिति प्राप्तस्य लुकः तस्येदमित्यर्थविवक्षायां प्रतिषेधो न भ
वतीति तेन इह इष्टलाच्छो भवति गार्ग्य इष्यमिति यथ तत्र स्यात गार्ग्य इष्यमिति स्यात् गार्गीयं इति तस्मै हितमिति प्राक्क्री ग्गम०
५०

तोष्ठः॥ ॥ ४९ ॥ ॥ छ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तिषयसप्तम्या एव फलं दर्शयति गोत्रस्येत्यादिना गोत्र इति गोत्रप्रत्ययस्येत्यर्थः बहुषु लोपिन इति बहुषु विधीयमानलोपस्येत्यर्थः बहुव
चनान्तस्य प्रवृत्तावित्यत्र प्रवृत्तिरेवार्थो न त्वसंक्रान्तिः बहुवचनान्तस्य सतो यो न त्वसंक्रान्तो सत्यामित्यर्थः । द्व्येकयोरिति यत्रार्थो न रसंक्रान्तस्तस्य
द्वित्वैकत्वयोः सतोरित्यर्थः अर्थान्तरसंक्रान्तिस्तदन्तादपत्यप्रत्यय उत्पद्यते तेन तस्य च लुक् क्रियते तदा भवति लुप्तोऽपि प्रत्ययः प्रत्ययलक्षणेन तिरो
तदर्थमाहेति भवति संक्रान्तिः बिदानामिति बिदस्यापत्यानि बहूनि अनृष्यानन्तर्ये बिदादिभ्योऽञ् बिदाः तेषां बिदानामपत्यं पुमान् माणवकोऽत्रैव
ति विवक्षायामत इञ् इति विवक्षिते गोत्रप्रत्ययस्याञो लुकः प्राप्तस्यानेन प्रतिषेधः इञो यञश्च त्रिरार्थे तिलुक्यैबैदः बैदा इति भवति परस्मान्मा
प स्यैव लुक् प्राप्नोति अजादेरभावात् इदमिह संप्रधार्यं इञो लुक् क्रियतामयं वा अलुगिति परत्वाद्लुग्भवति इञो लुकि सः कृतेऽपि
न लुकि प्राप्नोति अकृतेऽपि अपत्यमनेन लुगनिमित्तः नहीञो लुकि कृते प्राप्नोति अजादेरभावात् प्रत्ययलक्षणेन भविष्यति वर्णाश्रयेण

।गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् बिदानामपत्यं पुमान् बैदः बैदौ बैदशब्दादत इ
ञ् कृते तस्य च यञ्ञोः परत्वादिति लुकि प्राप्ते एकवचनद्विवचनान्तस्य च परतो बहुषु लोपो यूनि बैदस्यैबैद
योर्वापत्यं बहवो माणवका बिदाः न यञ्ञाभ्यां बहुषु लुकः ५० ॥ ॥

त्ति प्रत्ययलक्षणं नात्र वर्णो निमित्तं किं तर्हि प्रत्ययः तस्यैव तु विशेषणमचीति तत्र यथा हलादौ पितिसार्वधातुके विधीयमाने स्त्रीणा इत्यत्र यो
ऽपि सत्यापि भवति प्रत्ययलक्षणेन तद्वदिहापि भविष्यति सप्तमीविषयसप्तमीपक्षे नैवं सति न त्वेवं भवति नो भवति ननु भयोरपि पक्षयोरिहापि प्राप्नोति बिदाना
मपत्यं बहवो माणवका बिदा इति नैष दोषः इञ्त्र बहुत्वे बहुत्वं गोत्रे बहुत्वं च तत्र गोत्रबहुत्वाश्रयस्य लुकः प्रतिषेधो युवबहुत्वे लुक् प्राप्तः तस्या
मवस्थायां यदि कश्चिदजादिर्विषयस्तस्मात्तावत्तस्यामवस्थायां लुक् प्राप्तः तस्यामवस्थायां यदि कश्चिदजादिर्विषयभूतः ततोऽलुका भवितव्यं
इह त्वजादिर्विषयभूतस्तस्मात्तो लुक् प्रसज्यते पश्चात्तु युवबहुत्वे संक्रान्तो सत्यां लुक् प्राप्तः न चास्यामवस्थायां कश्चिदजादिर्विषयभूत इति पुनर्लुग्भ
विष्यति परस्तस्मात्तस्मिन्नपि गोत्रे वर्त्तमानस्यालुग्भवत्यजादौ परतः कस्मिन्नजादौ प्रागदीव्यतीयेऽर्थात्तेषु यो जादिस्तस्मिन्विवक्षिते यस्मिन्गोत्रे
वर्त्तमानस्य लुक् प्राप्तस्तद्धिति गोत्रे प्रागदीव्यतीयेऽर्थे योऽजादिस्तत्रेति गम्यते इह चेञो वाजादिस्तदर्थ एव च गोत्रे लुगिति प्रतिषेधो न भविष्यति ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ४

५१

यद्वासमर्थानांप्रथमादित्यतः प्रथमादितिवर्त्तते तच्चषष्ठ्यंतं विपरिणाम्यते प्रथमार्थेहित्वात्वात् प्राथम्यमाश्रीयते तदपसमर्थो भवतिप्रथम
यो भवति प्रथमस्य गोत्रप्रत्ययस्य लुङ्भवति यस्मिन्नर्थे प्रत्यय उत्पन्नः तत्रैवार्थे वर्त्तमानस्य यो लुक्प्राप्तः स न भवति इह तु द्वितीयमर्थमुपसं
क्रांतस्य लुक्प्राप्त इति न प्रतिषिध्यते अवश्यं चैतदेवं विज्ञेयं प्रथमस्य लुक्प्रतिषिध्यत इति अन्यथा अत्रेरपत्यं इतश्चानिञ इति ढक् तस्यापत्यं
बहवो युवानः अत इञ् एयञ्त्रिपार्थे लुक् कौत्रिभृग्विति लुक् अत्रयः भरद्वाजशब्दाद्विदाद्यञ् तदंता युवबहुत्वे इञो लुक् अञोपजञ्ञो
स्येति लुक् अत्र पञ्च भरद्वाजाश्च अत्रिभरद्वाजाः तेषां मैथुनिका द्वन्द्वा इन् अत्रिभरद्वाजिका अत्रा
लुक् प्राप्नोति कुत्साद्यपत्यानि त्रिभृग्विति लुक् कुशिकादर्जं तादिञो लुक् किं कुशिकाः कुत्सकुशिकिका वसिष्ठकश्यपिका भृग्वंगिरसिका अथ
वाणोपवनारि गर्गभार्गविका शब्दः पद्यते भार्गवगास्य युवबहुत्वे लोपास्यस्य लुकः प्रतिषेधार्थेति लिपमार्थे भविष्यति एतत्सर्वं द्वितीयमर्थमु
पसंक्रांतस्यालुग्भवतीति नैवं बप्रनात्र युवबहुत्वे वर्त्तमानस्यालुक् प्राप्नोति किं कुरांगोत्रइस्तु अतो यष्पस्याधिकारस्त्र्यन्यत्र लौकिकं गो
त्रं गृह्यते इह तु पारिभाषिकस्य ग्रहणं युवशब्दसाहचर्यात् अन्यथा गोत्रयुवसंज्ञयोः समावेशो यो यदोषोवस्तते शालंकेरपत्यं पिजिञोऽश्च
ति फक् तस्यापत्ये लाडिपश्चेति लुक् शालंके यूनि स्त्रोत्रा इत्यर्थविवक्षायां गोत्रे लुग्वीत्यलुक् प्राप्नोति ततश्च यूनि लुग्गित्यस्य फक्फिञोऽप्यत
स्यामिति विकल्पितत्वात् पक्षे फकः श्रवणं प्राप्नोतीति स तद्युस्य एव स्यात् असमावेशेऽपि यूनो लौकिकगोत्रत्वाद्वा लुक्प्रसंगात् तदेवं गो
त्रस्य बहुषु लोपिनइत्यादिनि वक्ष्यमिति स्थितं एकवचनद्विवचनांतस्य सादेरेकवचनांतस्य गोत्रप्रत्ययस्य द्विवचनांतस्य वा बाहुषु यो युवस
ञ्जके युवप्रत्ययोऽसंक्रांतो समासामि स्यार्थः लोप इति लुगित्यर्थः लोपो हि प्रत्ययलक्षणेनाद्युद्धिस्वरप्रसंगः ननु च युवबहुत्वाश्रयो यञञोऽश्चेत्येवात्र लु
क् सिद्धस्तत्राह न यत्राज् बहुषु लन्त इति अञो बहुषु यञोबहुष्विति विज्ञायमाने लुङ् सिध्यतीत्यर्थः पदालजं लं यद्बहुषु यञंतं यद्बहुषु इति
विज्ञायते तदा जंतस्य बहुषु युवसु वर्त्ते लौकिकस्य च गोत्रस्याप्रसमात्रस्य तत्र अग्रहणात् सिद्धः एव लुक् तथा च गार्ग्यश्च वात्स्यश्च वात्स्यश्च गार्गव
त्सवाजाः वैदश्च और्वश्च भारद्वाजश्च विदौर्वभरद्वाजा इति यञञोरुत्पत्तिवेलायामबहुत्वेऽपि द्वंद्वे युगपदधिकरणवचनतया यञंतस्यांजंतस्य
च बहुत्वेऽपि यञनाल्लुग्भवति नचैवं काश्यपप्रत्ययस्यैकस्य बहवः प्रतिकृतयः काश्यपा इति इत्सर्वे प्रतिकृताविविति विहितस्य कनो जीविकार्थे चापण्य इति

लुपहरीतमास्त्रिषु यञ्ञिरितिवचनात् एकबहुवचनाभावे अजंत
स्य बहुषु हते लुकि प्रसंगः गोत्रबहुत्वे लुग्विधानात् ५० ॥

एम॰ ५१

© Dharmartha Trust J&K. Digitized by eGangotri

॥यूनि लुक्॥ ॥अत्रापि यथचीति परसप्तमी स्यात् प्रत्यय स्यापथे एप्रसंगः युवप्रत्यये प्रत्ययमारोपः प्राप्नोति सतावत् क्रियः तत्र कृते युवप्रत्ययस्य लुकि तस्य श्रवणं प्राप्नोति विषय सप्तम्यां तु जातो विषय भूत एव युव प्रत्यये लुक् संयोग्यतः प्राप्नोति ततः सभवतीति सिद्धमिष्टं एतद्योदाहरणे युवप्रत्ययेति कि
शिष्यते तन्त्रेन दाह अजादौ प्रत्यये विवक्षित इत्यादि रुञ्ञ्स्येतरा भवतीति परसप्तम्यां तु वृद्धाच्छः एवस्यात् फेश्छेवति यमुं दस्य सुयामाच वार्ष्यायणि
फिञः स्मृता इति परिगरामनं भाष्यकारेणनाश्रितं तेन तैकायनेरपि छो भवति। तैकायनीया इति अत्र परसप्तम्यामप्येदोषः तस्य क्षत्रियार्षञितः इत्यत्र
तुवृत्तिकारेणस्यो लुगुदाहृतः तैकायनिः पितातैकायनिः पुत्र इति सर्वगिरानाश्रये एवदृष्टमः तदा च तैकायनीय इत्यनुदाहरणं। कापिंजला

॥फिनि लुक्॥ ॥प्राग्दीव्यत इति वर्त्तते अचीति च प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षिते बुद्धिस्थे नुत्पन्न एव युवप्र
त्ययस्य लुग्भवति तस्मिन् निवृत्ते सति पोपतः प्राप्नोति सततो भवति। फांटाहृतस्यापत्यं फांटाहृतिस्तस्यापत्यं युवा फां
टाहृतिमिमताभ्यां णफिञौ फांटाहृतः तस्य छात्राः इति विवक्षिते र्थे बुद्धिस्थे युवप्रत्ययस्य लुग्भवति तस्मिन् निवृत्ते
ञंतप्रकृतिरूपं संपन्नं तस्मात् इञश्चेत्यण्। फांटाहृताः भागवित्तस्यापत्यं भागवित्तिः तस्यापत्यं युवा वृद्धाट्टक् सौवी
रेषु बहुलमिति ठक् भागवित्तिकस्तस्य छात्राः पूर्ववद्युवप्रत्यये निवृत्ते इञश्चेत्यण्। भागवित्ताः तिकस्यापत्यमिति
कादिभ्यः फिञ् तैकायनिः॥ ॥छ॥ ॥

दा इति। अत्रापि परसप्तम्यां वृद्धाच्छः स्यात् एवं ग्लौचुकायनाः इत्यत्रापि परसप्तम्यां वृद्धाच्छः स्यात् एवं ग्लौचुकायनाः इत्यत्रापि वृद्धम्यां इत्यनुश्रो
पगावे पुनस्तच्छात्रा इञो लुकि कृते छाच्छो भवति परसप्तम्यामिञश्चेत्यण् स्यात् नेतरस्य योगस्योदाहरणं कथं इञश्चेत्यत्र गोत्र इति वर्त्तते तेनञं विशेषयिष्या
मः गोत्रेयइञ् विहित इति पारिभाषिकं च गोत्रं गृह्यते कथं कण्वादिभ्यो गोत्र इत्यत्र तावद्गोत्रे कुंजादिभ्य इत्यस्य गोत्रस्यानुवादः कण्वादिभ्यो गोत्र इति यः प्र
त्ययो विहितस्तदन्तादण् भवतीति तत्र च पारिभाषिकं गृह्यते तस्यैव चानुवादः तदेव चे ञश्चेत्यत्राप्यनुवर्त्तते तेन लुक्तो युवप्रत्ययान्तादण्।ः प्रसंगः अ
वश्यं चैतदेवं विज्ञेयं अन्यथा लुक्प्रस्ताविप्रत्ययस्य लक्षणे शोणादारास्यादेव इत्यस्मात्तु तत्रोदाह रणानि पतत्वच्छत्राः पतराजस्य अपत्यं अश्वपुरस्यापत्यं

© Dharmartha Trust J&K. Digitized by eGangotri

का.प.२.४

५१

तस्यापत्यं श्वाशुरिस्तस्य छात्रा इति लुकि प्राग्दीव्यतोऽण् भवति श्वाशुराः अन्यथा वृद्धाच्छः स्यात् कुलात् खः कुलीनः तस्यापत्यं कौलीनिः तस्य छात्रा इञो लुकि कौलीनाः स्वसुश्छः स्वस्रीयः तस्यापत्यं स्वास्रीयिः तस्य छात्रा इञो लुकि स्वास्रीयाः नैतान्युदाहरणानि अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमितीञो लुकि कृते श्वशुर्यः पिता श्वशुर्यः पुत्रः कुलीनः पिता कुलीनः पुत्रः स्वस्रीयः पिता स्वस्रीयः पुत्र इति भवितव्यं न च ब्राह्मणगोत्रे कश्चिद् वृद्धिनिमित्तः प्रत्ययः संभवति यत इञि कृते छः प्राप्नोति वृद्धिनिमित्ते तु गोत्रप्रत्यये नास्ति विशेषः यतः श्रूयमाणेऽपि यञिञि छेन भवितव्यं लुप्तेऽपि तस्मिन् गोत्रप्रत्यये तस्यापि वृद्धत्वाच्छेन भवितव्यं तद्यथा औपगवीया इति तदेवमिञ उदाहरणं न संभवतीति स्थितं यदि तु एवं सूत्रे

तस्यापत्यं युवा फेश्छ च तैकायनीयः तस्य छात्राः युवप्रत्यये निवृत्ते वृद्धाच्छः तैकायनीयाः कपिंजलादस्यापत्यं कापिंजलादिः तस्यापत्यं युवा कुर्वादिभ्यो ण्यः कापिंजलाद्यः तस्य छात्राः ण्ये निवृत्ते इञश्चेत्यण् कापिंजलादाः ग्लुचुकस्यापत्यं प्राचामवृद्धात्फिन्बहुलं ग्लुचुकायनिः तस्यापत्यं युवा प्राग्दीव्यतोऽण् ग्लौचुकायनः तस्य छात्राः युवप्रत्यये निवृत्ते सर्वत्राग्नेः ग्लौचुकायनाः अचीत्येव फाण्टाहृतः फाण्टाहृतमयं प्राग्दीव्यत इत्येव भागवित्तिकायहितं भागवित्तिकीयं ॥ ५१ ॥

लौकिकस्य गोत्रस्य ग्रहणं तदा स्यादेवेञ उदाहरणं तथा हि श्वशुर्यादिभ्यस्तस्येञः सत्यपत्योपसंख्याने इञो लुकि तस्य प्राग्दीव्यतीयविवक्षायां गोत्रे लुगचीति प्रतिषेधेन पुनः प्रादुर्भावादिञाश्रये वृद्धाच्छः स्यात् यदि तस्य यूनि लुगिति लुङ् क्रियेत अतोऽस्मादिञ उदाहरणत्वप्रतिषेधाद्व्यवसीयते पारिभाषिकं गोत्रं सर्वसूत्रे भाष्यकारस्याभिमतमिति किमर्थं पुनरिदमुच्यते गोत्रवृत्ताद्यूनोऽपि गोत्ररूपे विवक्षिते गोत्रप्रत्ययो नाभिधानात्त्विबंधन एव प्रत्ययो भविष्यतीति अर्थप्रकरणादिना च युवविशेषसिद्धिः अवश्यं चार्थप्रकरणादिनैव विशेषोऽवसातव्यः आरब्धेऽप्यस्मिन् सूत्रे शब्दस्य साधारणत्वात् न हि ज्ञायते किं भागवित्तेश्छात्रा आ भागवित्तायना हो स्विद्भागवित्तिकस्येति यदा तर्हि विशेषविवक्षा तदापि भागवित्तेरेव यथा स्या

एम० ५१

© Dharmartha Trust J&K. Digitized by eGangotri

॥ फक्फिञोः ॥ ॥ किमर्थमिदं यावता युवरूपविवक्षायां गार्ग्यायणीया इति गोत्ररूपविवक्षायां च गार्गीया इति अर्थप्रकरणादिना च विशेषावसा-
यः आरब्धव्यमसि । सत्येव माध्यप्राणीयः गार्गीया इति शब्दस्य साधारणत्वादित्यत आह पूर्वसूत्रेणेति यूनि लुगित्येतदारंभणीयमित्युक्तं तस्मिंश्चा-
रब्धे मा भूत् मा भूदिदं नोच्येत फक्फिञोरपि नित्य एव लुक्स्यात्ततश्च गार्ग्यायणीया इति न स्यात् तस्मादिदमप्यारंभणीयमित्यर्थः ॥ ॥ तस्यापत्यं ॥ ॥
अर्थनिर्देशोऽयमिति प्रकृत्यर्थविशिष्टः षष्ठ्यर्थो यत्र प्रत्ययार्थो न निर्दिश्यत इत्यर्थः तेन समर्थविभक्तेरपि षष्ठ्या निर्देशो दर्शित एव पूर्वेषु तेष्वे-
ति शब्दैः स्त्रीपुंसाभ्यामिति संबध्यते अपत्यं पुत्र विधानात् अन्यथा तस्यापत्यमित्यनेनैवायोगमेव कुर्यात् यतस्त्वसंयुक्तं करोति ततो ज्ञायते पूर्वैः संब-

॥ फक्फिञोरन्यतरस्यां ॥ ॥ पूर्वेण नित्ये प्राप्ते विकल्प उच्यते फक्फिञोर्युवप्रत्यययोः प्राग्दीव्यती-
येऽजादौ प्रत्यये विवक्षिते अन्यतरस्यां लुग्भवति । गर्गादिभ्यो यञिति यञिञोश्चेति फक् गार्ग्यायणः
तस्य छात्रा गार्गीयाः गार्ग्यायणीयाः वात्सीयाः वात्स्यायनीयाः फिञः खल्वपि यस्कस्यापत्यं शिवादिभ्योऽण् या-
स्कः तस्यापत्यं युवा ऽणो द्व्यचः इति फिञ् यास्कायनिः तस्य छात्रा यास्कीयाः यास्कायनीयाः ॥ ॥ तस्यापत्यं ॥
॥ अर्थनिर्देशोऽयं पूर्वेषु तेषु प्रत्ययैरभिसंबध्यते तस्येति षष्ठीसमर्थादपत्यमित्येतस्मिन्नर्थे यथाविहितं प्र

ध्यत इति उत्तरैरपि संबध्यते स्वरितत्वात्सामर्थ्याच्च तेषां तस्येति षष्ठीसमर्थादिति तस्येति सामान्यं षष्ठ्यंत विशेषोपलक्षणार्थं समर्थानामिति
च निर्दिष्टो षष्ठीतत्र तुल्यजातीयस्य निर्द्धारणादयमर्थः संपद्यते षष्ठ्यंतात्समर्थादिति अपत्यमित्येतस्मिन्नर्थ इति प्रथमो तस्यायमशब्दस्यान्य-
यासंबंधानुपपत्तेरयमध्याहारो लब्धः यथाविहितमिति यथार्थे प्रत्ययमितिविशेषणमपि भावः प्राग्दीव्यतोऽणित्यादिभिर्यो विहितः स
तस्मादित्यर्थः इह तस्येति पुंनपुंसकयोरन्यतरेणायं निर्देशः क्रियते एकवचनांते न चैतेन लिंगांतराद्वचनांतराच्च न स्यात् सुमातुरपत्यं सौमात्रश्च
त्रस्यापत्यं सौमित्रिः उपगोरपत्यमौपगव इति अपत्यमिति चैकवचनेनैव नपुंसके न च निर्देशः क्रियते तेनैकस्मिन्नेवापत्ये स्यान्न द्वयोर्नापि बहुषु न

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ द॰ ४ प्रकृत्यर्थस्यादि प्रकृत्यर्थ उपग्वादिर्विशिष्यतेऽस्येत्यस्य विशेषोपलक्षणार्थत्वात् अपत्यमात्रं चेति· मात्रशब्दोऽयं लिंगवचनयोर्व्यवच्छेदाय लिंगवच
५२ नादिकमिति आदिशब्देन कालस्य ग्रहणं अत्र हि वर्त्तमानकालेन निर्देशोऽस्तीति प्रतीतेः यथोक्तं यत्रान्यत्क्रियापदं नास्ति तत्रास्ति र्भवंतीपरः
प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यत इति ततश्च तस्य कालस्याविवक्षायां कालांतरेणान्यात् सर्वमविवक्षितमिति नांतरीयकत्वादुपादान
स्य अवश्यं हि केनचिल्लिंगादिना निर्देशः कर्त्तव्यः तस्येदमित्यपत्येऽपीति अणादीनां विधानं सिद्धमिति शेषः तस्येदं विशेषा अपत्यसमूहविका
रादयः संबंधसामान्ये पि सर्वविशेषांतर्भावात् ततश्च तस्येदमित्यनेनैवापत्येऽप्यणादीनां विधानं सिद्धं तत्किं योगविभागेनापत्येऽणादयो विधी

प्रकृत्यर्थविशिष्टः षष्ठ्यर्थोऽपत्यमात्रं चेह गृह्यते लिंगवचनादिकमन्यत्सर्वमविवक्षितं उपगोरपत्य
मौपगवः आश्वपतः दैत्यः औत्सः स्त्रैणः पौंस्नः। तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत्· उत्सर्गः शे
षएवासौ वृद्धान्यस्य प्रयोजनं भानोरपत्यं भानवः श्यामगवः॥ ॥५२॥ ॥श्रीः॥ ॥

यंते न तस्यापत्यमित्यत्र इञ्जिष्यपवादैः संप्रयुक्त एवापत्यार्थो निर्दिश्यत इति चोद्यार्थः परिहरति बाधनार्थं कृतं भवेदिति तस्येदमित्यनेन न विधीयमा
नानामणादीनां यो बाधकस्तस्य बाधनार्थमपत्येऽणादीनां विधानं कृतं भवेदित्यर्थः ननु शेषिकस्तु अपत्यादिचतुरर्थ्यपर्यंतेभ्योऽन्योऽर्थः राम॰
स शेषः तत्कथमपत्ये षष्ठ्यर्थसंयोगेन तद्बाधनार्था मित्याह· उत्सर्गः शेष एवासाविति यदि योगविभागमकृत्वा तस्यापत्यमित्युच्येत ५२
तदा प्रकृतिविशेषसंबंधस्यैवापत्यार्थस्योपयोगो नान्योऽपत्यार्थः शेष एवस्यादिति स्यादेव वृद्धाद्यत्वेच्छः योगविभागे त्वपत्यार्थस्याणादिवि
धावुपयोगात् शेषत्वाभावाच्छस्याप्राप्तिरेव स्यादेवात्र प्राप्तिर्बाधेन तु अतेउत्सर्ग इति प्रकृतिसामान्यसंबद्धः सामान्यभूतोऽपत्यार्थ उक्तः बाधनार्थ
स्योदाहरणमाह वृद्धात्स्य प्रयोजनमिति श्यामगव इति श्यामागावोस्य श्यामगुरिति॥ ५२॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥एको गोत्रे॥ ॥एकशब्दोऽयमन्यप्रधानासहायसंख्याप्रथमसमानसाधारणवाची अन्यार्थे तावत् एकामाम्पांसमर्थो भांप्रज्ञामेकारस्तस्य ञि मे का एकान बंधुरपराः न्येरासु इत्येके मन्यंते यजुष्येकेषामिति केचित्तु नयोः प्रयोगयोः केचित् छन्दस्यपीयुः एकशब्दस्यार्थः एकः पार्थो धनुष्मतामि ति प्रधानार्थे आद्यंतवदेकस्मिन् एकहलादौ एकहल्मध्ये असहायार्थे एको द्वौ बहव इति संख्यार्थे एके ल्पमाणा इति प्रथमार्थे तेनैकमद्रिंगिति समानार्थे देवदत्तयज्ञदत्तावेकधनाविति साधारणार्थे तत्र संख्यावचनः साधारणवचनः प्रथमवचनो वा गृह्यते अर्थान्तराणामसंभवात् गो त्रं पारिभाषिके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययात् अपत्याधिकाराद् गोत्रग्रहणाच्च किमर्थमिदमुच्यते पौत्रप्रभृतावपत्ये विवक्षितेऽमू लप्रकृतेरुपग्वादेरेव प्रत्ययो यथा स्यात् औपगवादेः प्रत्ययोत्तरमा भूदिति नैतदस्ति प्रयोजनं साचिविधिवदेतद्भविष्यति तद्यथा धातोर्विधीयमानः

॥ ॥एको गोत्रे॥ ॥प३॥ प३॥ ॥

सन् सर्वतां न भवति तत्कस्य हेतोः आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्तते न च तत्र निर्विधीयमाने सनन्तो धातुः संभवतीति तद्वदिहाप्यप त्यप्रत्यये विधीयमाने नापत्यप्रत्ययान्ता प्रकृतिः संभवतीति ततः प्रत्ययो न भविष्यति विषम उपन्यासः एकः सन् प्रत्ययः विधाय कंचन लक्षणमेकमेव तत्र प्रयुङ्क्ते न तस्मिन्विधीयमाने तदन्ता प्रकृतिः संभवतीति इह पुनस्तस्यापत्यमत इञ् पञ्जिञो श्वेति बहूनि लक्षणानि प्रत्ययाश्च बहवः तत्रैक स्मिन्प्रत्यये विधीयमाने प्रत्ययान्तरेण तदन्ता प्रकृतिः संभवत्येव तथा च गुप्तादीनां सनः सन् भवति जुगुप्सिषत इति किं पुनः स्यादघेतन्नार भ्यते उच्यते इह केचिन्मन्यते पुत्रशब्द पर्यायोऽपत्यशब्दः निघण्टुषु तथा पाठात् लोके च दृष्टत्वात् तद्यथा पितामहस्योत्संगे दारकमासीनं दृष्ट्वा क श्चित् पृच्छति कस्य पुत्रोऽयमिति कस्यापत्यमिति कस्यापत्यमिति स देवदत्तस्य यज्ञदत्तस्येत्युत्पादयितारं व्यपदिशति नापि नं न तत्र पयापितामहं प्रति पुत्रो न भवति तथापत्यमिति उत्पादयितैव कोपत्यते न पुज्यते न तु पितामहादयोऽपीति॥ अन्ये तु क्रियानिमित्तकोऽपत्यशब्दः नयन्तं स

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰४

५६

नेनेसपत्यमितित्रोणादिकोपत्यप्रत्ययः यस्यचयेनापत्यंतत्तस्यापत्यसंबंधहितज्जनितोपिपौत्रादिःपितामहादेस्यतनहेतुर्भवतिप्रसृतेर्हिजाय
मानोवैब्राह्मणस्त्रिभिर्ऋणवाजायतेब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यएषवाअनृणोयःपुत्रीतितेनपुत्रमुत्पाद्यपितृणामनृ
णोभवतीतिप्रतिपादनात्पुत्रोसादितयाप्रजयापितॄणामुपकारोहिश्रूयतेस्मर्यतेचपुत्रेणलोकाञ्जयतिपौत्रेणानन्त्यमश्नुतेअथपुत्रस्य
पौत्रेणब्रध्नस्याप्नोतिविष्टपमितिइहास्मेपुववज्ञारत्नकारवारिषुमहतीवाक्तीमवहितज्जनितोप्युपकारकइतिमत्रकारश्चशाहविराम्रेडीभि
धिकःस्त्रत्रयत्ययत्पौत्रप्रभृतिगोत्रमितितत्तोविज्ञायतेक्रियातेमित्तकोप्यपत्यशब्दइतिअन्यथापथापौत्रप्रभृतिःपुत्रस्यनुपपन्नं
तादृगेवनस्यादेवंमतिसाक्षात्परंपरयावापस्यउत्साद्यःसर्वत्रप्रत्ययस्यमितिसर्वेपिपितामहादयोप्यपत्येनयुज्यंतेनत्रत्यादपितैवेतित
त्राद्येपक्षेयद्येतन्नास्येततनतत्रतत्रापत्येतत्रपितृवचनात्सप्रत्ययःस्यात्तुयथाउपगोरपत्यमपत्यस्यौपगविस्तस्यौपगवस्यापत्यंनःएवंद्वा
ततमेपत्येएकोनशततमपत्यप्रत्ययमाइस्यनिष्टंप्राप्नोतिद्वंचनमिद्यतिऔपगवइतितलीयादेरुपगुप्रत्ययनपत्यत्वातछितीयेत्यप
गोःपंचमःपूर्वेषांचतुर्णामपत्यंततोयदौपगोःप्रत्ययस्तदौपगवइतीष्टंतावत्सिद्ध्यतिअनिष्टमपिचप्राप्नोतितत्त्वानिष्टमनिपतत्यौ
पगवादौपगविस्ततऔपगवायनस्ततऔपगवायनिरितिपंचमेत्रीएयनिष्कानिषष्टेचत्वारीसेवंप्राप्नोतिथमपत्यमभिधित्सितेताव
तिद्धनान्यनिष्ठानिप्राप्नुवंतितद्यथाशततमेप्रष्टोनवतिश्चेतिएवंस्थितेइदमारभ्यतेआरभ्यमाणेप्यत्रस्मिन्वादिप्रथमःपक्षस्तत्राप्यपीत
ततोविध्यर्थमेतत्स्यातनियमार्थंवाकथंचेद्विध्यर्थंकथंवानियमार्थंयदिगोत्रशब्देनपौत्रप्रभृत्यपत्यसमुदायएकेकमपत्यमभि
धीयतेततोविध्यर्थंनहितथानियमार्थःसंभवतिएकस्मिन्नपत्येअनेकप्रत्ययप्रसंगस्याभावात्ननावदेकस्मिन्प्रयोगेएकस्माःप्रकृ
तेरनेकप्रत्ययप्रसंगःएकेनैवाभिलाषस्यार्थस्यनापिप्रयोगभेदेननानाप्रकृतिभ्योनाप्रत्ययप्रसंगः८सवृद्धास्तुपितृवचनादेवप्रसंग
इतिपरमप्रकृतेस्तत्रीयादावपत्येप्राप्तःप्रत्ययोविधीयतेकथंपुनरेकोगोत्रइत्येतावतिपचनेपरमप्रकृतेःप्रत्ययोविधीयतइतिश
क्यंविज्ञातुंयावतायथापरमप्रकृतेरयोगादप्रासएवमौपगवाच्चतुर्थ्यादिविभिततःकिंनविधीयतेवचनेनयस्यकिमेदातएवंस्वसूत्रवचनेनाप्य
स्यतेगोत्रएकःप्रत्ययोभवतियत्तएकएवप्रत्ययःकर्तुंशक्यतेततएवप्रत्ययोभवतीत्यर्थःएकग्रहणसामर्थ्याद्यायमर्थोलभ्यते॥ ६३ ॥ एम॰

५६

© Dharmartha Trust J&K. Digitized by eGangotri

नन्वविधीयमानेऽपि प्रत्यये प्रकृतिप्रत्ययावयवसंबंधोऽस्यानोवचनसामर्थ्यादपत्यापत्यस्यापत्यलोपचारात् प्रत्ययो भविष्यतीत्यदोषः सुरम्भेऽपत्येव
रितार्थः प्रत्ययो न स्यादिति विधातव्यमपि। अस्मिन्पक्षे सर्वेष्वेकोपगवस्तौऽसिद्ध्यति प्रत्ययमालाप्रसंगस्तत्र स्थ एवं न त्वनेन ततमिति वचनात्समाथः प्र
त्ययः प्रतिषिध्यते तथापि चयमेपत्ये उपगुशब्दादनेन प्रत्यये विहिते तस्यापत्यमित्यण् औपगविः स्यात् पत्यान्तपत्यं पौत्रप्रभृतिगोत्रमित्यपत्यशब्देन
पौत्रप्रभृत्यपत्यसमुदायं लक्षयित्वा तस्यैव गोत्रसंज्ञा विधीयते एकैकस्मिन्नपत्ये गोत्रशब्दप्रयोगः समुदायेषु वृत्ताः शब्दा अवयवेष्वपीति न्यो
यात् अत्र तस्मिन्वा गोत्रशब्देनावयवधर्मेणास्य समुदायस्यापदेशात् पौत्रप्रभृत्यपत्यसमुदायोऽभिधीयते तदा नियमार्थं गोत्रसमुदाये एक एव प्रत्ययो भ
वतीति यद्यप्येकैकस्मिन्नपत्ये एकैकः प्रत्ययः प्राप्नोति तथापि पौत्र एकत्वं दृष्टं तस्य चापरस्तु इति सकलनिरूपणे समुदाये बहवः प्रत्ययाः कृता स्युरिति निय

गत्यपत्यं पौत्रप्रभृति गोत्रं तस्मिन्विवक्षिते भेदेन प्रत्ययपत्यं प्रत्ययोत्पत्तिप्रसंगे नियमः क्रियते गोत्रे एक एव
प्रत्ययो भवति। सर्वैः यत्नेन पुत्रं तेऽपत्यनाद्यपत्यं योऽपि अवस्थितेन जनितः सोऽपि प्रथमप्रकृतेरपत्यं भवत्येव। गार्ग्य
स्यापत्यं गार्गिः गार्गेरपत्यं गार्ग्यः तत्पुत्रोऽपि गार्ग्यः॥ ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

मनुपपद्यते अस्मिन्पक्षे दोषः अनन्तरापत्यप्रत्ययान्तात् तृतीये प्रत्ययः प्राप्नोति गोत्रशब्दोपादानेन हि नियमः क्रियते गोत्र एवेति तत्र गोत्रे
नैकः प्रत्ययो मा भूत् अनन्तर एकः तृतीये चापर इत्येवमनेकः कस्मान्न स्यात् एवमपि गोत्रे एक एव हि कृतो भवति अथ वा गोत्रसमुदाये एकस्मि
न्यायात् तृतीये नेति किं क्रियते तृतीयादेश्चतुर्थादेर्वा प्रसः प्रतिषिध्यते यदि तृतीयादेः स्यात् समुदाये नैकः प्रत्ययः कृतः स्यादिति यत्त्वनन्तरात्
तृतीये प्राप्तः सोऽप्यनुज्ञायते एक एवेति न ह्यो द्वौ नियमेपुता तर्थन तत्र यतः प्रत्यये क्रियमाणे समुदाये नैकः प्रत्ययः कृतो भवतीति ततो न भ
वतीत्येव वचनीयो भवति एवं च चतुर्थस्यापत्यसमन्वयेनाभिधानं न प्राप्नोतीति द्वितीयादुत्पन्नस्य तृतीयमेवाचष्टे न तु तृतीयादुत्पन्न इति किं तु अ
पगवेरपत्यमिति वाक्यमेव पंचमी हेतुवाक्येनाप्यभिधानं न प्राप्नोति न हि तस्मादिवचनः कश्चिदपत्यप्रत्ययान्तः शब्दोऽस्ति येनाभिधीयेत

© Dharmartha Trust J&K. Digitized by eGangotri

परमप्रकृतेस्तृतीयादेरनन्तरविवक्षया प्राप्नोति योगात्तत्तदेवमस्मिन्नस्य परमप्रकृतेश्चोत्पत्तिर्विवक्षा अनन्तरावृत्ततीये प्राप्तस्य प्रतिषेधो वक्तव्यः स्यादेतत् तत्र परमप्रकृतेरुत्पत्तिर्विवक्ष्या अभेदोपचारो गोत्र सिद्धः अभेदोपचारश्चापत्योपगवयोरौपगवत्वत्र पत्ययो वर्तते देवं शक्तत्मेप्य पत्येऽभेदोपचारपरंपरयाऽप्यौपगवशब्दाभिधानं सिध्यति नचैवमभेदोपचारो गोत्रे भ्रमसिद्धः तत्र स्त्वेवं यत्सर्वी भेदविवक्षायां प्रत्ययमालाप्रसंगात् तत्समर्थत्वादिति एवमथानन्तरस्य तृतीयस्य चाभेदविवक्षायां तृतीय औपगविः स्यात् तथा अनन्तरे तृतीयादौ च यत्र प्रत्ययोऽभिधीयते यथा गार्गी तत्राप्यनिष्टप्रसंगः यदि तावत् गार्ग्यो गार्ग्यपचारस्तदा तत्र यस्यापि गार्गिः स्यात् गार्ग्यश्चेष्यते अथापि गार्ग्ये तदपत्यस्य वाऽभेदोपचारः एवमपि गार्गिः स्यादित्तीयादौ विषये दोषवाने वा भेदोपचारः तदेवं प्रथमपक्षे विधौ नियमे च दोषप्रसंगात् द्वितीयः पक्ष आश्रीयते तत्रापि नियमः पक्षेऽप्येकस्मिन्नयोगे एकस्याः प्रकृतेरेक एव प्रत्ययः प्राप्नोति तथाप्युपगोः पंचमे पूर्वेभ्यश्चतुर्भ्यः प्रयोगाभेदेनन्यप्रत्ययप्रसंगे नियमः क्रियते एक एवेति तदिदमुक्तं भेदेन प्रत्ययसंप्रत्ययप्रसंगे नियमः क्रियते ननु न ज्ञायते क एको भवतीति यो वा परमप्रकृतेर्यो वा प्रत्ययान्तादिति न वो कतरस्तुच्यते यदि च प्रत्ययान्तात्प्राप्तः प्रत्ययः स्यादनेकः कृतः स्यात्। कुत्र तावत् पंचमे पूर्वेषां प्रत्ययानामस्मिन्नयोगे प्रसंगः अपत्यान्तरविषयत्वात् अथ गोत्रसमुदाये केनासौ निवार्यते न तावदनेनैव न हि गोत्रसमुदाये गोत्रग्रहणेन गृह्यते अथापि गृह्येत एवमपि न ज्ञायते यो वा परमप्रकृतेर्यो वानन्तरादिति यदि पुनर्गोत्रग्रहणं न क्रियते क्रियमाणं वा यत्समात्रार्थं विज्ञायते नस्यादेष दोषः अपत्यसमुदाये एक एवेति नियमात् अपत्याधिकारे गोत्रग्रहणात्त्वेष दोषो जायते नैष दोषः अपत्यमिति वर्त्तते गोत्रे यत्से एकस्य चापत्यप्रत्ययो भवतीति वचनव्यक्तिः यदि च प्रत्ययान्तात्प्रत्ययः स्याद्यत्सत्ययोऽनेको गोत्रे कृतः स्यात् सामर्थ्येन वा प्रत्ययो विशेष्यते गोत्राभिधाने समर्थानां मध्ये एक एवेति यदि च प्रत्ययान्तात्प्रत्ययः स्याद्गोत्राभिधानसमर्थोऽनेकः कृतः स्यात् प्रथमस्यापि समर्थत्वात् पृथक्पृथगस्मिन्नयोगे पत्यान्तरे च वर्त्तते यं च मं प्रत्यपि सामर्थ्यं तावदस्ति यदि वा तस्यापत्यमित्यादिना प्रकरणेन एक एव प्रत्ययः कर्त्तव्यः क्व गोत्रे यस्मिन्प्रत्यये गोत्रमभिधित्सितं तत्र ये समर्थाः प्रत्ययान्ताश्च प्रत्यये तस्मिन्नेव प्रयोगे प्रकृतिरूपसंपादनाय पापितावदनेकः कृतः स्यात्। यदि वा प्रथमवचनमेकशब्दः कश्च प्रथमः यम् कृत्वा प्रत्ययान्तरं कर्त्तुं न शक्यते साधारणाच्च नोपान्त्यमपत्याधिकाराच्च यः सर्वापत्यसाधारणः स एव गोत्रे भवतीति २४ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

गर्गशब्दाद्यञेव भवतीति गर्गशब्दाद्यो यञ् प्राप्तः स एव भवति न प्रकृत्यंतरेभ्यः प्राप्ताः प्रत्ययान्तरेभ्य इत्यर्थः तदाह प्रत्ययो नियम्यत इति प्रत्ययान्तरं वार्यत
इत्यर्थः एतेन प्रकृतिर्नियम्यत इत्यपि व्याख्यातं अथ वेत्यादि अस्मिन्पक्षे प्रथमवचन एकशब्द इति दर्शितं प्रथमा प्रकृतिरिति सूत्रे तु शब्दापेक्षया पु

।सर्वस्मिन्नवहितत्वन्नितेपि गोत्रापत्ये गर्गशब्दाद्यञेव भवतीति प्रत्ययो नियम्यते । अथ वा गोत्रा
पत्ये विवक्षिते एक एव शब्दः प्रथमा प्रकृतिः प्रत्ययमुत्पादयतीति प्रकृतिर्नियम्यते । गार्ग्यः ना
डायनः ॥ ॥ गोत्राद्यून्यस्त्रियां ॥ ॥ अयमपि नियमो यून्यपत्ये गोत्रादेव प्रत्ययो भवति । अ
स्त्रियां विषये न परमप्रकृत्यनंतरेभ्यः । गार्ग्यस्यापत्यं युवा गार्ग्यायणः । वात्स्यायनः दाक्षायणः
प्लाक्षायणः औपगविः नाडायनिः अस्त्रियामिति किं दाक्षी प्लाक्षी । ॥ ५५ ॥ ॥

ल्लिंगानिर्देश इति दर्शितं एक एव शब्द इति अथ वास्मिन्पक्षे साधारणाच्च न एकशब्दः परमप्रकृतिश्च सर्वप्रत्ययसाधारणी संख्यावचनो वा
प्रथमातिक्रमे कारणाभावात्परमप्रकृतिरेकशब्देन स्व्यते अनयोः पक्षयोः प्रथमा प्रकृतिरेक एव शब्द इत्यर्थतो विवरणं द्रष्टव्यं ॥ ॥ गोत्राद्यूनि ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰१८॰४
५६

॥ अत्राप्यनन्तरस्य मा भूत् । योऽस्मिन्प्रयोगे उत्सादपित्यपत्यपुत्रके गोत्रसंज्ञायां युवसंज्ञया बाधितत्वाद्गोत्रसंज्ञा नास्तीति पूर्वसूत्रे आपाद्य चतुर्थे तत् तीणां संप्रमे चतुर्थी
स्येष्यते पंचमात्प्रत्ययः प्रत्ययान्तादेव प्रसल्पय प्रसल्पा इत्यनिष्टमेव प्राप्नोति अतो हि तेन च पंचमाद्वद्धो युवनित्त नीपात्तुरसति नप्राप्नोतीति तं प्रत्ययं नप्रत्ययं प्रत्यायत्वादिति
न सिध्यति सर्वे सुलपत्यपुत्रकेषु पंचमे युवनि प्रत्ययश्च चतुर्थः प्राप्नोतीति तत्र प्रकृतात् तीयात्तदागार्ग्यायणः इतीष्टं तावत्सिध्यति अनिष्टमपि तु प्राप्नो
ति प्रकृतं तेभ्यो पि प्रत्ययप्रसंगात्सि न इष्ट मारभ्यते । अत्रापि पादि पूर्वः पक्षः प्राप्नोति यतेत तत्तो ॥ विधेयार्थः मेतत्सामान्येन यमार्थो वा पदि युवशब्दे नैकम
पत्यमुच्यते ततः एकस्मिन्नेव गोत्रादगोत्राच्च प्राप्तभावात् चतुर्थे न भवति पंचमाद्यो युवनि गोत्रादिष्वर्थे भवति । अथवा चतुर्थप्रभृत्यपत्य
समुदायो युवशब्देनोच्यते ततो गोत्रात् चतुर्थे चतुर्थादगोत्रात् च युवतीति गोत्रादगोत्रात् च युवसमुदाये प्रत्ययप्रसंगे गोत्रादेवेति नियमार्थं भ
वति तत्र विधौ गार्ग्यायणः इतीष्टं सिध्यति प्रत्ययमालाप्रसंगदोषः स्यादेव तस्मात् वचनात्प्राप्तस्य प्रत्ययस्यानन्तरनिषिद्धत्वात् नियमे चतु
र्थादेः प्राप्तस्य प्रत्ययस्य प्रतिषेधोपपद्यते यदि चतुर्थादेः स्यात् युवसमुदाये गोत्रादपि प्रत्ययः कृतः स्यादिति तत्र श्रवणानिष्टप्रसंगः
किं तु पंचमादेः युवनि गोत्रादुत्पत्तिर्न प्राप्नोतीति तं प्रत्ययं नपायत्वादिति पंचमस्य वाक्येनाभिधानं स्यात् गार्ग्यायणस्यापत्यमिति षष्ठ्यस्तु
वाक्येनापि न सिध्यति नहि तत्सित्स वचनोपपत्त्या प्रातः ; अतोऽस्तिपन्नकिञ्चिदेतत देवमत्रापि द्वितीयः पक्षः आश्रीयते नियमश्चत्तदाह
अपत्याधिनियमिति गोत्राद्यवेति पुसेवे स्येष्ट विपरीत नियमो न भवति एको गोत्र इति नियमाद्यनोऽन्यत्र गोत्रमस्य प्रत्ययप्रसंगाभावात्
न परमप्रकृत्यं न र युवप्रत्ययः ॥ अस्मथाप्रयोगभेदेन तेभ्योऽपि स्यात्· ५५ ॥ ॥७॥ ॥७॥ ॥७॥ ॥ ग्रस॰
५६

© Dharmartha Trust J&K. Digitized by eGangotri

।किं पुनरत्र प्रतिषिध्यत इति सर्वस्मिन्नपि प्रतिषिध्यमाने दोषदर्शनात्प्रश्नः तमेव दोषमाविष्करोति यदि नियम इति तदेकवाक्यत्वात्प्रतिषेधस्ये
तिभावः स्त्रियामनियमः प्राप्नोतीति परमप्रकृत्यनन्तरपूर्वलक्षणाः प्रत्ययाः प्रयोगभेदेन पर्यायेण स्युरित्यर्थः अथ पूर्वप्रत्ययः प्रतिषिध्यते
ति। स्त्रियामिति योगविभागेन प्रसक्तप्रतिषेधाश्रयेण चेति भावः गोत्रप्रत्ययेनाभिधानं न प्राप्नोतीति तद्यथा गर्गादिभ्यो यञ् गार्गी गार्ग्या
यणी अपत्यसामान्यलक्षण एव तु प्रत्ययः स्यात् लिङ्कारणमनभिधानं प्राप्नोतीत्यत आह गोत्रसंज्ञायाः पूर्वसंज्ञया बाधितत्वादिति यथा च बा

।किं पुनरत्र प्रतिषिध्यते यदि नियमः स्त्रियामनियमः प्राप्नोति। अथ पूर्वप्रत्ययः प्रतिषिध्यते स्त्रि
यां गोत्रप्रत्ययेनाभिधानं न प्राप्नोति। गोत्रसंज्ञायाः पूर्वसंज्ञया बाधितत्वात्। तस्माद्योगविभागः क
र्तव्यः गोत्राद्यूनि प्रत्ययो भवति। ततः स्त्रियां स्त्रियां च यूनि प्रत्ययो न भवतीति पूर्वसंज्ञैव प्रतिषिध्य
ते तेन स्त्री गोत्रप्रत्ययेनाभिधास्यते॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥ ॥

धस्तथा नत्रैव वक्ष्यते स्यादेतत् पूर्वप्रत्ययस्य स्त्रियां लुक् करिष्यते कथं यूनि लुगित्यस्यानन्तरं स्त्रियां चेति वक्ष्यामि यूनि लुगित्येव यथा गार्ग्यमतइस्येतन्नि ॥
वृत्तं यद्भावतं डाच्च लुक् स्त्रियां यूनि चेति वक्ष्यामि लुक् स्त्रियामित्येव ततश्च गार्ग्यशब्दादुत्पन्नस्य फको लुकि कृते लुप्तस्याप्यर्थस्य प्रकृतिरेवाहेति
यजन्तात् स्त्रियां वर्तमानान् ङीप्रसङ्गो भविष्यत इति एवमप्यो यगावड्ढाद् दितः ङीप्लुकि कृते अनुपसर्जनाधिकारात् षाणो अनुपसर्जनमित्यु
च्यमाने ईकारो न प्राप्नोति अर्थस्य प्रधानत्वात् यूनि संक्रान्तत्वात् तेन भूदेवं षाणो अनुपसर्जनमिति अगान्तात् अनुपसर्जनादित्येवं भव

© Dharmartha Trust J&K. Digitized by eGangotri

नेवंशकारेइह हि दोषः स्यात् आपिशालिना प्रोक्तं व्याकरणं इञ् श्चेत्यण् तदधीते आपिशला ब्राह्मणी तदधीनरः त्यागाः प्रोक्ताल्लुकिअ
णान्तस्याध्येत्रीं प्रधानस्त्रियां संक्रान्तत्वान्ङी प्राप्नोति तस्माद्गणेनानुपसर्जनमिति वा अप्रयत्नाद्यं स्त्रियां योगविहितः इति वा तथा च सति उपसर्जनी
तीकारेण न प्राप्नोति पच्यच्यत्र प्रत्ययलक्षणेन इञ् उपसंख्यानमिति कारः स्यात् इह तु स्नुत्नुकाद्यनेरयसमोत्सगिकिस्याणो लुकि ङीप् प्राप्नोति
इतो मनुष्यजातेरिति डीष् भविष्यति इह तर्हि यस्क स्यापत्यं स्त्री वा घएणा स्कः तस्यापत्यं स्त्री अणो ऽय इति फिञ् आविर्पा लुकि ई का येन प्रा
प्नोति न च यत्र लुप्तः प्रत्यय ईकारस्य निमित्तं यश्च श्रूयते न स स्त्रियां विहितः उपसर्जनं च तर्हि किंगानिरिश्यत आह तस्मादिति · युवसंज्ञैव प्रति

अतइञ्॥ ॥तस्यापत्यमित्येवं अकारान्तात् प्रातिपदिकादिञ् प्रत्ययो भवति अणोऽपवादः दक्षस्या
पत्यं दाक्षिः प्लाक्षिः तयुरकरणं किंशुभंया कीलालया इत्यतो मा भूत् · कथं प्रदीपता दाशरथापमे
थिली · शेषविवक्षायामणमविष्यति॥ ॥५६॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥

विष्यत इति ननु यूनि यदुक्तं न तत् स्त्रियां न भवती युक्तं न च युवसंज्ञायास्तु कान हि युवसंज्ञायाः प्रागुक्तसंज्ञास्ति चतुर्थादि जीविद्वंशपस्यापत्यस्यो
पलक्षणेयुवशब्द इति दोषः आपस्या हस्वरूपपरो युवशब्दः परिभाषा वेयं यत्र युवशब्दः श्रूयते तत्रास्त्रियामिसुपतिष्ठते जीवति तु वंश्येयु
वा अस्त्रियामिति वा अयमेव पठितव्यमिति॥ ॥अतइञ्॥ ॥अकारान्तात्प्रातिपदिकादिति अतस्तपरगमनइत्यस्य वा अव्युत्पन्नान्ता
नो वाकुर्वदादीनां ग्रहणं न भवति पदि स्यात् स्त्रिवादिपुये या मस्ये नो वा धुनार्थः पाठः शिवप्रोष्ठप्रोष्ठिकप्रभृतीनां तेषां पाठोनर्थकः स्यात्
व्यपदेशिवद्भावादिहापि भवति अस्यापत्यमिरिति यस्येति लोपप्रसंग यमात्रस्य श्रवणं इह तु एरपत्यमस्य युवेति यञ्जिजो श्वेतिप्फकि पस्ये

तिलोपं वा धित्वापरत्वात् द्विद्धौ कृतायां आयायन इति भवति॥ ५६॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥बाह्वादिभ्यश्च॥ ॥क्वचिदिति अजीगर्त्तशिब्दशिरस्कपर्यंतेषु दंतत्वात्सर्वेभ्यो इञ् प्राप्तः तस्य अण्बाधक बाधनार्थं कुरुभ्यश्चेत्यस्य वाधकः प्राप्तः अ
पि सर्वे नकारांताः तेषु च बाहु प्रभृतिषु वर्णां तेषु पुष्करसदादिषु हलंतेषु चावाप्राप्तः वृद्धाश्रुत्वाद्यजिन् कहकलादिभ्यस्त्वाभिकाराप्रा
प्तः शिरसलोमन्निति तरंतेभ्यो स्त्रीहणसंभूयोंभोमितौज सां सलोपश्च पुनः बकारो मे दयक सलोपश्चेति वचनं वैचित्र्यार्थं उदंचु इति पचथ्येन

॥बाह्वादिभ्यश्च॥ ॥बाह्व इत्येवमादिभ्यः शब्देभ्योपत्येऽर्थे इञ् प्रत्ययो भवति बाहविः औपबाहविः अनकारा
र्थ आरंभः क्वचिद्बाधकबाधनार्थश्च। बाहु उपबाहु निबाहु शिवा कुचरा कु अवाकु बिंदु उपबिंदु वृक ऊह
कला हुकला वला काम्रुषिका भगला लाछुगला ध्रुवका धूवका सुमित्रा दुर्मित्रा पुष्करसत्। अनुहरत् दि
वशर्मन्। अग्निशर्मन् भद्रशर्मन् सुशर्मन् कुनामन् सुनामन् पंचन् सप्तन् अष्टन्। अमितौजसः सलो
पश्च सुधावत् उदंचु शिरस माष शराविन् क्षेमवृद्धिन् शृंखलतोदिन् खरनादिन् नगरमर्दिन् प्राकारम
र्दिन् लोमन् अजीगर्त्त कृष्ण युधिष्ठिर अर्जुन शांब गद प्रद्युम्न राम उदंकसंज्ञायां। संभूयोंभसोः सलोपश्च
बाह्वादिप्रभृतिषु येषां दर्शनं लौकिके गोत्रभावेन तेभ्योन्यत्र तेषां प्रतिषेधः॥ ॥ ॥

नानायमुकारांतात्प्रत्ययः किंतु क्विन्नंतात्प्रत्ययः नलोपाभावस्तु निपात्यते उदीचोपस्य मोरांचि: एतत्स वैपैलादिघोदंचिशब्दपाठा दि
ज्ञायते बाह्वादिप्रभृतिषु विनिपभृतिग्रहणेन च स्वमाराणां कुंजादीनां ग्रहणं लोके विदितो लौकिकः गोत्रभावः संज्ञाकारित्वं आदिषु
हुपत्वमित्यर्थः एतच्चास्मापासिद्धं कथमर्थवद्ग्रहणेनानर्थकस्येति अर्थवतां बाह्वादीनां ग्रहणं सवार्थः प्रसिद्धः स्मृतिमतीतेः स्मृतिशा
स्त्रस्य चार्थितो नादित्वा हनाघर्षाभिधापिनामेव ग्रहणं स्यात्॥

© Dharmartha Trust J&K. Digitized by eGangotri

गाड्गनिमकस्थिदितिएवंकुंजोनाममनउोवातस्मादिञेवभवतिकोजिनीद्रितियत्तुकार्यनस्वरूपोपादानेनविधीयतेकिंतुप्रकारांतेणात्रदिद्रानीत
नार्थाभिधायिनामपिभवतिअतद्ग्रेदेवदत्तीरीतिसंबंधिशब्दानांचेतिकार्यापेक्षयाषष्ठीसंबंधिशब्दानांश्वशुरादीनांयत्कार्यमुक्तं तेनस्मात
त्तद्दशोप्रतिषेधोभवतिसंज्ञाश्वशुरस्येतिप्रज्ञापायःश्वशुरःश्वाशुरिरितिउरणादिषुनावउपंचमुसन्निकार्यभवतितेनशावउोरामोवितिपुत्रस्त्र
स्यश्वशुरशब्दस्यनद्याभ्यामित्येषविधिर्नभवतितथामातृपितृभ्यांस्वसेतिषत्वंधात्यमातीरनभवति इदमपिस्मायमिद्धंसंज्ञाश्वशुरस्यादि

गाड्गनिमकस्थिन्तस्यापत्यंबाहवः संबंधिशब्दानांचतत्सदृशात्प्रतिषेधः संज्ञाश्वशुरस्यापत्यंश्वाशुरिः
रात्रेश्वशुरादितिपत्नभवति चकारोनुक्तसमुच्चयार्थः आकृतिगणोत्तामस्यबोधयतिज्ञाघिः ऐंद्रशर्मिः आ
जधेनविः॥ ॥सुधातुरकङ्च॥ ॥सुधातृशब्दादपत्येऽञ् प्रत्ययोभवतितत्संनियोगेनचतस्याकुङादे
शः सुधातुरपत्यंसौधातकिः मासवरुउनिषादचंडालबिंबानामितिवक्तव्यंवैयासकिःबारुडकिःनैषा
दकिःचांडालकिःबैंबकिः॥ ५७ ॥ ॥

नत्वात्संबंधिशब्दस्यानादित्वात्मातृपितृभ्यामित्यत्रापिप्रसिद्धत्वाज्जननीवाचिनोग्रहणंउक्तंचअभिव्यक्तपदार्थायेस्वतंत्रालोकवि
श्रुताःशास्त्रार्थस्तेषुकर्तव्यःशब्देषुनतदुक्तिषुइतिचकारोनुक्तसमुच्चयार्थआकृतिगणतामस्यबोधयतीतिपठितशब्दापेक्षःसमुच्चयइति
इभावः॥ ॥सुधातुः॥ ॥मासवरुडेसादिवेदंसंस्यतीतिवेदव्यासःकर्मण्यणतस्यैकदेशप्रयोगोव्यासइतिभीमसेनोभीमइतिवत्तद
पत्यंजातिविशेषाःनत्वहिवत्किंसंनवक्तव्यमप्रकृत्यंतरात्पवैतानिचार्थिकेनप्रत्ययांतानिअत्रातिक्रमापेनचक्रवाहतेवर्णकिमेवभव
निमासकशब्दाद्दषिवाचिनोपिवाक्यादेराकृतिगणत्वादिञ्भवति॥ ५७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ गोत्रे कुंञ्जा॰ ॥ चकारो विशेषणार्थ इति यद्यत्र चकारेण नाक्षिप्येत ततो व्रातच्फञोरस्त्रियामिति विवक्ष्यं ततो व्रातादिभ्यः फञिसस्यापि ग्रहणं स्यात्
कौञ्जायन्य इति स्वार्थिकस्य बहुषु तु ञ्यादयस्तद्राजा इति तद्राजत्वात् प्रजस्य बहुषु स्त्रियामादिना लुक् । किं पुनरत्र ञित्स्वरो भवति उत च्चित्स्वर इत्यत्राह ए
कवचनाद्विवचनयोरिति तत्र हि च्फप्रत्ययः श्रूयते स च पश्चाद्ञ्य इति तन्निबंधनो ञित्स्वरः सति शिष्टः बहुवचने तु ञ्ये निवृत्ते संप्रधारणा ञित्स्वरो वा
च्चित्स्वरो वेति तत्र परत्वात् ञित्स्वरः प्राप्नोति विल्कणसामर्थ्याच्चित्स्वरो भविष्यति निष्कारणसामर्थ्याद्ञित्स्वरः प्राप्नोति अस्त्यन्यद्धि कारणस्य प्र
योजनं किं द्व्यर्थो ञकारः विकरणो यित इदं स्यन्यत्प्रयोजनं किं विशेषणं ह्यकोत्र विशेषणार्थोसौ नुबंधश्चासंतु तत्र चकारानुरोधाच्चित्स्वरो भ
विष्यतीह स्वार्थोपि तर्हि स्यो नुबंधः शक्यश्चासंक्तुं तत्र ञकारानुरोधाद्ञित्स्वरः प्राप्नोति एवं स्थित इदमुच्यते परमपि ञित्स्वरं सत्कं चित्स्वरस

॥ गोत्रे कुंञ्जादिभ्यश्च्फञ् ॥ ॥ तस्यापत्यमित्येव गोत्रसंज्ञके प्रत्ययार्थे कुंञ्जादिभ्यश्च्फञ् प्रत्ययो भवति इञोपवादः
चकारो विशेषणार्थः व्रातच्फञोरस्त्रियामिति ञकारो वृद्ध्यर्थः कौञ्जायन्यः कौञ्जायन्यौ कौञ्जायनाः ब्राध्नायन्यः ब्रा
ध्नायन्यौ ब्राध्नायनाः गोत्र इति किं कुंञ्जस्यापत्यमनंतरं कौञ्जिः एकवचनद्विवचनयोः सतिशिष्टत्वाच्चित्स्वरो भ
वति बहुवचने कौञ्जायना इति ञित्स्वरं सत्कं चित्स्वर एवेष्यते गोत्राधिकारश्च शिवादिभ्योऽण् इति यावत् कुंञ्ज ब्र
ध्न शंख भस्मन् गण लोमन् शठ शाक शुण्डा शुभ विपाश स्कंद स्कंभ ॥ ॥

वेष्यत इति एवेष्यत इति एवं मन्यते स्वरे योगविभागः कर्तव्यः इदमस्ति चितः चितो अंत उदात्तो भवति ततस्तद्धितस्य चित इत्येव तद्धितस्य चितो अंत उ
दात्तो भवति किमर्थमिदं परत्वात् अपि ञित्स्वरस्य बाधनार्थं ततः कितः कितश्च तद्धितस्यांत उदात्तो भवतीति षाष्ठिकस्तु फप्रत्ययः क्रियते तद्धि
तस्येति योगविभागः शक्यो कर्तुं अथैवं कस्मान्न क्रियते गोत्रे कुंञ्जादिभ्यश्च्फञ् बहुषु फक् नडादिभ्यश्चेति नैवं शक्यं इह हि दोषः स्यात् कौञ्जायनो
नाम यस्य माणवकः कौञ्जायन्यः कौञ्जायनो केन यश्शब्दः श्रूयते एकयोर्हि च्फञ्विधीयते परातु च्फञं तान् ञ्यो विधीयते तदा पुनस्तस्य ञोऽप
क्षत्रियार्षञित इति [redacted] लुकि कृते तद्राजस्येन ञ्यस्य लुकि प्राप्ते गोत्रे लुगचीति प्रतिषेधाद्यशब्दस्य श्रवणं भवति
तथा कौञ्जायन्यस्यापत्यानि बहूनि अत इञो लुकि तद्राजस्यैव बहुषु वर्तमानत्वाद्यञ्यस्य लुकि कौञ्जायना इति भवति ॥ १७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ २॰ ४

५९

नडादिभ्यः फक् ॥ ॥ शलंकु शलंकं चेति हि अपि प्रथमान्तेन शब्दरूपेणापेक्षया नपुंसकनिर्देशः शलंकु इत्येतच्छब्दरूपं शलंकं भवतीति तद्रूपेणापरिणामेन तस्यार्थः इञेवान्यत्रेति वाक्याद्देरादेशेन निगणनादिति भावः अभ्युपेत्यापि गोत्रमात्रे फको विधानं परिहारमाह अथवेति इञो भावस्येति शलंकमागमयतेरख्युपलक्षणमेतत् पूर्वत्र परिहारे तेऽपि शब्दपाठो ज्ञापको वेदितव्यः अग्निशर्मन्वृषगणेष्विति पाठादिति भावः अभ्यु

नडादिभ्यः फक् ॥ ॥ नड इत्येवमादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति॰ नाडायनः चारायणः

गोत्र इत्येव नाडिः शलंकु शलंकं चेत्यत्र पठ्यते शालंकायनः पैलादिषु च शालंकिः पठ्यते शालंकिः पिता

शालंकिः पुत्रः तत्कथं गोत्रविशेषे कौशिके फकं स्मरन्ति इञेवान्यत्र शालंकिरित्यपि वा पैलादिषु पाठ एव

ज्ञापकः सिद्धो भावस्य॰ नड चर बक मुञ्ज इतिक इतिश उपक एक लमक शलंकु शलंकं च सप्तल वाजिन् तिक

माजप्रातिक अग्निशर्मन् वृषगणे प्राणकार श्यापक दाक्षिमित्र द्वीप पिङ्गल किंकर कातर काथल काश्यप का

श्यप नामक अश्व अजा अमुष्य कृष्णरणौ ब्राह्मणवसिष्ठे अमित्र लिगु चित्र कुमार क्रोष्टु क्रोष्टं च लोह दुर्ग

स्तम्भ शिंशपा अग्र कृश करणत मत मित मत स्त्राकु जत अजत रत्वर पुगन्धर अश्व शक डाकिन् हस्तिन् पिङ्गाल

चमसिन् मुद्गल सुस्थिर कवा ह्मण बटक वटर अश्वल खरप कामुक ब्रह्मदत्त उदुम्बर शोण अलोह दण्ड ५९

अग्निशर्मन्शब्दः फक् प्रत्ययाद् पति वृषगणे गोत्रे आग्निशर्मायणो भवति वार्षगण्यश्चेत् अग्निशर्मिरन्यः अमुष्येति प्रमत्तेन शब्दः श

ब्दे प्रातिपदिकान्त्रेपदितमेवि भक्त्यन्तमपाठात् तद्वत्रापि फकि लुक् भवति आमुष्यायणः आमुष्यपुत्रिकेति अन्तु विद्यावुप्ग्रहणं नकन्ते

ऽपि भवति कृष्णरणौ ब्राह्मणवसिष्ठयोरिति कार्ष्णायनो भवति ब्राह्मणश्चेत् कार्ष्णिरन्यः राणायनो भवति वासिष्ठश्चेत् राणिरन्यः क्रौ

॥ ॥ ३ ॥ ३ ॥

रा॰
५९

© Dharmartha Trust J&K. Digitized by eGangotri

॥हरितादिभ्यः॥ ॥हरितादिभ्योऽञ इति अधिकरणोयं चक्रमो हरितादिभ्यः परो योऽञ् तदन्तात्प्रातिपदिकादित्यर्थः ह्यन्नियमारोप्येत रेव
वस्तुतो भावष्टे हरितादिभ्योऽञं तेभ्य इति हरितादिभ्यो गोत्राधिकारेऽपि यूनि प्रत्ययो विज्ञापते तेन चैवं गोत्राधिकारस्य विच्छेद इत्याह गोत्रा
धिकार इति उत्तरार्थं गोत्रग्रहणमनुवर्त्तत एवेत्यर्थः॥ ॥यञिञोश्च॥ ॥गोत्रग्रहणेन यञिञौ विशेष्येते इति गोत्रे यो यञिञौ विहि

॥हरितादिभ्योऽञः॥ ॥हरितादिर्विदाद्यन्तर्गणः हरितादिभ्योऽञन्तेभ्योऽपत्ये फक्प्रत्ययो भवति इञो
ऽपवादः हारितस्यापत्यं हारितायनः कैंदासायनः ननु च गोत्र इति वर्त्तते न च गोत्रात्परो गोत्रप्रत्ययो भव
ति एको गोत्र इति वचनात् सत्यमेतत् इह तु गोत्राधिकारेऽपि सामर्थ्याद्यूनि प्रत्ययो विज्ञायते गोत्राधिकार
स्त्वन्यार्थः॥ ॥यञिञोश्च॥ ॥यञन्तादिञन्ताच्च प्रातिपदिकात्फक्प्रत्ययो भवति गार्ग्यायणः वा
त्स्यायनः इञन्तात् बल्वशिदाक्षायणः प्लाक्षायणः द्वीपादनुसमुद्रं यञ् अस्तु तस्मात् इभ्यः इञित्यनेन
भवति गोत्रग्रहणेन यञिञौ विशेष्येते तदन्तात्तु यून्येवायं प्रत्ययः गोत्राद्यूनीति वचनात्॥ ॥छ॥ ॥

तास्तित्पन्नं न चैवं प्रत्ययार्थस्यापत्यस्याविशेषितत्वादपत्यमात्रे प्रत्ययप्रसंगः इत्याह तदन्तात् यून्येवायं प्रत्ययः इति। एवकारः येन व्यावर्त्तिकः
न केवलमपूर्व एव प्रत्ययो यूनि भवति अपि तु यूनोऽपि केवलादित्याह गोत्राद्यूनीति वचनादिति॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का. प. ४
६०

॥शरद्वत॥ ॥शरद्वदादीनांभृग्वादिभिःसहसंबन्धःकृत्रिमाश्चापिपुत्राःसंतिस्ववंशप्रभवाश्चापितत्रापत्यविशेषणंक्षिपतेतत्रभृगुःशरद्
तोपत्यंनभवतिपूर्वभावित्वात्एवंशुनकस्यवत्सःतस्मादाग्रायणस्यवात्स्यश्चाग्रायणश्चेतिद्वंद्वःपुनःपदाधिकारणात्वचनतयावर्त्तिपदस्यवि
ड्कुचुहन्तेरणिभृग्वितिपञ्जोश्चेतिवगोत्रप्रत्ययस्यलुकतदाहभार्गवश्चेन्नात्स्यश्चेदितिदर्भशाहदत्रापिवचनेनभवतिवाक्यादिषुवायाप्यः
॥ ॥द्रोणपर्वत॥ ॥पूर्वमुक्तंगोत्राधिकारश्चाश्चिवादिभ्योप्यणितियावदितिरिहाप्युक्तंगोत्रइत्येवेतितत्रकोदयतिकथमितिनैवात्रेतिय

॥शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु॥ ॥गोत्रइत्येवशारद्वतशुनकदर्भइत्येतेभ्योगोत्रापत्येफक्प्र
त्ययोभवतिष्याभसंख्यंभृगुवत्साग्रायणेषुप्रत्ययार्थविशेषेषुशारद्वतायनोभवतिभार्गवश्चेत्·शारद्वतोन्यःशौ
नकायनोभवतिवात्स्यश्चेत्शौनकोन्यःदार्भायणोभवत्याग्रायणश्चेत्दार्भिरन्यःशारद्वच्छुनकशब्दौबि
दादीतामस्याभजोपवादःफक्॥ ॥द्रोणपर्वतजीवन्तादन्यतरस्याम्॥ ॥गोत्रइत्येवद्रोणादिभ्यःप्रातिप
दिकेभ्योगोत्रापत्येन्यतरस्यांफक्प्रत्ययोभवतिइञोपवादः।द्रौणायनःद्रौणिः।पार्वतायनःपार्वतिः।जै
वन्तायनःजैवन्तिः।कथमनन्तरोश्वत्थामाद्रौणायनउच्यतेनैगोत्रमहाभारतेद्रोणोगृह्यतेकिंतर्हिनादिः
तरहंगोत्रप्रत्ययविधानेरदानीतनात्तुश्रुतिसामान्यादभ्यारोपेणतथाभि
प्रायग्रहणमप्रीकृतसमवानानन्तर्येदोषमाहसनेवरत्यतइत्येवशब्दस्यार्थःमहाभारतेद्रोणोमहाभारतद्रोणः।अनादिरितिइदानीमि
त्यर्थःवाक्यादिप्रभृतिपिसादिनचैवंप्रणोगस्यात्येतमनुपपत्तिः।तत्राहइदानीन्तिनितिअर्वाचीनादित्यर्थःनपुनर्महाभारतद्रोणो
द्रोणिकालस्समानकालःअनादेरिदानीतनस्यचद्रोणइतिश्रुतिःसमानातेचानादिद्रोणायपेवंद्रुणाश्वत्थाम्नासमानकालस्ति
द्रोणायनादस्युक्तेनेतत्रयदृष्टंगोत्रत्वेनेदश्वत्थाम्न्यपिद्रोणशब्दवाच्यएवत्वानस्यवालितबुद्ध्यःप्रतिपत्तारोध्यारोपयंतितेनाथा

पम०
६०

।।अनृषि।। ।।गोत्र इत्येवेति एतेन पौत्र आषिशब्दाद्विदोर्वप्रभृतयस्तेभ्यो गोत्र एवाञ् यथा स्यादिति गोत्र इत्येतस्येहानुवर्त्तनीयमिति दर्शय
ति ये पुनरिमे अनृषयः तेभ्यः पुनर्गोत्राधिकारे ऽत्यपमर्थे लिप्सत इत्यत्राह अनृष्यानन्तर्य इत्यस्यायमर्थ इति। अनृषीति पच स्यालुकानि इत्यः
आनन्तर्य इति लार्थे य्यञ् एवं च पौत्रा इत्यादावनन्तरस्यैवाभिधानं न गोत्रस्य नायत्ससामानस्यैवायमर्थ इति अस्मिंस्त्वर्थे अनृषिभ्यो न

।।अनृष्यानंतर्ये विदादिभ्योञ्।। ।।गोत्र इत्येव विदादिभ्यो गोत्रापत्ये अञ् प्रत्ययो भवति वैदः और्वः ये पुनरत्रानृषिशब्दाः पुत्रादयस्तेभ्योऽनन्तरापत्य एव भवति पौत्रः दौहित्रः अनृष्यानन्तर्य इत्यस्यायमर्थः ४ अनृषिभ्योऽनन्तरे भवतीति यदयमर्थः कायपत्ये नान्तर्ये प्रतिषेधो न कृतः स्यात्तत्रेदं न सिध्यति इद्धः समभः कामरूपणामिति।। ।।श्रीः।। ।।श्रीः।। ।।श्रीरुद्राय नमः।। ।।

तरापत्ये विषयार्थमिदं भवतीति ततश्च अपत्यत्वेनान्तर्ये अपत्यश्चते अपत्यानि च अपत्यानि तेषां नैरन्तर्ये आषिरूपादयस्सानि निरन्तराणि
यत्र तस्मिन् विषये प्रतिषेधो न कृतः स्यात्तत्र को दोष इत्यत्राह तत्रेदमिति कश्यप आषि तत्स्यापत्यमपृषिरेवं सम नैरन्तर्ये आपत्यस्तेषां सम
मइन्द्र नामतत्र कायपानामिति प्रयोगो नोपपद्यते अपितु मतिर्यञ् जोश्चेति लुक् प्रसंगात् तस्मादनृष्यानन्तर्य इत्यस्य अर्षीणामान
न्तर्ये अवधाने प्रत्ययो न भवतीत्ययमर्थो व्याख्येय इति भावः।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

का·प१·४
६१

प्रयोगं तावद्दर्शयति अनंतरापत्यरूपेणोत्पन्नापत्यसामान्यरूपेणो सार्थः न पुनः क्रीष्मणानंतरापत्ये विधीयते तत्र यथा भूत्वा यदु
त्पादो वस्तुतो भूतविशेषेपि सामान्यविवक्षयालुङ् भवतीति तद्वदिहापि वस्तुतो गोत्रे पितृ इति यस्कारेणापत्य सामान्यस्मरणविवक्षया अ
ष्यणं भवतीत्यर्थः किं पुनः कारणमियं क्लिष्टकल्पना आश्रीयत इत्याह अवश्यं चैतदेवं विज्ञेयमिति· ऋषीणामपत्यानामनंतरापत्यविषयोपस्यप्रति
षेधस्य प्रयोजनः कौशिको विश्वामित्र इति दुष्यतीति किं कारणं विश्वामित्रस्य यस्मात्स्वेनापत्येनानृषिः स्यामपि तु ऋषिरेव स्यामिति तत्र भवान् ऋषिः सं

अनंतरापत्यरूपेणैव ब्राह्मणमिधानं भविष्यतीत्यवश्यं चैतदेवं विज्ञेयं ऋष्यपत्यानंतरापत्यविषये प्रतिषे
धे विज्ञायमाने कौशिको विश्वामित्र इति दुष्यति गोत्र इत्येव बैदिः ननु च ब्राह्मणं भवितव्यं बाह्वादिलक्ष
णेन तेनैवं भवति। बिद। उर्व। कश्यप। कुशिक। भरद्वाज। उपमन्यु। किलालप। किंदर्भ। विश्वानर। ऋ
ष्टिषेण। ऋतभाग। हर्यश्व। प्रियक। आपस्तंब। कूचवार। शरद्वत्। शुनक। धेनु। गोपवन। शिग्रु। बिंदु। भो
जक। भाजन। शमिक। अश्वावतान। श्यामाक। श्यामाक। श्याबलि। श्यापक। श्यापर्ण। हरित। किंदास।
वह्यस्क। अर्कलुष। वध्योग। विष्णुवृद्ध। प्रतिबोध। रथीतर। रथंतर। गविष्ठिर। निषाद। शबल। मठर। सृपा।

न्नः स पुनः स्वापत्येनानृषेः पुत्रः स्यामिति तत्र भवान् गाधिः पूर्वऋषिः संपन्नः स पुनः स्वापत्येनानृषेः पौत्रः स्यामिति तत्र भवान्कुशिको
पि ऋषिः संपन्नः ततश्चैतद्दृष्यानंतर्ये संभवति परस्त्री परशुं चेति द्वितीयानिर्देशादापद्यत इति शेषः परस्त्रीशब्दः प्रत्ययमुत्पादयति परं
शुंचादेशमापद्यते परस्त्रियाः अपत्यं पारशवः ब्राह्मणस्य शूद्रायामूढायामुत्पन्नः स चोच्यते ततः परस्त्री भवति यस्तु परस्तु परभार्याया
कात् सिद्धः पारशवः तत्र पूर्वोत्तरपदसंप्रमोहात्तु शतिकादिकार्यभावः॥ ॥ ६० ॥ ॥ ॥ ॥

ग्राम०
६१

© Dharmartha Trust J&K. Digitized by eGangotri

।।गर्गादिभ्यः।। ।।अपत्यसामान्ये भविष्यतीति अमे तु मनुतंतुशब्दः समुदाय एकः न तु द्वौ शब्दौ पठिताविति वरं तितथा च ब्राह्मणो मानु
तंतव्यमुवाचेति प्रयोगः कालव मनुतंतुक इति काशिकायामिति च प्रवरे कथं मानवीति लोहितादिफाद्रान्त्वि सेन बहेणभाव्यमिति भावः अनंतरापत्य

।।गर्गादिभ्यो यञ्।। ।।गोत्र इत्येव गर्गादिभ्यो गोत्रापत्ये यञ् प्रत्ययो भवति।। गार्ग्यः वात्स्यः। मनुशब्दोऽत्र पठ्यते तत्कथं मा
नवी प्रजा गोत्रे हि स्तु अते अपत्यसामान्ये भविष्यति तत्कथमनंतरो रामो जामदग्न्यः आमः पाराशर्यः गोत्र इत्येवारोपेण
भविष्यति अनंतरापत्यविवक्षायाम् अण्णेव भवितव्यं जामदग्नः पाराशर इति।। गर्ग। वत्स। वाजासे। संकृति। अज। व्याघ्रपा
त्। विदभृत्। प्राचीनयोग। अगस्ति। पुलस्ति। रेभ। अग्निवेश। शंख। पथ। धूम। अवट। अनसध नंजय। वृक्ष। विश्वाव
सु। जनमान।। लोहित। शंसित। बभ्रु। मंडु। मंक्षु। शंकु। लिगु। गुग्गुलु। जिगीषु। मनु। तंतु। मनायी। भूत। कछप। रुक्ष।
तरुक्ष। तलुक्ष। तंड। वतंड। कपि। कत। कुरुकत। अनडुह। कण्व। शकल। गोकक्ष। अगस्त्य। कुंडिनी। यज्ञवल्क।
उभय। जात। विरोहित। वृषगण। रहूगण। शंडिल। प्रतुल। मुद्गल। मुसल। पराशर। जातूकर्ण। मंत्रित। अश्मरथ्य। शर्करा
क्ष। पूतिमाष। स्थूर। अरारक। पिंगल। कृष्ण। गोलुंद। उलूक। विलंब। विषज। विष्यज। भडित। भंडित। दल्भ। चितिक। दे
वहू। इंद्रहू। एकलू। पिप्पलू। बृहदग्नि। जमदग्नि। सुलोभिन्। उक्थ्य। कुटीगु।।

त्यविवक्षायां त्विति गोत्रस्यापीति बोध्यम् तथा च जामदग्न्या वात्स्या इति प्रवरे प्रयोगः वाजा स इति राजशब्दोऽपत्रमुत्सादपतिः असे अस मासे
समासे तु सौवाजिः अहरणावता प्रातिपदिकेन तस्यानित्यत्वज्ञापनार्थो स इति प्रतिषेधः।। ।।२ २।। ।।२ ३।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰४ मधुबभ्र्वोः॥ ॥गा॥ एवं बभ्रुकौशिक इति वक्तव्यं एवं हि हि इष्टं बभ्रुग्रहणेन कर्त्तव्यं भवति तथा तत्र कृतमिसेव॥ ॥कपियोधात्॥ ॥काप्येय इति इतस्त्रा
६२ निज इति इक् बोधिरिति॥ अत्र षिलादिज बाह्वादिर्वा॥ ॥वतण्डाच्च॥ ॥किमर्थमिति वतण्डाल्लुक स्त्रियामिसेव कस्मान्न कृतं किमर्थं योगवि

मधुबभ्र्वोर्ब्राह्मणकौशिकयोः॥ ॥मधुशब्दाद्बभ्रुशब्दाच्च गोत्रापत्ये यञ् प्रत्ययो भवति यथासंख्यं ब्राह्मणे कौशिके
च वाच्ये। माधव्यो भवति ब्राह्मणश्चेत्। माधव एवान्यः। बाभ्रव्यो भवति कौशिकश्चेत् बाभ्रव एवान्यः। बभ्रुशब्दो गर्गादिषु पठ्य
ते ततः सिद्धे यञि कौशिके नियमार्थं वचनं॥ गर्गादिषु पाठो यञ् गणकार्यार्थः सर्वत्र लोहितादिकृतं तेभ्यः इति बाभ्रव्या य
णी॥ ॥कपिबोधादाङ्गिरसे॥ ॥कपिबोधशब्दाभ्यामाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति। काप्यः बौध्यः।
आङ्गिरस इति किं कापेयः बौधिः कपिशब्दो गर्गादिषु पठ्यते तत एव नियमार्थं वचनं आङ्गिरस एव यथा स्यात् लोहिका
द्यर्थश्चागणे पाठः काप्यायनी॥ ॥वतण्डाच्च॥ ॥आङ्गिरस इत्येव वतण्डशब्दादाङ्गिरसेऽपत्यविशेषे गोत्रे यञ् ताद्धि
त प्रत्ययो भवति। वातण्ड्यः। किमर्थमिदं यावता गर्गादिषु वतण्डशब्दो शिवादिषु पठ्यते तत्राङ्गिरसे शिवाद्यणो बाधना
र्थं पुनर्वचनं अनाङ्गिरसे तु भयत्रणठसामर्थ्यात्प्रत्ययद्वयमपि भवति वातण्ड्यः वातण्डः॥ ॥लुक् स्त्रियां॥ ॥आङ्गिर
स इत्येव वतण्डशब्दादाङ्गिरस्यां स्त्रियां यञ् प्रत्ययस्य लुग्भवति। लुकि कृते शार्ङ्गरवादिपाठान्ङीन् भवति वतण्डी। आ
ङ्गिरस इत्येव वातण्ड्यायनी॥ शिवाद्यणि वातण्डी॥ ६१ ॥ ॥ एम०
भाग इति प्रश्नः परिहारो तु शिवादिषु पठ्यते वतण्डो नाम ऋषिः ततः ऋषित्वादणा ग्रामिसिद्धे शिवादिषु तस्य पाठो गोत्रे गर्गादिषु नासमावेशा ६२
र्थः तत्र पक्षान्तराङ्गिरसे समावेशो भवति एवमाङ्गिरसेऽपि स्यादिति। तन्निवृत्त्यर्थो योगविभाग इत्यर्थः॥ ॥लुक् स्त्रियां॥ ॥वातण्ड्यायनी
ति लोहितादि लक्षणः ष्फः। वातण्डीति ऋषिलक्षणो ङीष् विष्यति॥ ६१ ॥ ॥ २ २ ॥ ॥ २ २ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ अश्वादिभ्यः ॥ ॥ पैलत्वं गोत्रप्रत्ययान्ताः प्रयान्त इति वैलस्य आनडुह्य आत्रेय इत्येते तत्र वैलस्य शाङ्खोऽप्येकः कोमलाद्दृश्यते । तिस्य ङं तव
लिनीमराजर्षिः आनडुह्य इहोऽग्गर्गादिषु ज्ञेयः आत्रेय इतश्चानिनुङ् इति ढगंतः शप आत्रेय इति शपशब्दात्फञ् भवति आत्रेयश्चेत् । शापाय
नः आत्रेयादन्यत्र शापिः अनभिन्तो द्विजवाङ्का दिवस्त्रिमेत्वणमेव प्रत्युदाहरन्तिपुंसिजात इति पुंसीति प्रकृतिविशेषणं जातस्यापत्यं

॥ अश्वादिभ्यः फञ् ॥ ॥ अंगिरस इति निवृत्तं अश्वादिभ्यो गोत्रापत्ये फञ् प्रत्ययो भवति । आश्वायनः । आश्मना
यनः । पैलत्वं गोत्रप्रत्ययान्ताः प्रयान्ते तेभ्यः सामर्थ्याद्यूनि प्रत्ययो विज्ञायते । अश्व । अश्मन् । शंख । विद । पुट । रोहित ।
खर्जूर । खर्जल । भडिल । भडिक । भडित । भंडित । प्रकृत । रामोद । क्षत्र । ग्रीवा । काश । गोल । अंक । अर्क । स्वन । ध्वन । प
दा । चक्र । कुल । अविष्ठा । पवित्र । पवित्र । गोमिन् । श्याम । धूम । धूम्र । वामन । विश्वानर । कुट । वश । शप आत्रेयः । जन
। वह । खेड । वेज । पीक्ष । वशंपा । विशाल । गिरि । चपल । चुमेद । दासक । वैल्व । धाप्य । आनडुह्य । पुंसिजातः ।
अर्जुन । अद्रूरक । सुमनस् । दुर्मनस् । आतप । आत्रेयभारद्वाजे । भारद्वाज आत्रेये । कुत्स आतप । किल्व । खदिर ॥
॥ भर्गात्त्रैगर्ते ॥ ॥ भर्गशब्दादपत्यविशेषे त्रैगर्ते गोत्रे फञ् प्रत्ययो भवति । भार्गायणो भवति त्रैगर्तश्चेत् भार्गिरन्यः ॥ ॥

जातायनः स्त्रियां तु जाता । अपत्यं जातेय इति ढगेव भवति अन्यथा लिंगविशिष्टपरिभाषया फजेव स्यात् । आत्रेय भरद्वाज इति आ
त्रेयायनो भवति भारद्वाजश्चेत् अन्यत्रात्रेयः । ऋणः क्षत्रियेपत्ति लुक् । भारद्वाजात्रेय इति अत्रिगोत्रोपलो भारद्वाजगोत्रजे न पुत्रत्वेन गृही
क्रियते तत्राप्रत्ययः स्यादेते पक्षेऽप्य भवति भारद्वाजस्य चेगोत्रं भवति भारद्वाजायनः आत्रेयश्चेत् भारद्वाजोऽन्यः विदाद्यञेव भवति ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

शिवादिभ्योऽण्॥ ॥यथायथमित्यादि तत्राद्यं जेष्विञोपवादः मुनिसंधिभूमिप्रभृतिषितस्थानि जइति ढकः स्त्रीप्रत्ययान्तेषु स्त्रीभ्यो ढक्च इति प्राप्तस्य ढ-
कः। गंगाविपाट्शब्दयोस्तु यस्मिन्प्राप्ते स तन्त्रिकारेगोबोध्यः। जरत्कारुशब्दस्य तु पाठे प्रयोजनं चिंत्यं केचिदाहुः शुभ्रादिष्वयं पठनीयः जारत्कारवः इति य-
था स्यात् तत्र तु ढकासमावेशार्थोस्य पाठ इति ण्यप्रत्ययस्य तु बाधा नेष्यत इति। अत्र हेतुमुदीचामिञित्यत्र वक्ष्यति शुभ्रादिढकाचेति शुभ्रादिभ्यश्चेत्यत्र वक्ष्यति
चकारेणानुक्तसमुच्चयार्थेनाकृतिगणतामस्य बोधयतीति तेन गांगेयः पौंड्रेय इत्यादि सिद्धं भवतीति तदभिप्रायेणोक्तम्। रवणाविश्रवणशब्दौ पठ्येते तेनौ वि-

शिवादिभ्योऽण्॥ ॥गोत्र इति निवृत्तं अतः प्रभृति सामान्येनापत्ये प्रत्यया विज्ञायंते शिवादिभ्योऽपत्येऽण् प्रत्ययो
भवति यथायथमिञादीनामपवादः। शैवः। प्रौष्ठः। तक्षन्शब्दोत्र पठ्यते कारिलक्षणमुदीचामिञं बाधितुं
ण्यप्रत्ययस्य तु बाधा नेष्यते ताक्ष्ण्यः। गंगाशब्दः पठ्यते तिकादिफिञ् शुभ्रादिढकोश्च समावेशार्थं तेन त्रैरू-
प्यं भवति। गांगः। गांगायनिः। गांगेयः। विपाट्शब्दः पठ्यते कुंजादिलक्षणेन च्फञा समावेशार्थं वैपाशः। वै-
पाशायनः। शिव। प्रोष्ठ। प्रोष्ठिक। चंड। भंड। भूरि। संधि। मुनि। कुठार। अनभिम्लान। ककुत्स्थ। कहोड। कह-
य। कबोध। पिंजल। वतंड। तृण। ग्रीवाक्ष। कर्ण। क्षीरह्रद। जलह्रद। परिषिक। गोभिलिक। जटिलिक। बधि-
रका। मंजीरका। वृष्णिका। खंजन। राजल। रेख। आलेखन। विश्रवण। रवण। वर्तनाक्ष। पिटक। पिटाक। तृ-
क्षाक। नभाक। वडाक। ऊर्णनाभ। जरत्कारु। उत्क्षेप। रोहितिक। आर्यश्वेत। सुपिष्ट। पिष्ट। खर्जूरकर्ण। म-
सूरकर्ण। खडरक। तक्षन्। ऋष्टिषेण। गंगा। विपाश। यस्क। लह्य। अयःस्थूण। भलंदन। विरूपाक्ष। भूमि। इला।

श्रवःशब्दस्यादेशो प्रकृत्यंतरे वा वृत्तिविषये तत्समानार्थौ विश्रवसोपत्यं वैश्रवणः रावणः। घञोन घा इति नदीगाचिन्नोये घञः कुल्माप्रभृतय-
स्ते प्यस्तन्नामिका णोपवादे घञच इति ढकि प्राप्ते ऽण् भवति त्रिवेणी त्रिवर्णं चेति त्रिवेणशब्दः अपत्ये त्रैवणः तन्नामिकाणो सिद्धे आदेशार्थं वचनम्। अथा-
ण्ग्रहणं किमर्थं न यथाविहितमित्येवोच्येत एवमुच्यमाने इञादय एव स्युः ते ह्येभ्यो विहिताः पुनरारंभसामर्थ्याद्घो विहितो न च प्राप्तो नियम एवाण्ग्र-
विष्यति इदं तर्हि प्रयोजनं ऋष्टिषेणशब्दोत्र पठ्यते तत्र यथाविहितमित्युच्यमाने इञ् प्राप्तस्य सेनान्तलक्षणो ण्यो बाधकः प्राप्तः तत्रारंभसाम-

© Dharmartha Trust J&K. Digitized by eGangotri

॥अवृद्धाभ्यः॥ ॥अपत्यमन्तर्हितं वृद्धमिति शास्त्रीयार्थं तदेव परिभाषितं तस्याभिग्रहणं वृद्धं वृद्धस्य च प्राचामित्यत्र वृद्धो यूनेति वृद्धमनुप्रत्यभ्य
ते रत्स्त्रीगोत्रमिहादस्तेव वृद्धस्याग्रहणा मित्राहरिह वृद्धिर्यस्येति। अवृद्धाभ्य इति शब्दधर्म इति वृद्धशब्दो यदाऽऽम्रे मतिनं जितं युक्तमापन्न ततस्तदशासे
व शब्दस्यानुप्रत्ययात्। स्त्रीलिङ्गनिर्देशात्तु नदीमानुषीभ्य इत्यनेन सामानाधिकरण्यात् कथं पुनरर्थधर्मेः शब्दवृत्तिना सामानाधिकर
ण्यं अभेदोपचारात् अवृद्धशब्दवाच्यत्वान्नदीमानुष्यावृद्धा उक्ताः नदीमानुषीभ्य इत्यर्थधर्म इति स्वरूपग्रहणं तु न भवतीत्युक्तं

॥अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः॥ ॥वृद्धिर्यस्याचामादिस्तद्वृद्धं अवृद्धाभ्य इति शब्दधर्मः नदीमा
नुषीभ्य इत्यर्थधर्मः तेनाभेदात्प्रकृतयो निर्दिश्यन्ते तन्नामिकाभ्य इति सर्वनाम्ना प्रत्ययप्रकृतेः प्रत्यवमर्शः अवृद्धा
नि यानि नदीमानुषीणां नामधेयानि तेभ्योऽपत्येऽण् प्रत्ययो भवति ढकोऽपवादः यमुनाया अपत्यं यामुनः इराव
त्या अपत्यं ऐरावतः वैतस्तः नार्मदः मानुषीभ्यः चिन्तिताया अपत्यं चैन्तितः शैक्षितः अवृद्धाभ्य इति किं चान्द्रभागा
या अपत्यं चान्द्रभागेयः वासवदत्तेयः नदीमानुषीभ्य इति किं सौपर्णेयः वैनतेयः तन्नामिकाभ्य इति किं शोभना
याः अपत्यं शौभनेयः॥ ॥छ॥ ॥

वचननिर्देशात् नदीमानुषीशब्दयोः संज्ञानयोः अपि ग्रहणं न भवति लौकिकार्थवृत्तिना मानुषीशब्देन साहचर्यात्। तन्नामिकाभ्य इति सर्व
नाम्ना प्रत्ययप्रकृतेः परामर्श इति तास्त्ववृद्धाः प्रकृतयो नामानि यासां नदीमानुषीणामिति बहुव्रीहिः तेनेदमुक्तं भवति यस्यामर्थे एव
निर्दिश्यते तत्रार्थात् प्रत्ययविधानानुपपत्तेस्तद्वाचिनीभ्यः प्रकृतिभ्यः प्रत्ययो विज्ञायते तदिदमुक्तं तेनाभेदात्प्रकृतयो निर्दिश्यन्त इति
तेनार्थेनाभेदात् एतदुक्तं भवति अवृद्धाः शब्दवाच्यास्तन्नामिकायां नदीमानुष्यास्ताभ्योऽण्प्रत्ययो भवति कोऽर्थस्तद्वाचिनीभ्यः प्रत्य
यो भवतीति तदेतदाह अवृद्धानि यानि नामानि इत्येवं चकृत्वा अवृद्धेभ्यो नदीमानुषीनामभ्य इति वक्तव्ये तथा तु न कृतमित्येव कोप

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ पद॰ ५

६४

ऋष्यंधक॥ ॥ ऋषयः प्रसिद्धा वसिष्ठादय इति ऋषयो मंत्रद्रष्टारः तेच प्रसिद्धा वसिष्ठादयः यथा इंद्राद्यो देवताः तेन लोके न परिभाषणीया इति भावः वंशाख्या
इति केषांचिद्वंशानामेता आख्या इत्यर्थः एवं केचिद्वंशाख्या आख्यायंत इति यावत् सम्प्रेयवाहाः सर्वाश्चिधीन्नाधंतेनो त्तरानित्यभिप्रायेणाह इजोपवादइति अत्यादि
प्यइति तत्र ऋष्यणोवकाशः वासिष्ठः इतश्चानिञ इति ढकोवकाशः गौतुलेय ॥ इत्येते ये आत्रेयइत्युभय प्रसंगे परत्वादृक् भवति सेनांतलक्षणस्यावकाशः हा
रिषेणः अत्रहि एति संज्ञायामगा इतिषत्वस्यासिद्धत्वात् सेनांत मेतद्भवति ऋष्यणः स एव जातसेनो नामऋषिः तस्मादुभयप्रसंगे परत्वाच्छ्यो भवति

ऋष्यंधकवृष्णिकुरुभ्यश्च॥ ॥ ऋषयः प्रसिद्धा वसिष्ठादयः अंधकाः वृष्णयः कुरव इति वंशाख्याः ऋ
ष्यादिवचनेभ्यः प्रातिपदिकेभ्योपत्येऽण् प्रत्ययो भवति इञोपवादः अत्र्यादिभ्यस्तु परत्वाड्ढगादिभिरे
व भवितव्यं ऋषिभ्यस्तावत् वासिष्ठः वैश्वामित्रः अंधकेभ्यः श्वाफल्कः राधसः वृष्णिभ्यः वासुदे
वः आनिरुद्धः कुरुभ्यश्च नाकुलः साहदेवः कथं पुनर्नित्यानां शब्दानामंधकादिवंशसमाश्रयणेना
न्वाख्यानं युज्यते केचिदाहुः कथमपि काकतालीयन्यायेन कुर्वादिवंशोद्भवैः सकलैरेव नकुलसहदेवाद
यः शब्दाः सुबहवः संकलिताः तानुपादाय पाणिनिना स्मृतिरूपं निबद्धमिति अथवा ऋष्यंधकवृष्णि
कुरुवंशाख्यायिनित्यास्एव तेषु ये शब्दाः प्रयुज्यंते नकुलसहदेवादयः तत्रेदं प्रत्ययविधानमित्यदोषः ६३

जातसेन्यः एवमुदीचामिञ जातसेनिः अंधकाणोवकाशः श्वाफल्कः राधसः स एव उग्रसेनान्धकादुभयप्रसंगे परत्वाच्छ्यो भवति औग्र
सेन्यः वृष्ण्यणोवकाशः वासुदेवः एष एव स एव विष्वक्सेनाद्वृष्णेर्वैष्वक्सेन्यः कुर्वणोवकाशः नाकुलः राधसः स एव भीमसेनात्कुरोर्भैमसेन्यः
काकतालीयन्यायेनेति यदृच्छया संकरेणोति ग्रावा तेरसंकीर्णाइत्यर्थः संकलिताः संहताः सुबहव इति बहुत्वेन पिधाताः सर्वेइत्यर्थः
अनित्यो वा अनयेत्यपि नित्यस्यान्वाख्यानं इदं यथा शकान्य येगकालस्य अ यवे यादित्रिपुरुषाणक्तेना मनुव्यादित्य नेन न्यायेनांधकादिवंशा ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मातुरुत॥ ॥द्वैमातुर इति तद्धितार्थे द्विगुः पश्चात्तद्धितः एकस्या औरसः सुतः अपरस्याः कृत्रिम इति द्वैमातुरः तं सांमातुर इति प्राप्ते समासात्तद्धि-
तः भाद्रमातुर इति विशेषणसमासात् तेनेयादिना अर्थभेदः स्त्रीलिंगनिर्देशस्य फलं दर्शयति धान्यमातुरिति धान्यं यो मिमीते स धान्यमा-
ता याजकादित्वात् षष्ठीसमासः धान्यमातुरपत्यं मातृशब्दः तस्य ग्रहणं न भवतीत्यर्थः तेन संमिमीते तस्यापत्यं सांमात्र इत्युत्वं न भवति मापानुवादश्चा-
पं स्त्रीलिंगनिर्देशः संबंधिशब्दस्य हि प्रसिद्धतरत्वात् तस्यैव ग्रहणं स्यात् संख्यासंभद्रपूर्वाया इति किं मितिनं तावत् केवलात्संख्यासंगः न हि मातुरपत्यमिति
विशेषणं संभवति अपत्ये मातृसंबंधस्याव्यभिचारात् तेन तदंतस्य ग्रहणात् संख्यादिपूर्वस्य तावत्सिद्धमिति प्रश्नः अन्यपूर्वस्यादित्युत्तरं सौमात्र इति

मातुरुत्संख्यासंभद्रपूर्वायाः॥ ॥मातृशब्दात्संख्यापूर्वात्संभद्रपूर्वाच्चापत्येऽण्प्रत्ययो भवति उकारश्चान्ता-
देशः द्वयोर्मात्रोरपत्यं द्वैमातुरः त्रैमातुरः सांमातुरः भाद्रमातुरः उकारादेशार्थं वचनं प्रत्ययः पुनरुत्सर्गे-
णैव सिद्धः स्त्रीलिंगनिर्देशोऽर्थोपलक्षणः तेन धान्यमातुर्ग्रहणं न भवति संख्यासंभद्रपूर्वाया इति किं सौमात्रः
शुभ्रादिपाठात्तु वैमात्रेयः॥ ॥कन्यायाः कनीन च॥ ॥कन्याशब्दादपत्येऽण्प्रत्ययो भवति ढकोऽपवादः त-
त्संनियोगेन कनीन आदेशो भवति कन्याया अपत्यं कानीनः कर्णः कानीनो व्यासः॥ ॥

क्वचिदस्यानन्तरं ग्रन्थः शुभ्रादिपाठाद्वैमात्रेय इति तेन विसर्गो मातृशब्देन प्रत्युदाहृतम् इति भावः वयं ब्रूमः स्त्रीभ्यो ढगित्यत्रापि स्त्रीप्रत्ययविज्ञानादस्मात-
र्थग्रहणे इह न भवति ऐ उ विशेष भद्र इत्यस्यानन्तरमयं ग्रन्थः इह तु लेखकैः प्रमादाल्लिखित इति॥ ॥कन्यायाः॥ ॥ढकोऽपवाद इति अचर इति शेषः प्राप्तस्य
कन्याया अपत्यं कानीन इति शास्त्रोक्तं विवाहसंस्कारपूर्वस्य पुरुषसंप्रयोगस्याभावः कन्याशब्दनिमित्तं न तु सतयोनित्वं यातु विवाहसंस्कारेण विनापु-
रुषेण संप्रयुज्यते सा कन्यात्वं न जहातीति तेनैतत् न तु नोढा स्त्री यस्य इति कन्यायाः अपत्यम् अथापि यस्मिन् न सा कन्या कन्या चापत्यं चेति विप्रतिषिद्धमिति अपर आ-
ह पुनरिदं तावन्माहात्म्यात् पुयोगेऽपि न कन्यात्वं जहाति यथा कुन्ती यथा सत्यवती मात्रोदाहरणमिति तदाह कानीनः कर्णः कानीनो व्यास इति॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ४
६५

॥विकर्ण॥ ॥अत्र वत्सादीनां मूलप्रकृतीनां विकर्णादीन् प्रत्यपत्यत्वायोगात् प्रत्ययान्तानां वात्स्यादीनां शब्दानां द्वन्द्वे युगपद् अधिकरणवचनतया प्रत्येकं
बहुत्वोपजननात् तस्य बहुत्वस्य लोपिभिरेव कृतत्वात् प्रत्ययस्य लुका निर्देशः तद्गृहे एव कर्णो भवति वात्स्यश्चेदित्यादि॥ ॥स्त्रीभ्यो ढक्॥ ॥स्त्रीग्रह
णेनेत्यादि स्वरूपग्रहणं तु न भवति बहुवचननिर्देशात् तदर्थस्यापि ग्रहणं न भवति विमातृशब्दस्य तदर्थस्य शुभ्रादिषु पाठात् तस्य तु तदर्थत्वं विधावो

॥विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु॥ ॥विकर्णशुङ्गच्छगलशब्देभ्यो यथासंख्यं वत्सभरद्वाजात्रिष्वपत्य
विशेषेष्वण् प्रत्ययो भवति वैकर्णो भवति वात्स्यश्चेत् वैकर्णिरन्यः शौङ्गो भवति भारद्वाजश्चेत् शौङ्गिरन्यः छागलो
भवत्यात्रेयश्चेत् छागलिरन्यः शुङ्गाशब्दः स्त्रीलिङ्गमप्यस्ति तेन ढकं प्रत्युदाहरन्ति शौङ्गेय इति रूपमविशेषेण तस्यामण्
उभयथाप्यत्रप्रणयनात्॥ ॥पीलाया वा॥ ॥तन्नामिकाण्णो वा ढकं च इति ढकि प्राप्ते प्रत्ययः पक्षे विधीयते
पीलाया अपत्येऽण् प्रत्ययो भवति पीलाया अपत्यं पैलः पैलेयः॥ ॥ढक् च मण्डूकात्॥ ॥मण्डूकशब्दादपत्ये ढ
क् प्रत्ययो भवति चकारादण् इञ् च तेन त्रैरूप्यं भवति माण्डूकेयः माण्डूकिः माण्डूकः॥ ॥स्त्रीभ्यो ढक्॥ ॥स्त्रीग्र
हणेन यावादिस्त्रीप्रत्ययान्ताः शब्दा गृह्यन्ते स्त्रीभ्योऽपत्ये ढक् प्रत्ययो भवति सौपर्णेयः वैनतेयः स्त्रीप्रत्ययविज्ञा
नात् स्वरूपग्रहणमिह न भवति इञ्विशेषसंज्ञासोपत्ये ऐडविडः दारदः इति बहुवचनात् स्वेषां ताद्यः ढगेव योगविभागः स
तः अपत्यमात्रसन्तानोपकृष्य ढक् विधीयते तेनापत्ये वाडव इति भवति अथ कुञ्चाकोकिलात् ततः कुञ्चायाः

शब्दस्याह च पाणिनिर्येषांचिच्च स्त्रीशब्दस्य स्वरितत्वं प्रतिज्ञायते स्वरितेन चाधिकार एव गम्यते इति तेन यावादिस्त्रीप्रत्ययान्तानामेव ग्रहणं कुञ्चाकोकिलात्प्र
लुगेव यथा नास्य ऐडविडः दारद इति ऐडविडशब्दाज्जनपदशब्दात् क्षत्रियादञ् मगधकलिङ्गेत्यण् तयोः स्त्रियामवन्तिकुन्त्यादिति लुक् ततस्त
द्यपत्ये ढगेव भवति। ढगेव गम्यत इति। ढकोऽपवादः तेन चार्थे न विशेषविहितेनापत्यलक्षणो ढक् बाध्यते तेनापत्ये ढगेव भवति वाडव इति चतु
ष्पाद्भ्यो विलातात्। अथ कुञ्चेति ढगिति नापेक्ष्यते अपत्यमेवास्य विधिः ढकोऽपवादः कुञ्चा च कोकिला च समाहारद्वन्द्वे नपुंसकत्वं॥ ६४॥

राम॰
६५

© Dharmartha Trust J&K. Digitized by eGangotri

॥ष्यङः॥ ॥तन्नामिकाणोपवाद इति अस्मात्पूर्वेणैव सिद्धत्वात्॥ ॥शुभ्रादिभ्यः॥ ॥यथायोगमित्यादि तत्राहं ते बिडोपवादः शलाकादिषु तन्ना
मिकाणः विधवाशब्दात्तु सुद्वालक्षणाण्ढक् चतुष्पाद्भ्यो ढञिति चतुष्पाल्लक्षणाण्ढञः गोधाशब्दात्क्रोड्यादिलक्षणः वचनात्सोऽपि भवति ढक् चित् इत्संसर्गिकि

॥ढक्॥ ॥स्त्रीभ्य इत्येवं ढकः स्त्रीप्रत्ययान्तादपत्ये ढक् प्रत्ययो भवति तन्नामिकाणोपवादः दत्ताया अपत्यं दात्तेयः गौप्तेयः॥ ढक् इति
किं यमुनाया अपत्यं यामुनः॥ इतश्चानिञः॥ ॥स्त्रीग्रहणं निवृत्तं चकारोऽनुवर्तत्स्यानुकर्षणार्थः इकारान्तात्प्रातिपदिकाद
निञन्तादपत्ये ढक् प्रत्ययो भवति आत्रेयः नैधेयः इत इति किं दाक्षिः अनिञ इति किं दाक्षायणः प्लाक्षायणः ढक् इत्येव मरीचेरपत्यं
मारीचः॥ ॥शुभ्रादिभ्यश्च॥ ॥शुभ्र इत्येवमादिभ्यः प्रातिपदिकेभ्योऽपत्ये ढक् प्रत्ययो भवति यथायोगमिञादीनामपवादः
शौभ्रेयः वैष्टपुरेयः चकारोऽनुक्तसमुच्चयार्थः आकृतिगणतामस्यैवोधयति तेन गाङ्गेयः पाण्डवेयः इत्येवमादि सिद्धं भवति॰ शु
भ्र॰ विष्टपुर॰ ब्रह्मकृत॰ शतद्वार॰ शतावर॰ शलाका॰ शालाचल॰ शलाकाभ्रू॰ लेखाभ्रू॰ विमातृ॰ विधवा॰ हकशा॰ रोहि
णी॰ रुक्मिणी॰ दिशा॰ स्थूला॰ शालूक॰ अजवस्ति॰ शकन्धि॰ लक्ष्मणश्यामयोर्वासिष्ठे॰ गोधा॰ कृकलास॰ अणीव॰ प्र
वाहण॰ भरत॰ भारत॰ मृकण्डु॰ सृकण्डु॰ कर्पूर॰ इतर॰ अन्यतर॰ आलीढ॰ सुदत्त॰ सुवक्षस्॰ सुदामन्॰ कद्रू॰ तुद॰ अकशाप॰
कुमारिका॰ किशोरिका॰ कुशोरिका॰ जिह्माशिन्॰ परिधि॰ वायुदत्त॰ शकल॰ शवल॰ खडूर॰ अम्बिका॰ अशोका॰ शुद्धपिं
गला॰ खडोन्मत्ता॰ अनुदृष्टि॰ जरतिन्॰ बलीवर्दिन्॰ उग्र॰ वीज॰ अश्वन्॰ अश्मन्॰ अश्व॰ अजिन॥ ॥विकर्णकुषीतका
त्काश्यपे॥ ॥विकर्णशब्दात्कुषीतकशब्दाच्च काश्यपे यत्ये विशेषे ढक् प्रत्ययो भवति वैकर्णेयः कौषीतकेयः काश्यप इति
किं वैकर्णिः कौषीतकिः॥ ॥भ्रुवो वुक्च॥ ॥भ्रूशब्दादपत्ये ढक् प्रत्ययो भवति तत्संनियोगेन च वुगागमः भ्रौवेयः॥ ॥
कल्याण्यादीनामिनङ्॥ ॥कल्याणी इत्येवमादीनां शब्दानामपत्ये ढक् प्रत्ययो भवति तत्संनियोगेन च इनङादेशः स्त्रीप्रत्ययो

णाः पाण्डवेय इति ढलोपोऽकद्र्वा इति लोपो न भवति क इति पर्युदासेन स्त्रीलिङ्गस्य ग्रहणात् पाण्डवशब्दात् प्रत्ययः लक्ष्मणश्यामयोर्वासिष्ठ इति॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰ ४ लाभस्सेयो भवति वा मिश्रश्चेत् लाक्षणिकस्य उपामेयो वा सिद्धः ग्रामायनो मः अश्वादित्वात्फञ्॥ ॥कुलटाया वा॥ ॥कुलान्यटतीति कु
६६ लटेति मूलविभुजादित्वात् दर्शनात्कः प्रत्ययः पचाद्यच् तु न लभ्यते अकारान्तानुपपदात्कर्मण्यपि परो विप्रतिषेधेन परप्रसंगात् या तु कुलान्यट
ती शीलं भिनत्तीति एकत्र कुले प्रविश्य सैरिणीया कुलान्तरमटतीति साधुः शीला कुलटेत्यर्थः। शुद्राभ्यो वेति परत्वात् ढ्रक् अंगहीनाः शी

तानामात्रे शार्थं ग्रहणं प्रत्ययस्य सिद्धत्वात् अन्येषामुभयार्थे। काल्याणिनेयः सौभागिनेयः दौर्भागिनेयः।
हृद्गसिन्ध्वन्ते उभयपदवृद्धिः॥ कल्याणी। सुभगा। दुर्भगा। बंधकी। अनुसृष्टि। अनुदृष्टि। जरती। बलीव
र्दी। ज्येष्ठा। कनिष्ठा। मध्यमा। परस्त्री॥ ॥कुलटाया वा॥ ॥कुलान्यटतीति कुलटा पररूपं निपातनात् कुल
टाया एयण् प्रत्ययो भवति तस्मिन्नियोगेन वा इन् ऊर् आदेशो भवति आदेशार्थं वचनं प्रत्ययस्तु पूर्वेणैव सि
द्धः। कौलटिनेयः कौलटेयः। या तु कुलान्यटती शीलं भिनत्ति ततः शुद्राभ्यो वेति परत्वात् ढ्रक् भवति कौल
टेरः॥ ॥चटकाया ऐरक्॥ चटकाया अपत्ये ऐरक् प्रत्ययो भवति। चाटकैरः। चटकाच्चेति वक्तव्यम् चटकस्या
पत्ये चाटकैरः। स्त्रियामपत्ये लुग्वक्तव्यः चटकाया अपत्यं स्त्री चटका॥ ॥गोधाया ढ्रक्॥ ॥गोधाया अप रूप॰
त्ये ढ्रक् प्रत्ययो भवति। गौधेरः। शुभ्रादिषु पठ्यते तेन गौधेय इत्यपि भवति॥ ६५ ॥ ॥श्रीः॥ ॥ ६६

लहीनाश्च पापपुनर्भूः शालिनिकया सुशीलापि कुलान्यटतीति तस्या इह ग्रहणं॥ ॥चटकायाः॥ ॥स्त्रीलिंगनिर्देशात् पुल्लिंगाच्च प्रसज्यते इत्य
हचटकाच्चेति वक्तव्यमिति एवं च पुल्लिंगनिर्देश एवं कर्तव्यः लिंगविशिष्टस्य ग्रहणं चेत्स्त्रीलिंगादपि भविष्यतीति तथा तु न कृतमित्येव स्त्रियाम
पत्ये लुग्वक्तव्यः इति चटकाया अपत्यमिति चटकस्यापीति द्रष्टव्यम्। चटके मिलुप्ते लुकि तिराणो लुकि कृते पुनः राजादिलक्षणाभावः अमाघ॥ ६५॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥आरकः॥ ॥एकाम्सिद्धलादिति न लक्षणेन पदकारा अनुवर्त्याः सवग्रहेऽपि नास्ति विशेषः। ज्ञापकार्थं त्विति भावप्रधानो ज्ञापकशब्दः ज्ञापनार्थ
मिति वा पाठ्यं जांडारः यांडारः इति दृष्टान्ताः स्यंप्रत्यय इति एकानास्ति सिद्धिः॥ ॥शुभ्राभ्यः॥ ॥अंगहीना इति काणादयः शीलहीना इति अनिय
तपुंस्का दासीप्रभृतयः॥ ॥ढकिलोपः॥ ॥कथं पुनरित्यादि ढ इति धौ टावादि स्त्रीप्रत्ययान्तानां ग्रहणाच्छुभ्रादिषु स्वापाठात् प्रश्नः॥ एतदेवेत्य

॥आरगुदीचां॥ ॥गोधाया अपत्ये उदीचामाचार्याणां मतेन आरक् प्रत्ययो भवति। गौधारः। आचार्यग्रह
णं पूजार्थं वचनसामर्थ्यादेव पूर्वेण समासे ढ्रक्भविष्यति आरग्वचनमनर्थकं एकाम्सिद्धलान्न ज्ञापकार्थं तु स्य
यमस्मेभ्यो विभक्ती तिजांडारः यांडारः॥ ॥शुभ्रादिभ्यो ढण्॥ ॥ढ्रगनुवर्त्तते नारक् शुभ्रा अंगहीनाः शीलही
नाश्च अर्थधर्मेण तदभिधायिनः स्त्रीलिंगाः प्रकृतयो निर्दिश्यन्ते शुभ्रादिभ्यो वाः पत्ये ढ्रक् प्रत्ययो भवति। ढकोप
वादः काणेरः काणेयः दासेरः दासेयः॥ ॥पितृष्वसुश्छण्॥ ॥पितृष्वसृशब्दादपत्ये छण् प्रत्ययो भवति
अणोपवादः पैतृष्वस्रीयः॥ ॥ढकि लोपः॥ ॥पितृष्वसुः छण् प्रत्यये ढकि परतो लोपो भवति पैतृष्वसेयः क
थं पुनर्हि ढक् प्रत्ययः एतस्मेव ज्ञापकं ढको भावस्य॥ ॥मातृष्वसुश्च॥ ॥पितृष्वसुरित्येतद्रूपे स्वृतेपितृष्वसुर्य
दुक्तं तन्मातृष्वसुरपि भवति छण्प्रत्यये ढकि लोपश्च मातृष्वस्रीयः मातृष्वसेयः॥

दिनत्ययतो निमित्तभावः संभवति॥ ॥मातृष्वसुः॥ ॥पितृष्वसुरित्येतद्रूपे स्वृत इति विकारेणानुकृष्यत इत्यर्थः तदनुक्तं तोयोर्थः संपद्यते तं
दर्शयति पितृष्वसुर्यदुक्तमिति किं पुनस्तदित्याह छण्प्रत्यये ढकि लोपश्चेति तेनानंतरस्य विधिर्वा भवति प्रतिषेधो वेति ढकि लोपस्य प्राप्नोति
न तु छणिति न चोदनीयमिति भावः॥ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का० प२० ५
६७

॥चतुष्पाद्भ्यः॥ ॥कमंडलुशब्दश्चतुष्पाद्वचनोस्ति दृश्यते हि कमंडलुपदस्यादधीनेति जंबुः सृगालः ढे लोपो कद्र्वा इति भस्योवर्णोत्तिस्य लोपः॥ ॥गृष्ट्यादि॥ ॥अणादीनामिति आदिशब्देन टकः बहुवचनं तु प्रकृतिभेदेन तयोरेव बहुत्वात् तत्र यास्ति मित्रयुशब्दयोरणोपवादः शेषाणामितश्चानिञ इति टकः गृष्टिशब्दोपत्यमिस्म कत्यस्य स्नात्री सर्वैव गृष्टिर्न धेनोः दृश्चतुष्पादेवेति भावः अयमाह सह स्मस्तु तत्व स धार्मेणा चतुष्पद्दीय पिगोणाः गृष्टिशब्द इति॥ ॥राजश्वशुराद्यः॥ ॥क्षत्रियजातिश्चेदिति प्रकृतिप्रत्ययसमुदायेन क्षत्रियजातिश्चेत्

॥चतुष्पाद्भ्यो ढञ्॥ ॥चतुष्पादभिधायिनीभ्यः प्रकृतिभ्योपत्ये ढञ् प्रत्ययो भवति अणादीनामपवादः॥ कामंडलेयः॥ शैतिवाहेयः॥ जांबेयः॥ ॥गृष्ट्यादिभ्यश्च॥ ॥गृष्ट्यादिभ्यः शब्देभ्योपत्ये ढञ् प्रत्ययो भवति अणादीनामपवादः॥ गार्ष्टेयः॥ हार्ष्टेयः॥ गृष्टिशब्दो यश्चतुष्पाद्वचनः ततः पूर्वेणैव सिद्धः अचतुष्पादर्थं वचनं॥ गृष्टि॥ हृष्टि॥ हलि॥ फलि॥ बलि॥ बस्ति॥ कुड्डि॥ अजबस्ति॥ मित्रयु॥ ॥राजश्वशुराद्यः॥ ॥राजशब्दात् श्वशुरशब्दाच्चापत्ये यत्प्रत्ययो भवति यथाक्रमम् अणोपवादः॥ राजन्यः॥ श्वशुर्यः॥ राज्ञोपत्ये जातिग्रहणं राजन्यो भवति क्षत्रियजातिश्चेत् राजनोन्यः॥ ॥क्षत्राद्घः॥ ॥क्षत्रशब्दादपत्ये घप्रत्ययो भवति॥ क्षत्रियः॥ अयमपि जातिशब्द एव क्षात्रिरन्यः॥ ६६ ॥ राम० ६७

न्यत्रेत्यर्थः राजन्य इति पेवा भावकर्मणोरिति प्रकृतिभावः राजनो न्य इति स पुनर्वैश्यः शूद्रो वा तस्यान्यः अन्नितिप्रकृतिभावः ॥क्षत्रात्॥ ॥घप्रत्ययो भवतीति शब्द एव न तरसमर्पणोस्मस्त्या सर्वत्रैव प्रत्ययपादयो बाइति तासमर्थाग्रहणात् प्रत्ययादेर्घकारस्येयादेशवचनमनुपपन्नं स्यात् तन्न चतुष्पाद्धृत्वं घ ... चेति न प्रवाच्य कोशेत्र त्रापि स्राशब्दः सानुबंध उपात्तः अनुबंधस्तु संसर्गार्थ इति संभवात् ङ मुणिन्त्यमितिवृत्तिं कृमिरंभ्यां बोध्य स्यत्रापि तरसमर्थयोरेवादेशात्वं विज्ञायते॥ अयमपि जातिशब्द एवेति राजन्यजात्यभिधाने घो भवति वैश्यशूद्रयोरुत्साहितेन

॥कुलात्खः॥ ॥उत्तरसूत्र इत्यादि पूर्वपदप्रतिषेधस्यैतत्प्रयोजनं आढ्यकुलादेर्मा भूदिति यद्ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादेवाढ्यकुलादेर्न भवि
ष्यति पश्यति त्वाचार्यो नायं प्रतिषेधः कुलशब्दे प्रवर्त्तत इति नात्र तावत्तदन्तस्य ग्रहणं येन विधिस्तदन्तस्येत्यत्र स्वरूपमित्यनुवृत्तेः केवलस्यापि ग्रहणं सामान्यापेक्षं ज्ञा
पकं प्रातिपदिकश्रुतिमतीयं परिभाषा कुलशब्दे न प्रवर्त्तत इति तेन मध्यपदे शिवद्राको प्रातिपदिकेन तस्या अप्यप्रवृत्तिः कुलीन इति उत्तरसूत्रे अन्यतरस्यां ग्रहणात् के
वलात्पयनेन खो भवति प्रशस्तो वंशः कुलं तस्यापत्यं तत्प्रभवस्यापत्यमित्यर्थः॥ ॥अपूर्वपदात्॥ ॥ननु च पूर्वपदशब्दः समासावयवे रूढः न तस्य कुलशब्दे

॥कुलात्खः॥ ॥उत्तरसूत्रे पूर्वपदप्रतिषेधादिह तदन्तः केवलश्च गृह्यते कुलशब्दान्तात्प्रातिपदिकात्केवला
च्चापत्ये खप्रत्ययो भवति। आढ्यकुलीनः श्रोत्रियकुलीनः कुलीनः॥ ॥अपूर्वपदादन्यतरस्यां यड्ढकञौ॥ ॥
कुलादित्येव। अविद्यमानं पूर्वपदं यस्य तदपूर्वपदं समाससंबन्धिनः पूर्वपदस्याभावेन कुलशब्दो विशेष्यते अ
पूर्वपदात्कुलशब्दादन्यतरस्यां यत् ढकञ् इत्येतौ प्रत्ययौ भवतः ताभ्यां मुक्ते खोपि भवति। कुल्यः कौलेयकः कु
लीनः। पदग्रहणं किं बहुव्रीहिर्यथा स्यात् बहुकुल्यः बाहुकुलेयकः बहुकुलीनः॥ ॥महाकुलादञ्खञौ॥
॥महाकुलशब्दादञ्खञौ प्रत्ययौ भवतः। अन्यतरस्यां ग्रहणानुवृत्तेः खश्च। माहाकुलः माहाकुलीनः म
हाकुलीनः॥ ॥दुष्कुलाड्ढक्॥ ॥दुष्कुलशब्दादपत्ये ढक्प्रत्ययो भवति अन्यतरस्यामित्यनुवृत्तेः खश्च। दौ
ष्कुलेयः दुष्कुलीनः॥ ॥स्वसुश्छः॥ ॥स्वसृशब्दादपत्ये छप्रत्ययो भवति अणोऽपवादः स्वसुरपत्यं स्वस्रीयः॥
॥भ्रातुर्व्यच्च॥ ॥भ्रातृशब्दादपत्ये व्यत्प्रत्ययो भवति चकारात् छश्च अणोऽपवादः भ्रातृव्यः भ्रात्रीयः। तकारः स्वरार्थः॥

प्रसंग इत्यत आह समासंबन्धिन इत्यादि समाससंबन्धिपूर्वपदं कुलशब्दस्यापि कथंचित्संबन्धि भवति द्वयोरप्येकसमासावयवत्वात् अवस्थावचनस्तु नैवात्र
शंकनीयः पूर्वपदशब्दस्य समासावयवे रूढत्वात् तेन देवदत्तः कुलीन इत्यादौ वाक्ये प्रतिषेधशंका न कार्या बहुव्रीहयोपीति अपूर्वादित्युच्यमाने बहुकुलशब्दे
बहुचास्य पूर्वं इति ततः प्रत्ययो न स्यात् किं च देवदत्तः कुलीन इत्यादावपि प्रतिषेधः स्यात्तस्माद्दूरपरिग्रहार्थमपि पदग्रहणं कर्त्तव्यं॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ ५२॰४
६८

॥व्यन्सपत्ने॥ ॥ननु च नित्यं सपत्न्यादिष्विति सपत्नीशब्द एव स्त्रीलिङ्गो व्युत्पादितः तत्कथं पुल्लिङ्गस्य प्रयोगस्तत्राह सपत्नशब्द इत्यादि इवार्थ इति सादृश्ये य-
था सपत्नी दुःखहेतुस्तथा शत्रुरपीत्येतत्साधर्म्यं समुदायेन चेदिति एतेन समुदायार्थः सपत्नो न प्रकृत्यर्थः नापि प्रत्ययार्थविशेषणं अत्र अनर्थकावेवात्र प्रकृ-
तिप्रत्ययाविति दर्शयति। अथानुहन्तस्यापत्यस्य विशेषणमेव सपत्नः कस्मान्न भवतीत्यत आह अपत्यार्थोऽत्र नास्त्येवेति एतदेवोदाहरणेन स्पष्टयति पाप्म ॥

॥व्यन्सपत्ने॥ ॥सपत्नशब्दः शत्रुपर्यायः शब्दान्तरमव्युत्पन्नमेव सपत्नीशब्दादपरेऽकारमिवार्थे
निपातयन्ति सपत्नीव सपत्नः भ्रातृशब्दाद्व्यन्प्रत्ययो भवति समुदायेन चेदमित्रः सपत्न उच्यते
अपत्यार्थोऽत्र नास्त्येव। पाप्मना भ्रातृव्येणेति। भ्रातृव्यः कण्टकः॥ ॥रेवत्यादिभ्यष्ठक्॥ ॥ ॥६७॥
रेवत्यादिभ्योऽपत्ये ठक्प्रत्ययो भवति यथायोगं ढगादीनामपवादः रैवतिकः आश्वपालिकः।
रेवती। अश्वपाली। मणिपाली। द्वारपाली। वृकवञ्चिन्। वृकग्राह। कर्णग्राह। दण्डग्राह। कुक्कुटा-
क्ष॥ ॥६७॥ ॥६७॥ ॥६७॥ ॥६७॥ ॥६७॥ ॥६७॥ ॥

नाभ्रातृव्येणेति न हि पाप्मा भ्रातुः पुत्रो भवति अतः सपत्नमात्रे भ्रातृव्यशब्दस्य दर्शनादपत्यार्थोऽत्र नास्ति किं च योऽपि सपत्नो भ्रातुरपत्यं संभवति सो-
ऽप्यावृद्धत्वाद्भ्रातृव्यशब्दात्सपत्नरूपेणैव प्रतीयते नापत्यरूपेण तथा च भ्रातृव्यो भ्रातृव्य इति सहप्रयोगोऽपि नासंगतो भवति अतः सुष्ठूक्तमपत्या-
र्थो नास्त्येवेति॥ ॥रेवत्यादिभ्यः॥ ॥ढगादीनामपवाद इति तत्र रेवतीशब्दो ङीबन्तः अश्वमणिद्वारशब्देषूपपदेषु पालयतेः कर्मण्यणि ङीबन्ते
वृकवञ्चिर्वुकस्य प्राप्तः वञ्चु प्रलम्भने अस्माद्वृकोपपदात्कर्तर्युपमान इति णिनिः अस्मादृगाणप्राप्तः वृककर्णादिषूपपदेषु ग्रहेः कर्मण्यण्। कुक्कुटशब्दे वाक्षि

॥ पाण्डवकुलक्रमः श्रेष्ठः ॥
पत्रं ६८

© Dharmartha Trust J&K. Digitized by eGangotri

ग गोत्रस्त्रियाः॥ ॥पारिभाषिकस्य गोत्रस्य ग्रहणमित्याह अपत्यं पौत्रेति लौकिकस्य त्वपत्यमात्रस्य ग्रहणं न भवतीत्यर्थः तत्र स्त्रियाः इत्येवं त्र्या त्र ढ्छहे
न प्रकृतस्यापत्यस्य परम स्त्री टे वत तस्यैलाभात् गार्गीति गार्गी शब्दे यञश्चेति ङीवितः तस्य भस्याढे तद्धित इति पुंवद्भावेन पुंशब्दस्यातिदेशान्न गार्ग्यशब्दो
गोत्रस्याभिधायिनः प्रत्ययः यस्येति च आपत्यस्य च तद्धिते नातस्मिल्लोपयलोपौ ग्लोचुकायन इति ग्लुचुकस्यापत्यं प्राचामवृद्धात्फिन्बहुलमिति फिन
इतो मनुष्यजातेरिति ङीषस्तस्य पुंवद्भावेन निवृत्तिः ततः प्रत्ययः णस्य णित्करणमत्र वृद्ध्यर्थं गार्ग्यादौ प्रकृतेरेव वृद्धत्वात् इह तु वर्तते उस्यापत्यं गोत्रे स्त्री वि
ग्रे अञ्च लुक् स्त्रियां वर्तते ङीतस्या अपत्यं वा तं रो जाल्म इति पुंवद्भावेन ङीनि निवृत्ते लुक् स्त्रियामित्यस्य गोत्रे लुगचीति प्रतिषेधात्तत्प्रकृत्यादेव प्रत्ययः इहच
गार्गी अपत्यं स्त्री गार्गी सा भार्या यस्य गार्गीभार्य इत्यत्र जातिश्चेत्येवं पुंवद्भावप्रतिषेधमिच्छन्ति गोत्रं च चरणैः सहेत्यपत्यमात्रं गृह्यते तेन वृद्धिनिमित्त

॥गोत्रस्त्रियाः कुत्सने ण च॥ ॥अपत्यं पौत्रप्रभृति गोत्रं गृह्यते गोत्रं या स्त्री तदभिधायिनः शब्दात् ण प्रत्ययो भवति चकाराट्ठक् कुत्सने गम्यमाने। पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य कुत्सा। गार्ग्या अपत्यं गार्गो जाल्मः। गार्गिकः। ग्लुचुकायन्या अपत्यं ग्लौचुकायनो ग्लौचुकायनिकः। गोत्राद्यूनीति प्राप्ते प्रत्ययो भवतः। गोत्रमिति किं। कारिकेयो जाल्मः। स्त्रिया इति किं। औपगविर्जाल्मः। कुत्सन इति किं। गार्गेयो माणवकः॥ ॥

स्य चेति पुंवद्भावप्रतिषेधो न प्रयोजनं किंच गार्गी अपत्यं स्त्री त्यत्रार्थे नास्ति प्रत्ययः अस्त्रियामिति प्रवर्तमानस्यापि निषेधो नात्र स्त्रीत्वं वा वर्तते तत्र कौ
गोत्र इति नियमान्नैकोऽत्र प्रापयांतादपरो गोत्रप्रत्ययः संभवति तेन नास्ति गार्गी नतरां गार्गी भार्या अपर आह अस्ति गार्गी कथं गार्गी अपत्यं या स्त्री
न सा पुंवतीति नापि गोत्रं न हि सा गार्ग्यस्यापत्यं पौत्रप्रभृते स्त्र्यापत्यस्य गोत्रसंज्ञा विधीयते तदभावादेको गोत्र इति नियमाभावः ततश्च णस्याभावादस्ति गा
र्गीति येन तु नास्ति गार्गी सा कुत्सनमंते माता वंशः पितृवंशस्तद्भावपिं शोप्रनीयमपत्यं भवति अपात हेतुला त ततश्च गार्ग्या अपत्यं या स्त्री गार्गायणी
पत्नं भवत्येव पौत्रप्रभृत्यपत्यस्य ग्रहणं च प्रवृद्धितापत्योपलक्षणं तेन गार्गायणीस्थानापत्याः गोत्रत्वादेको गोत्र इति नियमात्प्रापयांतराभाव इति वृद्धौ
लुक् विवक्षा तेगोत्राद्यूनीति प्राप्ते ण प्रत्ययो भवतीति तदप्यस्मिन्नेव पक्षे घटते तदाहि गार्ग्या अपत्यं पुमान्युवाभवति गार्गेयो माणवक इति मातामहादे

का॰ प॰ ४ ॥ वृद्धाट्ठक ॥ ॥ अत्र वृद्धिर्यस्याचामादिस्तद्वृद्धमिति वृद्धसंज्ञयेनेन तत्पदसमं तर्हितं वृद्धमिति शास्त्रान्तरपरिभाषितं उत्तरसूत्रे हि वक्ष्यति फिञो

६९ ग्रहणं न फिनः वृद्धाधिकारादिति सौवीरेष्विति प्रकृतिविशेषणमिति गोत्रस्त्रियाश्च पतो गोत्रग्रहणानुवृत्तेर्गोत्रप्रत्ययान्तात् प्रकृतिस्तया

॥ वृद्धाट्ठक् सौवीरेषु बहुलं ॥ ॥ कुत्सन इत्येव सौवीरेष्विति च प्रकृतिविशेषणं वृद्धात्सौवीरगोत्रा
दपत्ये बहुलं ठक् प्रत्ययो भवति कुत्सने गम्यमाने । भागवित्तेरपत्यं भागवित्तिकः । तार्णविंदवस्य
तार्णविंदविकः । पक्षे यथाप्राप्तं फक् । भागवित्तायनः । पक्षे तार्णविंदविः । आकशापः शुभ्रादिः
आकशापेयः तस्यापत्यं आकशापेयिकः । पक्षे आकशापेयिः ॥ ॥ ९८ ॥ ॥ श्रीरामः ॥

विशेषणमित्यर्थः वृद्धात्सौवीरगोत्रादिति इदमपि पारिभाषिकस्यैव वृद्धस्य ग्रहणं वर्तते अन्यथा सौवीरेषु यद्वृद्धं तस्मादिति वक्तव्यं स्यात् राम॰
त्ते भवन्ति। खरविशदमभ्यवहार्यं भक्ष्यमुच्यते सत उत्कर्षाधानं संस्कारः भ्राष्ट्रे संस्कृता भक्षा भ्राष्ट्राः कैलासाः भक्षा
इति किं पुष्पपुटे संस्कृतो माला गन्धः॥१६॥ शूलोखाद्यत्॥ ॥शूलशब्दादुखाशब्दाच्च सप्तमीसमर्थात्संस्कृते
भक्षा इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति अणोऽपवादः शूल्यं मांसं उख्यं॥१७॥ दध्नष्ठक्॥ ॥दधिशब्दा
त्सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति दध्नि संस्कृतं दाधिकं ननु च संस्कृतार्थे प्राग्वहते
ष्ठक् चेत्यस्ति तेनैव सिद्धं नहि ह्रतिरश्चाहितत्संस्कृतं परस्य दधिस्तत मेवोत्कर्षाधाने हेतुः लल्टदधिकेवलमाधा
रभूतं तदर्थात्तरे मालवरणादिना तत्र संस्कारः क्रियते॥१८॥ उदश्वितोऽन्यतरस्याम्॥ ॥उदश्वित्शब्दात्सप्तमीसम
र्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे अन्यतरस्यां ठक्प्रत्ययो भवति पक्षे यथाप्राप्तमण् च भवति। औदश्वित्कं औदश्वितं
॥१९॥ क्षीराड्ढञ्॥ ॥क्षीरशब्दात्सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे ढञ्प्रत्ययो भवति अणोऽपवादः क्षीरे सं स्कृता क्षैरेयी यवागूः॥२०॥

स्नेहाद्यनुगतान्न भवति स्वांगे संस्कर्तव्यस्याभावात्कथमुखोऽग्निरिति न ह्यसौ भक्षः भवाद्यादिना हित्वा द्रष्टव्यः॥ ॥दध्न॥ ॥इह तु दधि केवलमाधा
रभूतमिति यथा शूले संक्रियमाणस्य मांसस्य शूलं पच्यत्र दध्यपि संस्कारकं तथापि न तद्विवक्षितं किं तु तदाधारस्य ड्रणीतो लोपः संस्कारः सम्भव
ति वक्षित इति भावः॥ ॥उदश्वितः॥ ॥औदश्वित्कमिति इसुसुक्तान्तात्कः॥ ॥क्षीरात्॥ ॥अत्र संस्कृतमित्येव संबध्यते न भक्षा इति तेन एवा ग्वामपि भवति क्षैरेयी तिटिड्ढाणञित्यादिना ङीप॥

का.प.८.४ ॥सास्मिन्पौर्णमासी॥ ॥ततश्चेद्विवक्षेतीति ततः प्रत्ययान्ताल्लोकस्य विवक्षा भवति चेत् । एवं प्रत्ययो भवतीत्यर्थः संज्ञायामिति समुदायोपाधि
८४ रिति एतदेव स्पष्टयति प्रत्ययान्तेन चेदिति । पौषी पौर्णमासीति । लुबविशेष इति पौर्णमास्यां लुप् भवतीति पूर्वमेवोक्तं भृतकमासे चेति । भृता एव
भृतकाः कर्मकरास्तेषां मासः कर्मकरणादारभ्य त्रिंशद्रात्रलक्षणः स यदा पौष्या पौर्णमास्या तद्वान् भवति यस्तु तस्य न मासो वाऽस्य पदे शभा
(कृतत्रेत्यर्थः तुल्यमेव फलमिति किं पुनस्तदित्याह प्रयोगानुसरणमिति । एषार्थोऽन्या संज्ञाशब्देन तुल्यतामिति । तुल्यफलतामित्यर्थः इति करण

॥सास्मिन्पौर्णमासीति संज्ञायां॥ ॥सेति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासम
र्थं पौर्णमासी चेद्भवति इतिकरणस्ततश्चेद्विवक्षा संज्ञायामिति समुदायोपाधिः प्रत्ययान्तेन चेत्संज्ञा गम्यत इति मासार्द्धमाससंव
त्सराणामेषा संज्ञा । पौषी पौर्णमासी अस्मिन्पौषो मासः पौषोऽर्द्धमासः पौषः संवत्सरः इह न भवति पौषी पौर्णमासी अस्मि
न्दशरात्र इति भृतकमासे च न भवति इतिकरणस्य च संज्ञाशब्दस्य च तुल्यमेव फलं प्रयोगानुसरणं तत्र किमर्थं द्वयमुपादी
यते संज्ञाशब्देन तुल्यतामितिकरणस्य ज्ञापयितुं न ह्ययं लोके तथा प्रसिद्धः संज्ञार्थत्वेन तु संप्रतिज्ञापिते पञ्चत्रतन्त्रो च्यत इ
तिकरणस्ततश्चेद्विवक्षेति तदुपपन्नं भवति । अथ पौर्णमासीति कोऽयं शब्दः पूर्णमासादण् पौर्णमासी अथवा पूर्णिमाः
पूर्णिमाः पूर्णिमास इयं पौर्णमासी मा इति चन्द्र उच्यते॥ २१ ॥ ॥ एम° ८४

सञ्ज्ञापयितुमिति किं पुनरिदं ज्ञापकस्य साध्यं तत्राह न ह्ययमिति ज्ञापनस्य प्रयोजनं दर्शयति संज्ञार्थत्वेत्विति । संज्ञाशब्देन तुल्यफल इत्यर्थः प्र
वृत्तिभेदे न चायमर्थो ज्ञाप्यते इति संज्ञायामिति द्वितीया प्रवृत्तिः इह शास्त्रे संज्ञायामित्यस्यार्थे इति आद्येऽवेदितमर्थे इति परिभाषा संपद्यते । पू
र्णिमासादणिति । पूर्णो मासोऽस्यामिति यथाविति बहुव्रीहौ प्रज्ञादेराकृतिगणत्वादस्मादेव वा निपातनादण् मा इति चन्द्रमा उच्यत इति चन्द्रमसश्चा
द्येकदेशप्रयोगः सत्यभामा भामेतिवत्॥ ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥आग्रहायण्य॥ ॥अग्रेहायनमस्याः स्यात् आग्रहायणी प्रज्ञादेराकृतिगणत्वादण् । सर्वपदार्थसंज्ञायामिति णत्वं । अश्वत्थेन युक्ता पौर्णमासी अश्वत्थस्य इति निपातना तौ पौर्णमास्याम विलुप्त॥ ॥सास्य॥ ॥यागसंप्रदानं देवतेति । यद्यपि देवशब्दो मनुष्यादिव ज्ञातिवचनः स्वार्थिकस्तल् तथापि सम्प्रदायशब्दाद्देवता शब्दो यागे ईश्वरादि मात्रो यद्यत्र संप्रदानत्वेन चोदितं तत्र सर्वोत्र वर्त्तते नस जातिविशेषः सर्वः । देयस्य पुरोडाशादेः स्वामिनीति दिवेरैश्वर्यकर्मणो देवता

॥आग्रहायण्यश्वत्थाट्ठक्॥ ॥सास्मिन्पौर्णमासीति सर्वमनुवर्त्तते आग्रहायणीशब्दादश्वत्थशब्दाच्च प्रथमासमर्थात्पौर्णमास्युपाधिकादस्मिन्निति सप्तम्यर्थे ठक् प्रत्ययो भवति । अणोपवादः आग्रहायणिको मासः अर्द्धमासः संवत्सरः एवमाश्वत्थिकः॥ २२॥ विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः॥ ॥फा ल्गुन्यादयः पौर्णमासीशब्दास्तेभ्यो विभाषा ठक् प्रत्ययो भवति सास्मिन्पौर्णमासीति संज्ञायामित्येतस्मिन्वि षये निसमणि प्राप्ते पक्षे ठगविधीयते । फाल्गुनो मासः फाल्गुनिको मासः श्रावणः श्रावणिकः कार्त्तिकः का र्त्तिकिकः चैत्रः चैत्रिकः॥ २३॥ सास्य देवता॥ ॥सेति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भव ति यत्तत् प्रथमासमर्थं देवता चेत्सा भवति यागसंप्रदाने देवता देयस्य पुरोडाशादेः स्वामिनी तस्मिन्नभिधेये प्रत्ययः इंद्रो देवतास्य ऐन्द्रं हविः आदित्यं बार्हस्पत्यं दैवतेति किं कन्या देवदत्तस्य । कथमैन्द्रो मंत्रः मंत्रस्तत्सम पि दे वते मुपचरंति । कथमाग्नेयो वै ब्राह्मणो देवतयेति॥ ॥

शक्तस्तु सन्निदर्शयतिस्वं वक्तव्यो गाग्ठं तु पित्र्यपोपत कालेभ्यो भववदिति वचनमुपपद्यते न त्यत्तु षपित्र्यं सिद्धा जातिरास्नितथापि दैवतं दे वदेवता मिति प्रयोगो यथं वमेवोपपद्यते कथमिति । पुरोडाशादिरूपस्य देयस्याभागादिर्यस्य संप्रदानत्वेना ह्वानि प्रश्नः । मंत्रस्तु सामर्थ्यादिनानेनोपचो रिकत्वं प्रयोगस्यो अतेश्च पितृ मुख्येरा नप्रयोगः यागसंप्रदाने सार्वलौकिकः प्रयोगः अयं तु नेह क्वा नामिसिता गम्यविशेषः उपचरंति ति ब्रुवते प्रयुंजत इ

का॰प्र॰४
८५

उपमानादिति काषायोगई भस्यकरणीविति वर्णो णोयं प्रयोगस्यार्थः सेतिप्रकृत इति प्रकृतं हि साम महाराजं संज्ञणसंबद्धमिति तितरनुवर्त्तो संज्ञाया
अप्यनुवृत्तिः स्यात्॥ ॥कस्येत॥ ॥किमेतिभक्तो कदेशं कृत्वा कस्येति निर्दिष्टमित्याशंकामपनयति कशब्द इति। एवं च कृत्वा कापानुव्रहीति
संप्रैषः कस्मात् अनुब्रूहीति न कस्मै देवाय हविषा विधेमेति तु ऋचां रसः स एव भावः परि द्वाशी अवमस्यामित्यादिवत् कापमिति रत्वे कृते पस्येति लो

उपमानादुद्विष्यति महाराजप्रोष्ठपदाद्दुजितियावत्साम्य देवते समधिकारः सेतिप्रकृते पुनः समर्थ
विभक्तिनिर्देशः संज्ञाविहितस्यार्थः॥ २४॥ कस्येत॥ ॥कशब्दो देवतायाः प्रजापतेर्वाचकः ततः ए
वेतीवाणप्रत्ययः सिद्धः इकारादेशार्थं वचनं कस्य इकारादेशो भवति प्रत्यय सन्नियोगेन कायं हविः का
यमेककपालं निर्वपेत्॥ २५॥ शुक्राद्धन॥ ॥शुक्रशब्दात्साम्य देवते सेतस्मिन्विषये घन्प्रत्ययो भवति
अणोपवादः शुक्रियं हविः शुक्रियोध्यायः॥ २६॥ अपोनप्त्रपान्नप्तृभ्यां घः॥ ॥ अपोनप्तृ अपान्न
प्तृ इत्येताभ्यां घप्रत्ययो भवति साम्य देवते सेतस्मिन्विषये अणोपवादः अपोनप्त्रियं हविः अपान्नप्त्रियं ह
विः अपोनपात् अपान्नपादिति देवतानामधेये एतयोस्तु प्रत्ययसन्नियोगेन रूपमिदं निपात्यते॥ २७॥

पः प्राप्तः परत्वाद्दिष्ट ह्यावाभ्यां नेभ्रीर्द्विलाभ्यस्यामिति वत् सोमायणिस्तत्र कग्रहणं च क्विपमाणेपयापिय स्येति लोपात्परत्वाद् वृद्धिर्भवति क
तायामपि हृद्भीयस्येति लोपः स्यादेव॥ ॥अपोनप्त॥ ॥अपोनपात् अपान्नपादिति देवतानामधेये इति षोडशादित्वान्नणोः साधुत्वं न
पो स्तु प्रत्ययसंनियोगेनेति एवं च अपोनप्त्रे अनुब्रूहि अपोनपाते नुब्रूहि अपोनपातं यज अपान्नपातं यजेति संप्रैषो वेदे त्वपोनप्त्रे स्वाहेति

एम॰
८५

© Dharmartha Trust J&K. Digitized by eGangotri

॥छ च॥ ॥योगविभागादुत्तरादिसूत्रेस्वत्र एव छ यदुत्तरोपेतिवृत्तौ प्रत्ययो भक्ती अपि हे इति स्यात् तस्यान्यान्तानुदेशः शतरुद्रीयमिति शतशब्दोनतवचनः श
तरुद्रा देवता अस्येति वृत्तौ तयोर्विधानसामर्थ्याद्द्विगोर्लुगनपत्ये इति लुङ् भवति॥ ॥महेन्द्रात्॥ ॥महेन्द्राद्घाणौ चेत्यनुवर्तमाने अनन्तरसूत्रे एवमनुवृत्तौ पठितेन चेति
नो वृत्ति पुनर्ग्रहणं॥ ॥सोमात्॥ ॥सौमीति टित्वान्ङीप् हलस्तद्धितस्येति यलोपः॥ ॥वाय्वृतु॥ ॥वायव्यमिति ओर्गुणः वान्तो यि प्रत्यये पित्र्यमिति रीङ्
ऋतः इति रीङ् यस्येति लोपः॥ ॥द्यावापृथिवी॥ ॥अणोपवाद इति गास्तोष्पति शब्दात् समुच्चयार्थः अपवादः उभयोर्गणः द्यावापृथिव्यावि
ति दिवो द्यावा दिवस्पृथिव्यामिति द्यावादेशः शुनासीराविति देवताद्वन्द्वे चेत्यानङादेशः शुनो वायुः सीर आदित्य इति अन्येतु एकमेव शुनासीरमिन्द्रमाहुः
॥घ च॥ ॥अपोनप्त्रपांनप्तृभ्यां घकारः प्रत्ययो भवति सास्य देवतेत्येतस्मिन् विषये अणोपवादः अपोनप्त्रीयं हविः अपां
नप्त्रीयं हविः योगविभागः संख्यातानुदेशपरिहारार्थः छ प्रकरणे पैंगाक्षीपुत्रादिभ्य उपसंख्यानं पैंगाक्षीपुत्रीयं तार्णबिन्दवीयं शत
रुद्राद्घश्च शतरुद्रीयं हविः शतरुद्रियं हविः॥२८॥ महेन्द्राद्घाणौ च॥ ॥महेन्द्रशब्दाद्घाणौ प्रत्ययौ भवतः चकाराच्छश्च सास्य देवतेत्ये
तस्मिन् विषये महेन्द्रो देवतास्य महेन्द्रियं हविः माहेन्द्रं महेन्द्रीयं॥२९॥ सोमाट्ट्यण्॥ ॥सोमशब्दाट्ट्यण् प्रत्ययो भवति सास्य देवतेत्ये
तस्मिन् विषये अणोपवादः णकारो वृद्ध्यर्थः टकारो ङीबर्थः सोमो देवतास्य सौम्यं हविः सौम्यं सूक्तं सौमी ऋक्॥३०॥ वाय्वृतुपित्रुष
सो यत्॥ ॥वाय्वादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति सास्य देवतेत्येतस्मिन् विषये अणोऽण्यस्य चापवादः सोऽस्य पृथिवी च द्यावापृथिव्योर्न दे
॰ पवादः वायुर्देवतास्य वायव्यं ऋतव्यं पित्र्यं उषस्यं॥३१॥ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च॥
॥द्यावापृथिव्यादिभ्यः शब्देभ्यः छः प्रत्ययो भवति चकाराद्यत् सास्य देवतेत्येतस्मिन् विषये अणो+ वतोऽस्य द्यावापृथिवीयं द्यावापृ
थिव्यं शुनश्च सीरश्च शुनासीरौ देवतास्य शुनासीरीयं शुनासीर्यं शुनो वायुः सीर आदित्यः मरुत्वान् देवतास्य मरुत्वतीयं मरुत्वत्यं
अग्नीषोमीयं अग्नीषोम्यं वास्तोष्पतीयं वास्तोष्पत्यं गृहमेधीयं गृहमेध्यं॥
मरुत्वते यथाहाश्वलायनः इन्द्रो वा शुनासीर इति मन्त्रलिंगं च भवति इन्द्रं वयं शुनासीरमस्मिन् यज्ञे हवामह इति मरुतोऽस्य सन्तीति मरुत्वानिन्द्रः अग्नीषो
मीयमिति ईदग्नेः सोमवरुणयोः वास्तोः पतिर्वास्तोष्पतिः अस्मादेव निर्देशात्षत्वं गृहमेधशब्दमकारान्तं वृत्तौ आमनन्ति मरुद्भ्यो गृहमेधिभ्य उ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ आग्नेयः ॥ ॥ कलेर्ढगिति सत्रो क्रमेवार्थस्मारयति प्राग्दीव्यतीयेष्विति ॥ ॥ कालेभ्यः ॥ ॥ कालविशेषवाचिभ्य इति स्वरूपग्रहणं तु न भवति बहुवचननि
र्देशात् । वक्ष्यमाणसिसादिरभिसतिव्यकरणो कालेभ्यो भवत्सु उच्यमाने यदि तावदेवं संबंधः कालेभ्यो भववेये प्रत्यया विधास्यंते ते सास्य देवतेत्यत्रार्थे भवंतीति देवता
प्रकृतिरविशेषिता स्यात् ततश्च कालाठ्ठञिति ठञ् इंद्रादेरपि प्राप्नोति । अथ पुनरेवं संबंधः भववेये प्रत्यया विधास्यंते ते भवंति कालभ्यो देवताभ्य इति एवमपि भवप्र
यानविशेषिताः स्युः ततश्च दिगादिभ्यो यदिति यत्प्रत्ययोपि भवे विहितः कालवाचिभ्योस्मिन्नर्थे प्राप्नोति अथाप्येवं संबंधः कालेभ्यो भववेये प्रत्ययाः ते भवं

॥ अग्नेर्ढक् ॥ ॥ अग्निशब्दात् ढक्प्रत्ययो भवति सास्य देवतेत्येतस्मिन्विषये अणोपवादः ॥ अग्निर्दे
वतास्य आग्नेयोष्टाकपालः । प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः ॥ ३३ ॥ का
लेभ्यो भववत् ॥ ॥ कालविशेषवाचिभ्यः शब्देभ्यो भववत्प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये ।
कालाट्ठञिति प्रकरणे न भवे प्रत्यया विधास्यंते ते सास्य देवतेत्यस्मिन्नर्थे तथैव स्युः ते तद्र्थमिदमु
च्यते वक्ष्यमाणं सर्वं साद्दृश्यपरिग्रहार्थं मासे भवं मासिकं आर्द्धमासिकं सांवत्सरिकं वासंतं प्रावृषेण्यं ।
तथा मासो देवतास्येति मासिकं आर्द्धमासिकं सांवत्सरिकं वासंतं प्रावृषेण्यं ॥ ॥ ३४ ॥ ॥

रम॰
८६

तिकालेभ्य एव देवतार्थे इति तत्र सकृच्छ्रुतस्य कालशब्दस्यैव मुभय संबंध एव न बहुलभः अथापि लभ्येत एवमपि पितः कश्चित्कालाद्भवे प्रत्ययो यतः कुतश्चिद्दे
वतायाः स्यात् अतुभ्योण मुहूर्त्तादेरपि प्राप्नोतिवतिनिर्देशो तु सति सादृश्यपरिग्रहो भवतिते न्याय्यः प्रकृतिभ्यो येन विशेषणेन भवेर्थे विधास्यंते ये प्रत्ययाः
इहापि ताभ्य एव प्रकृतिभ्यस्तेनैव विशेषणेन त एव प्रत्यया भवंतीति न किंचिदनिष्टं ॥ ८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ महाराज ॥ ॥ महाराजो वैश्रवणः प्रोष्ठपदशब्दात्पूर्वेण नक्षत्राणि प्राप्ते वचनं नवयज्ञ आग्रयणं पूर्णमासादणिति तस्मिन्वर्त्तत इत्येतद्योः पौर्ण-
मासीति पूर्णिमासोऽस्यां तिथौ वर्त्तत इति विग्रहः एवं च व्युत्पत्तिः स्यात्स्मिन्पौर्णमासीत्यत्रापि दर्शिता ॥ ॥ पितृव्य ॥ ॥ पितृमातृभ्यामिति स्वल्पपदा-
र्थकत्वेनाभ्यर्हितत्वे विशेषाभावाल्लक्षणस्य पूर्वनिपातः अयोनिसंबंधवाचित्वात् ऋतो ञ्भावस्य अमहत्वमिति कथं तर्हि कोऽत्र ग्रहः मातुः महः पिता-

॥ महाराजप्रोष्ठपदाट्ठञ् ॥ ॥ महाराजशब्दात्प्रोष्ठपदशब्दाच्च ठञ्प्रत्ययो भवति सास्य देवतेत्यस्मिन्वि-
षये· महाराजो देवतास्य माहाराजिकं प्रौष्ठपदिकं· ठञ्प्रकरणे तदस्मिन्वर्त्तत इति नवयज्ञादिभ्य उपसंख्या-
नं नवयज्ञोऽस्मिन्वर्त्तते नावयज्ञिकः कालः पाकयज्ञिकः पूर्णमासादण्· पूर्णमासोऽस्यां वर्त्तते पौर्ण-
मासी तिथिः ॥ ३५ ॥ पितृव्यमातुलमातामहपितामहाः ॥ ॥ पितृमातृभ्यां शब्दाभ्यां निपात्यन्ते· समर्थ-
विभक्तिः प्रत्ययः प्रत्ययार्थश्च अनुबन्ध इति सर्वं निपातनाल्लभ्यं ॥ पितृमातृभ्यां भ्रातरि व्यत् डुलचौ· पितृ-
मातृभ्यां भ्रातर्यभिधेये व्यत् डुलच् इत्येतौ प्रत्ययौ निपात्येते· पितुर्भ्राता पितृव्यः मातुर्भ्राता मातुलः ।
ताभ्यां पितरि डामहच्· मातरि षिच्च· ताभ्यामेव पितरि डामहच् प्रत्ययः पितुः पिता पितामहः मातुः पिता
मातामहः मातरि षिच्च पितामही मातामही· अवेर्दुग्धे सोढदूसमरीसचः प्रत्ययाः अवेर्दुग्धे अविदूसं अ-
विमरीसं· तिलान्निष्फलात् पिञ्जपेजौ प्रत्ययौ वक्तव्यौ· निष्फलस्तिलः तिलपिञ्जः तिलपेजः पिञ्जश्छन्द-

महइति तस्मान्महप्रत्ययः पितृमातृभ्यां निपातितः तयोश्चानङादेश इति केचित् वृत्तिकारस्तु संहितापाठस्यैव नित्यत्वान्न लक्षणेन पदकाराः अनुवर्त्त्या इति न्याये-
नावग्रहो मा कारीति मन्यते मातरि षिच्चेति पित्वमुपसंख्येयमित्यर्थः न पुनः षकारोऽनुबन्धः कर्त्तव्य इति देशाभावात्मातामहा इत्यपि मन्त्रे दृश्यते अवेर्दुग्धे इति दु-
ग्धं क्षीरं सोढादीनामादेशप्रत्ययोरित्यषत्वं न भवति सकारोच्चारणसामर्थ्यात् निष्फलस्तिल इति समस्तावस्थायां फलरहित उच्यते धान्यावस्थायां प्रयो-

© Dharmartha Trust J&K. Digitized by eGangotri

॥तस्य॥ ॥सर्वस्येव विषयस्यापवादे ख्यायत्वात्प्रच्छति किमिहोदाहरणमिति काकश्रु कवककश ब्दा आद्युदात्ताः प्राणिनां कुत्सनशीलानामित्यनेन अस्य अर्थः अ
धिकरणे षष्ठ्यो अयादिः प्राकृशकटे शिस्तत आदिरित्यनुवृत्तं षष्ठीबहुवचनान्तं विपरिणामयते प्राणिनां विनायेत्यादिभक्ताः कवर्गात्पूर्वेऽप्रत्ययेषामुदात्तो
भवतीति तत्र शोक इत्यनुदाहरणं खण्डिकादिषु पाठात् वकशब्दस्योदाहार्यत्वात्॥ ७भिक्षादिभ्यः॥ ॥अण्ग्रहणं बाधकबाधनार्थमिति भिक्षाशब्दोऽयं
गुरोश्च हलः इत्यकारप्रत्ययान्तत्वादन्तोदात्तः ततोऽनुदात्तादेरित्यञ् अणो बाधकः प्राप्नोतीति तस्य बाधनार्थमण्ग्रहणं ननु चयधञ्जात्स्यात्तु गर्भ [illegible]

॥तस्य समूहः॥ ॥तस्येति षष्ठीसमर्थात् समूह इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति· किमिहो
दाहरणं विलक्षणस्याद्युदात्तमगोत्रे यस्य वचनान्यत्र इति पदं ग्रहणं अवि[illegible]ताद्दु कं वस्तु इति अनुदात्तादेरञ् गोत्रा
दुञ् प्रति पदं वके दाण्घञिति वमादि तस्य इहोदाहरणात्रोदाहरणं द्रष्टव्यं· काकानां समूहः काकं· शौकं
इति त्रकघबश्चेति यावत् समूहाधिकारः॥ ३७॥ ॥भिक्षादिभ्यः अण्॥ भिक्षादिभ्यो अण् प्रत्ययो भवति तस्य स
मूह इत्येतस्मिन् विषये अण्ग्रहणं बाधकबाधनार्थं। भिक्षाणां समूहो भैक्षं· गार्भिणं· युवतिशब्दोऽत्र पठ्यते त
स्य ग्रहणसामर्थ्यात् पुंवद्भावो न भवति भस्याढे तद्धिते इति· युवतीनां समूहो यौवतं· निःश्राम भिणी क्षेत्रकरीष
अंगार चर्मिन् धर्मिन् वर्मिन्· सहस्र युवति पदाति पद्धति अर्थवन्दक्षिणा॥

र्थकं स्यात् तन्नानर्थकं परत्वात् चित्तलक्षणाष्ठक् प्राप्नोति तद्बाधनार्थमत्र पुनर्वचनं सादिस्त्रस्यादेव पुनरण्ग्रहणात् दृशो वभवति गार्भिणमिति भस्या
ढे तद्धिते इति पुंवद्भावे न ङीपो निवृत्तिः ततो इन एव न पस्त इति प्रकृतिभावान्न स्त ढित इति टिलोपाभावः तस्य ग्रहणसामर्थ्यात् पुंवद्भावो न भवती
ति यदि स्यात् सिद्धत्वात् प्रत्ययविधाविति वचनात् अनुत्पन्न एव तद्धिते पुंवद्भावेन भवितव्यं युवन्शब्दस्य के सिन्तु ह षीतिके सिन्प्रत्ययान्तत्वादाद्युदात्त इत्योत्सर्गि
कः वारणासिद्ध इति तस्येह पाठो नर्थकः स्यात् यौवतमिति यथा तु वार्त्तिकं तथा पुंवद्भावः प्राप्नोत्यत आह इह भिक्षादिषु युवतिग्रहणानर्थक्यात् पुंवद्भावस्य

॥ [illegible] ॥ ८ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ गोत्रोक्षो ॥ ॥ अपत्याधिकारादन्यत्रेति यद्येवं राजन्यमनुष्ययोरुपादानमनर्थकं गोत्र इत्येव सिद्धेन तावपत्यप्रत्ययान्तौ जातेः अपत्यपार्थत्वात् उक्तं
हि राजोपसे जातिग्रहणं मनो जातावञ्यतौ षुक्चेति किं तर्हि उच्यते प्रकृत्याके राजन्यमनुष्ययुवान इति यलोपो न भवतीति यावता अनपत्यकारत्वेनैव न
भविष्यति सत्यं अपत्यार्थत्वमभ्युपेत्यैतदुक्तं यद्यपत्यार्थत्वमभ्युपेयते राजन्यमनुष्ययोर्ग्रहणमनर्थकं नानर्थकं अनर्थकं ज्ञापनार्थत्वात् एतज्ज्ञापयति नेतयो

॥ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ॥ ॥ गोत्रादिभ्यो वुञ् प्रत्ययो भवति तस्य समूह इत्येतस्मि
न्विषये । अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते अपत्यमात्रेन तथोत्रप्रभृत्येव औपगवानां समूहः औपगवा
[redacted] कं कापटवकं उक्षन् औक्षकं उष्ट्र औष्ट्रकं उरभ्र औरभ्रकं राजन् राजकं राजन्य राजन्यकं राजपुत्र
राजपुत्रकं वत्स वात्सकं मनुष्य मानुष्यकं अज आजकं । प्रकृत्याके राजन्यमनुष्ययुवान इति यलोपो न भवति । आ
पत्यस्य च तद्धितेनातीति लोपः वृद्धाच्चेति वक्तव्यं वृद्धानां समूहो वार्द्धकं ॥ ३९ ॥ केदाराद्यञ्च ॥ ॥ केदारशब्दाद्यञ्प्रत्ययो
भवति चकाराद्वुञ्च तस्य समूह इत्येतस्मिन्विषये । अचित्तलक्षणस्य ठकोऽपवादः केदाराणां समूहः केदार्यं केदारकं
॥ गणिकायाश्च यञ्च वक्तव्यः गणिकानां समूहो गाणिक्यं ॥ ४० ॥ ठञ् कवचिनश्च ॥ ॥ कवचिन् शब्दात् ठञ्प्रत्य
यो भवति तस्य समूह इत्येतस्मिन्विषये । क [redacted] वचिनां समूहः कावचिकं चकारः केदारादित्यस्यानुक
र्षणार्थः केदाराणां समूहः कैदारिकं ॥ ४१ ॥ ॥

रपत्यकृतं भवतीति तेन यलोपो न भवति सर्वथा प्रकृत्याके राजन्यमनुष्ययुवान इति न वक्तव्यं औपगवकमिति यथात्र परेऽप्यनुदात्तादेरञ् न भवति
तथा खण्डिकादिभ्यश्चेत्यत्र वक्ष्यते ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का· पद·४

८८

ब्राह्मण॥ ॥नकारः स्वरार्थ इति ञित्स्वरादिर्निमित्तमाद्युदात्तत्वं यथा स्यात् किमर्थं पुनर्ब्राह्मणादिभ्यो यद्विधीयते न प्रकृतो यञेव विधीयेत न हि यञ्
प्रत्ययान्तो वा विशेषोस्ति तदेव रूपं स एव स्वरः ठञस्तु स्वरितत्वात् न तु वृत्तिः ज्ञापनार्थं तु एतज्ज्ञापयति अन्येभ्योप्ययं भवतीति किं सिद्धं भवति पृष्ठादुपसंख्या
नं चोदयिष्यति तन्न वक्तव्यं भवति। पृष्ठानां समूह इति पृष्ठशब्दः स्तुतिविशेषवचनः पृष्ठः षडह इति तद्धिते तद्धिते तदुपचारः।। एतत्सर्वं यज्ञ इति मकारः पदसंज्ञा
र्थः तेन याज्ञ्यमिति तत्र भत्वाभावाट्टेर्गुणो न भवति॥ ॥अनुदात्तादेः॥ ॥अचित्तहस्तिधेनोष्ठक् भवितव्यमिति चित्तवन्त उदाहृताः कपोत मयूर शाखोल

ब्राह्मणमाणववाडवाद्यन्॥ ॥ब्राह्मणादिभ्यः शब्देभ्यो यन् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये नकारः स्वरार्थः
ब्राह्मणानां समूहो ब्राह्मण्यं माणव्यं वाडव्यं यन्प्रकरणे पृष्ठादुपसंख्यानं समूहः पृष्ठ्यः अह्नः खः क्रतौ अह्नां समूहो ५
ऽहीनः क्रतुश्चेति किं आह्नः खण्डिकादिषु दर्शनादञ् भवति पर्शवः शास्त्रकर्मः पर्शूनां समूहः पार्श्वं॥ ४१॥ ग्रामज
नबन्धुसहायेभ्यस्तल्॥ ॥ग्रामादिभ्यः शब्देभ्यस्तल् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये ग्रामाणां समूहो ग्रा
मता जनता बन्धुता सहायता गजाच्चेति वक्तव्यं गजानां समूहो गजता॥ ४३॥ अनुदात्तादेरञ्॥ ॥अनुदात्तादेः
शब्दादञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये कपोतानां समूहः कापोतं मायूरं तैत्तिरं॥ ४४॥ खण्डिकादिभ्य
श्च॥ ॥खण्डिकादिभ्यश्च शब्देभ्योऽञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन् विषये आद्युदात्तार्थमचित्तार्थं
वचनं खण्डिकानां समूहः खाण्डिकं वाडवं क्षुद्रकमालवशब्दात् सेनासंज्ञायां क्षुद्रकाश्च मालवाश्चेति क्षत्रियद्वन्द्वस्ततः पूर्वेणैव
ञिति द्विवचनं गोत्रवुञो बाधनार्थं ननु च परत्वाद्गोत्रवुञा बाध्यते तेन च गोत्रसमुदायो गोत्रं

[illegible]

राम०

८८

चावन्त इति मध्योदात्तो गुणो पधालिकः तस्मात् अनुच्छ कामाहसेति किं प्रत्ययान्तास्ति निशब्दः प्रत्ययस्वरेणान्तोदात्तः मध्यभावेनाद्युदात्तत्वं भवति
उदात्तयोर्बहुलमिति बहुलवचनात्। खण्डिकादि॥ ॥क्षुद्रकाश्चेति। क्षुद्रकस्यापत्यानि जनपदशब्दादिति विहितस्य तद्राजस्य लुक् मालवा
नुदात्तलक्षणस्यान्तः पूर्वेणाञिति द्वन्द्व इति समासे ऽन्तोदात्तत्वे मति शेषनिघातेनानुदात्तादित्वात्। ननु चेपरत्वादिति अभ्युपेत्य गोत्रत्वमेतदुक्तं
तदेव तु नास्तीत्याह॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नचगोत्रसमुदायोगोत्रमितितत्रचयथाजनपदसमुदायोजनपदग्रहणेननगृह्यतइतिकाशिकोसलीयाइत्यत्रछएवभवतिनजनपदलक्षणोवुञ् तद्वदत्रापिगोत्रलक्षणोवुञ्नप्राप्नोतीतिभावः स्यादेतत्तस्माभूत्समुदायोगोत्रंमालवशब्दस्तुगोत्रंभवतितस्माच्चतदंतविधिनासमुदायादपिवुञ्प्राप्नोतीतितत्राह नचेतिये अविधिस्तदंतस्येत्यत्रहिसमासप्रत्ययविधौप्रतिषेधइत्युक्तं॥ ९॥ एवंतर्हीत्यादि। कथमेकेनयत्नेनोभयंशक्यंज्ञापयितुंशक्यमित्याह अन्यथानुपपत्त्याज्ञापकंभवतिउभयेनचविनानास्मात्ञ्विधानमुपपद्यतइतिकिमत्रानुपपन्नं। तत्रएवंविप्रतिषेधज्ञापनस्यप्रयोजनमौपगवकंकापटवकमितिवुञोवकाशः पदाद्युदात्तंग्लुचुकस्यापत्यंग्लुचुकायनिः प्राचामवृद्धात्फिन् तेषामसमूहोग्लौचुकायनकमितिअञ्स्तुकायोतमिस्यापगोत्रमवकाशःमोत्रादनुदात्तादेरञ्भयप्रसंगेपरत्वादञ्स्यात् अस्मात्तुज्ञापकाद्वुञेवभवतितदंतविधिज्ञापनस्यप्रयोजनंवुनहस्ति

नचगोत्रसमुदायोगोत्रंनचातदंतविधिरस्ति· ९ एवंतर्हैतज्ज्ञापयतिवुञ्पूर्वविप्रतिषेधःसामूहिकेषुतदंतविधिरस्तीतिप्रयोजनंऔपगवकंकापटवकमितिवुञ्भवतिवानहस्तिकंगौधेनुकमितिवतदंतविधिश्चक्षुद्रकमालवात्सेनायांतायोगेनपूर्वविप्रतिषेधस्तदंतविधिश्चज्ञापितःपुनरस्यैवनियमार्थमुच्यतेसेनासंज्ञायामितिक्षुद्रकमालवात्सेनासंज्ञायामेवाञ्भवतिक्षौद्रकमालवीसेना· क्षौद्रकमालवकमन्यत· अञ्सिद्धिरनुदात्तादेःकोर्थःक्षुद्रकमालवात·गोत्राद्वुञ्नचतद्गोत्रंतदंतोन्नसमर्वतः।ज्ञापकंस्यात्तदंतत्वे·॥ ॥

नांसमूहोवानहस्तिकंगौधेनुकमितिजांगलधेनुवलजांतस्येत्युत्तरपदवृद्धिविकल्पःपुनरस्यैवनियमार्थत्वंवर्णयिष्यन्कथमेकेनयत्नेनोभयंज्ञापनंवनियमश्चेत्याशंक्याह क्षुद्रकमालवात्सेनावतेतियोगविभागेनयत्नद्वयमाश्रीयतइत्यर्थः क्षौद्रकमालवीक्षौद्रकमालवकमितिउभयत्रापिमालवादुत्पन्नस्यञ्ञोगोत्रलुग्वृत्तौतिलादिप्रतिषिद्धःस्यापत्यस्येतियलोपः।अञ्सिद्धिरित्यादि।अनुदात्तादीतिदंतुगर्भविशेषणंयतोयंक्षुद्रकमालवशब्दोनुदात्तादिस्तेनतस्मादनुदात्तादेरित्येवाञःसिद्धिरस्तिकोर्थस्तस्यगणपाठेनेतिशेषः नन्विविनियोजनमित्यर्थःगोत्रलक्षणोवुञ्माप्नोतिअतस्तद्बाधनार्थः पाठइतिचेत्तत्राह गोत्राद्वुञितिगोत्राद्वुञ्विधीयतेनचतत्क्षुद्रकमालवेतिशब्दरूपंगोत्रमित्यर्थः। तदंतादितिमालवशब्दस्यगोत्रत्वात्तदंतविधिनाप्राप्नोत्येवनत्वेवासर्वतइति आह्यादित्वात्सम्पंतात्रसिः सेतदंतविधिः सर्वे

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰द॰४ तथा चेति धेनुरनञि कमुत्पादयतीत्यापिशलेः सूत्रं अत्र हेत्वर्थोऽनुबन्धो भ्राणः एकैसेव चेसुपुर्क्मेनातपरस्य कादेशोऽद्धृष्टया अर्थमात्रं वा भाष्यकारेणानि
८९ र्दिष्टं इकमिति ठकमित्यर्थः धेनूनां समूहो धैनुकं अनञीति किं अधेनूनां समूह आधेनवं उत्सादिपाठात् अञ् यद्यपि धेनुशब्दः सूत्रे पठ्यते तथापि व
ष्कपास इति लिंगात् धेनुशब्दादपि भवतीति तत्र यदि स्यात् समूह इकेषु तदन्तविधिर्नेष्यते नञीति पेप्रतिषेधोऽनर्थकः स्यात् प्रयोजनात् तस्मयाह सेना
यामिति यथेति पूर्वविप्रतिषेधे वुञ्व्याहुः सूत्रे पठ्यते नवुञा अत्र वा अध्यायथा स्यादिति सेवमर्थश्च तस्यापवादो पाठ इत्यर्थः उलूकश्च शब्दोऽत्र पठ्यते तेन
लब्धावंत इति मध्योदात्तः छंदसि तु पदमुलूको वृद्ध इति मोऽद्वमेतत् इत्यौलूक आयत इति पराधुदात्तत्वं तच्छान्दसं भाषायां तु मध्योदात्तमे

तथा चापिशलेर्विधिः सेनायां नियमार्थं च यथा बाध्येत वाञ् वुञा खण्डिकावडवा क्षुद्रकमालवा
सेनासंज्ञायां भिक्षुक उलूक श्वन युगवरत्राहबलधरूहन् ॥ ॥ ४५ ॥ ॥ श्रीरामचन्द्रः

वतत्र पूर्वे यौवाजसि रूः तस्मादेवं वरुणश्रौलूकशब्दो गर्गादिपठितः तस्य यजञोश्चेति बहुषु लुकि कृते रूपं तदिह पठ्यत इति असति हि
तस्य पाठे उलूकानां समूह इत्यर्थविवक्षायां गोत्रे लुगचीति लुकः प्रतिषेधादौलूकशब्दाद् अण् प्राप्नोति शुकशब्दोऽत्र पठ्यते तस्य
समूह इत्यत्र तु यस्य वनात्स्वप्रतिपदविधानमस्तीत्युक्तो शहतं काकं शौकमिति तस्मात्तत्र शौकमित्यस्यप्यानेकाकमिति पठितव्यं ब
कशब्दः प्राणिनां कुक्कुटादीनामिमा धुदात्तः युगवरत्रेति पठ्यते तस्य द्वाविग्रहीतार्थमिच्छन्ति यौगवरत्रं योगं वारत्रमिति तत्र संघातपक्षे राम॰
जातिरप्राणिनामिति द्वन्द्वैकवद्भावेन पुंसक ह्रस्वत्वे सति युगवरत्रेति दीर्घनिर्देशोऽनुपपन्नस्तस्माद्युगमहि ताव रत्रेति समासः कर्तव्यः जाति ८९
परत्वाभावाद् एकवद्भावाभावः ॥ १० ॥ ७ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥चरणेभ्यो॥ ॥गोत्रचरणाद्वुञित्यारभ्य प्रत्यया वक्ष्यन्त इति ननु च न तत्र धर्मग्रहणमस्ति तत्कथं धर्मवदतिदिश्यते एवं तर्हि तत्रेदमि
तिरिदमेव धर्मवदिति वचनं लिंगमस्ति तत्र चरणाद्धर्माम्नाययोरिति विज्ञः सर्वसादृश्यार्थ इति असति तस्मिन् चरणेभ्यो धर्मवदित्युच्यमाने यदि
तावदेवं संबंधः चरणेभ्यो धर्मे ये प्रत्यया विधास्यन्ते ते भवंति समूह इति समूहप्रकृतिरविशेषिता स्यात् ततश्च काकादिभ्योपि वुञादयः प्रसज्ये
रन् अथ पुनरेवं संबंधः धर्मे ये प्रत्यया विधास्यन्ते ते चरणेभ्यः समूहे भवंतीति एवमपि धर्मप्रत्ययान विशेषिताः स्युः ततश्च तत्सेदमिति विधास्य

चरणेभ्यो धर्मवत्॥ ॥चरणशब्दाः कठकलापादयः तेभ्यः षष्ठीसमर्थेभ्यः समूहे धर्मवत्प्रत्यया भवन्ति गोत्र
चरणाद्वुञित्यारभ्य प्रत्यया वक्ष्यन्ते तत्र चैवेदमुच्यते चरणाद्धर्माम्नाययोरिति तेन धर्मवदतिदेशः क्रियते वतिः सर्व
सादृश्यार्थः कठानां धर्मः काठकं कालापकं छांदोग्यं औक्थिक्यं आथर्वणं तथा समूहेपि काठकमित्यादि भव
ति॥ ॥छ॥ ॥छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

मानाश्चरणादयोपि कठादिभ्यश्चापद्येरन् अथाप्येवं संबंधः चरणेभ्यो धर्मे ये प्रत्ययास्ते भवंति चरणेभ्य एव समूह इति तत्र सत्स्वप्युत स्वच
रणशब्दस्यैव समुभयसंबंध एवं तावद्दुर्लभः अथापि लभ्येत एवमपि यः कश्चिद्धर्मप्रसंगोपतः कुतश्चिच्चरणशब्दात् स्यात् कोपि जल्हादिति
प्रदादरणकगादिभ्योपि स्यान् वतिनिर्देशे तु सति सर्वसादृश्यपरिग्रहो भवतीति तेन याभ्यः प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया धर्मे विधास्यं
ते इहापि ताभ्यः प्रकृतिभ्यस्तेनैव विशेषणेन त एव भवंतीति नकिंचिदनिष्टं काठकं कालापकमिति गोत्र । चरणाद्वुञ् छांदोग्यमिति छंदो
गौक्थिकेति ञ्यः आथर्वणमिति आथर्वणिकस्येकलोपश्चेत्यण् इकलोपश्च॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ८४

९०

।।अचित्त।। ।।अणाजोरपवाद इति अचित्तार्थेषु येन नाप्राप्तिस्तये नाणोपवादः कपोतादिषु चित्तवत्सु चरितार्थस्याणोपि परत्वाद्बाधक इत्यर्थः
हस्तिधेनुशब्दयोस्तु प्रत्ययस्त्वेणोतोस्त्रत्वयोस्तु सत्वात् श्लिष्टस्याणस्यापवादः हस्तिशब्दो हस्ताज्जातावितीनिप्रत्ययांतः धेनुशब्दो धेटो नुश्चे
ति नुप्रत्ययांतः। आधेनवमिति उत्सादिपाठात् जञ्जो गोल धेनुवत्सजातं तस्येति पक्षेऽल्पभावः।। ।।पाशादिभ्यः।। ।।यप्रत्ययांतस्त्वभावतः
स्त्रीलिंगो वा तत्र शब्दो त्रपद्यते वा तानां समूहो वा त्याच्यथगाताटेर्शना दृग्नुक्तो त्रसमूहः तस्माच्छीघ्रत्वे प्रत्ययावक्रमः नेषदोषः एकस्यापि

।।अचित्तहस्तिधेनोष्ठक्।। ।।अचित्तार्थेभ्यो हस्तिधेनुशब्दाभ्यां च ठक् प्रत्ययो भवति तस्य समूह इत्यस्मिन्विषये अणाजो
रपवादः अपूपानां समूहः आपूपिकं शाष्कुलिकं हास्तिकं धैनुकं धेनोरनञ इति वक्तव्यं आधेनवं।। ।।केशाश्वाभ्यां यञ्छावन्य
तरस्यां।। ।।केश अश्व इत्येताभ्यां यथासंख्यं यञ् छ इत्येतौ प्रत्ययौ भवतः अन्यतरस्यां तस्य समूह इत्यस्मिन्विषये केशानां स
मूहः कैश्यं कैशिकं अश्वानां समूहः अश्वीयं आश्वं।। ।।पाशादिभ्यो यः।। ।।पाशादिभ्यः शब्देभ्यो यः प्रत्ययो भवति त
स्य समूह इत्येतस्मिन्विषये पाशानां समूहः पाश्या तृण्या योगविभाग उत्तरार्थः।। ।।इनित्रकट्यचश्च।। ।।खलगोरथश
ब्देभ्यो यथासंख्यं इनित्रकट्यच इत्येते प्रत्यया भवंति तस्य समूह इत्येतस्मिन्विषये खलिनी गोत्रा रथकट्या खलादिभ्य इनिर्वक्तव्यः
डाकिनी कुटुंबिनी।। ।।११।। ।।+ पाशतृणधूमवातअंगारपोटगलपिटकपिटाकशकटहलनड वन।। ।।खलगोरथात्।।
खलगोरथशब्देभ्यो यः प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये खलानां समूहः खल्या गव्या रथ्या+

तावयविनो हि श्लेषे नमेदाध्यारोपः तदाश्रयश्च समूहः। अथवा प्रतिदिशं वातावयविन एव मिथ्येते तथा च प्रतिभासः पूर्वो वात उत्तरो वातः प्र
तीचीनो वातीति वाता इति आह च वायोर्वपुसमूर्छनं नाना त्वे लिंगमिति।। ।।खलगो।। ।।अथ कस्मात् खलादयोपि पाशादिषु न पठिताः एवं
हि विभक्तिर्वैचित्र्यात्पितमो भगतिनि त्राह पाशादिषु पाठ इति।। ।।इनित्र।। ।।योगविभागो यथासंख्यार्थ इत्यत्र यथा इनित्रकट्यचस्त्रयः चका
राद्यश्चेति चत्वारः प्रत्ययाः प्रकृतयस्तु तिस्र इति वैषम्यं स्यात् खलादिभ्य इति खलादयः प्रयोगतो गम्याः एते पि प्रत्ययाः स्वभावतः स्त्रियामेव।। ११।।

राम॰

© Dharmartha Trust J&K. Digitized by eGangotri

॥विषय॥ ॥ननुच विषयस्य देशत्वाव्यभिचाराद्देश इति विशेषणमनर्थमित्यत आह विषयशब्दोयमिति अत्यंतशीलितोपेताभ्यस्तः तत्र
देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थमिति पर्यवेदेशग्रहणमेवास्तु मा भूद्विषयग्रहणं नैवं शक्यं देशशब्दोपि नानार्थः देशनं देश इति क्रिया
शब्दस्यापि भावात् शिबीनां विषयो देशः शैब इति कथं शिबयो देश इति निवासविवक्षायां तस्य निवासः जनपदे लुबिति लुपि भविष्यति तन्न्वर्थ

॥विषयो देशे॥ ॥ समूह इति निवृत्तं षष्ठीसमर्थविभक्तिरनुवर्त्तते तस्येति षष्ठीसमर्थाद्विषय इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यो सौ विषयो देशश्चेत्स भवति विषयशब्दोयं बह्वर्थः क्वचिद्ग्रामसमुदाये वर्त्तते विषयो लब्ध इति क्वचिदिंद्रियग्राह्ये वस्तुनि विषयो रूपमिति क्वचिदत्यंतशीलिते ज्ञेये देवदत्तस्य विषयोनुवाक इति क्वचिदन्यत्रभावे मत्स्यानां विषयो जलमिति तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थं शिबीनां विषयो देशः शैबः आपुष्टः देश इति किं देवदत्तस्य विषयोनुवाकः॥ ॥राजन्यादिभ्यो वुञ्॥ ॥राजन्यादिभ्यः शब्देभ्यो वुञ् प्रत्ययो भवति विषयो देश इत्येतस्मिन्विषये अणोपवादः राजन्यानां विषयो देशः राजन्यकः दैवयातवकः आकृतिगणश्चायं मालवानां विषयो देशः मालवकः वैराटकः त्रैगर्त्तकः। राजन्य। आपीत। बाभ्रव्य। शालंकायन। दैवयातव। जालंधरायण॥ आत्मकामेय। अंबरीषपुत्र। वृति। बैल्ववन। शैलूष। उदुंबर। वैतल। आर्जुनायन। संप्रिय। दाक्षि। उर्णनाभ॥ ॥छ॥ ॥छ छ॥ ॥

मिहोभवृत्तिः शिबीनां निवासो जनपद इत्यत्र स्वस्वामिभावो न प्रतीयते अन्यदीयेपि जनपदे निवाससंभवात् शिबीनां विषय इत्यत्र तु स्वस्वामिभावः प्रतीयते न तु निवासार्थस्तत्रावसतामन्यस्य स्वामित्वसंभवात्॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ८४ सत्संप्रत्ययो मे येषां विषयस्तत्रैव तेषां निवासे जनपदे लुप् स्मर्यते न निवासमात्रे अत्र चाभिधानं स्वाभाव्यं हेतुः एवं च शिबीनां विषयः शैव इत्यत्रार्थे शि-
९१ बयस्त्वपि भवति एवं वसातीनां विषयो वासातः तेषामेव निवासो वसातयः तथा गांधारीणां विषयो गांधारः निवासो गांधारयः अंगाः वंगाः बुंगाः
सुह्माः पुंड्राः इति निवासरूपे तेषां विवक्षिते न विषयरूपता एवं राजन्यादिभ्यो वुञित्यत्रापि विषयविवक्षायां राजन्यकं निवासे राजन्याः तत्रैव

भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ॥ ॥ भौरिक्यादिभ्य ऐषुकार्यादिभ्यश्च यथासंख्यं विधल्भक्तल् इत्ये-
तौ प्रत्ययौ भवतः विषयो देश इत्यस्मिन्विषये । अणोपवादः । भौरिकिविधं भौलिकिविधं ऐषुकार्यादिभ्यः । ऐषुका-
रिभक्तः सारस्यायनभक्तः । भौरिकि । भौलिकि । चौपयत । चैटयत । काणेय । वाणिज । भौरिक्यादिः । ऐषुकारि । सा-
रस्यायन । चांद्रायण । द्व्याक्षायण । त्र्याक्षायण । औलायन । खांडायन । सौवीर । दासमित्र । दासमित्रायण । सौद्रायण ।
शायंड । शौंड । वैश्वमाणव । वैश्वधेनव । तुंडदेव । शायंडि ॥ ॥ १२ ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥

वैल्वतादिषु विषयविवक्षैव तेन षैल्वतकं आंबरीषपुत्रकमित्याद्येव भवति सर्वत्र चाभिधानशक्तिरेव हेतुः तदाह विषयाभिधाने जन-
पदे लुप्बहुवचनविषयात् गांधार्यादिभ्यो वा राजन्यादिभ्यो वा राजन्यादिभ्यो वा वुञ् वैल्वतादिभ्यो नित्यं न वाभिधेयस्य निवासविषय- राम॰
त्वात् निवासविवक्षायां लुप् विषयविवक्षायां तु प्रत्यया इति ॥ ॥१२॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥ ९१

© Dharmartha Trust J&K. Digitized by eGangotri

॥सोऽस्यादिः॥ ॥छन्दस इति। नन्वत्र रूपग्रहणं नापि मन्त्रब्राह्मणयोः कस्य तर्हि अन्वर्थग्रहणमिष्यते। तत्र छन्दःशब्दोऽस्ति यस्य जगत्यादयो विशेषाः
तस्य ग्रहणं प्रगाथानामादौ तस्यैव संभवात् तेन पङ्क्त्यादिशब्देभ्यः प्रत्ययः। यत्र द्वे ऋचौ तिस्रः क्रियन्त इति चतुर्थीषष्ठ्योर्योगो नार्हति। गाथे पुनरस्मिन्नित्वे तत्र
रयोस्तस्येदमित्येवमादिना प्रकारेण तद्धितोत्पत्तिः। प्रियं मित्रं तत्र प्रियं मित्रं तत्र शंसिषन्नेनेति पातमिति त्रयोप मुच्चारणे प्रक्रमस्तत्र ग्रथनात् प्रग्रथ

॥सोऽस्यादिरिति च्छन्दसः प्रगाथेषु॥ ॥स इति समर्थविभक्तिः। अस्येति प्रत्ययार्थः। आदिरिति प्रकृतिविशेषणम्। इति
करणो विवक्षार्थः। छन्दस इति प्रकृतिनिर्देशः। प्रगाथेष्विति प्रत्ययार्थविशेषणम्। स इति प्रथमासमर्थादस्येति षष्ठ्य
र्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं छन्दश्चेत्तदादिर्भवति यत्तदस्येति निर्दिष्टं प्रगाथाश्चेत्ते भवन्ति इतिक
रणस्ततश्चेद्विवक्षा। पङ्क्तिरादिरस्य पाङ्क्तः प्रगाथः। आनुष्टुभः। जागतः। आदिरिति किम्। अनुष्टुम्मध्यमस्य प्रगाथ
स्य। छन्दस इति किम्। उदुत्यशब्द आदिरस्य प्रगाथस्य। प्रगाथेष्विति किम्। पङ्क्तिरादिरस्यानुवाकस्य। प्रगाथशब्दः क्रिया
निमित्तकः क्वचिदेव मन्त्रविशेषे वर्तते यत्र मन्त्रप्रग्रथनेन द्वे ऋचौ तिस्रः क्रियन्ते स प्रग्रथनात्प्रगानाद्वा प्रगाथ इत्युच्यते।
छन्दसः प्रत्ययविधाने नपुंसके स्वार्थ उपसंख्यानम्। त्रिष्टुबेव त्रैष्टुभम्। जागतम्॥ ॥
नादिरिति प्रगाथशब्दप्रवृत्तिनिमित्तं दर्शयति प्रग्रथ्यत इति प्रगाथः। अकर्तरि च कारके इति कर्मणि घञ् पृषोदरादित्वाद्रेफनकारयोर्लोपः। प्रगाना
द्वेति कृत्यचश्चेति णत्वं कै गै शब्दे प्रगीयत इति प्रगाथः। उपसंख्यानात् त्रैष्टुभमिति कुटीरादित्वात् स्वार्थिकस्यापि प्रत्ययस्य यथा भिन्नलिङ्गता तथा
योऽपि नपुंसकत्वं द्रष्टव्यम्॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

संग्रामे॥ ॥समर्थानां प्रथमाद्वेति वचनात्संग्राम वा विभ्यः प्रत्ययः प्राप्नोति न प्रयोजनयोद्धृभ्यस्थ समिति निर्दिष्टेभ्य इत्याशंक्याह सोऽस्येति समर्थविभक्ति
रित्यादि। प्रथमा समर्थविशेषणमिति तेन विशेषद्वारेण प्रयोजनयोद्धार एव प्रथमा निर्दिष्टाः प्रत्ययार्थविशेषणं संग्राम इति तेन तद्द्वारेणास्संग्राम
स्वरूपनिर्दिष्टः॥ ॥घञः॥ ॥अस्यामिति प्रत्ययार्थः स्त्रीलिंग इति तेन लिंगस्य विवक्षितत्वं दर्शयति घञंतात्क्रियावाचिन इति भावे योद्ध

संग्रामे प्रयोजनयोद्धृभ्यः॥ ॥सोऽस्येति समर्थविभक्तिः प्रत्ययार्थश्चानुवर्त्तते प्रथमा समर्थविशेषणं प्रयोजनयोद्धा
रः प्रत्ययार्थविशेषणं संग्रामः प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च शब्देभ्यः प्रथमासमर्थेभ्योऽस्येति षष्ठ्यर्थे संग्रामेऽभिधेये यथा
विहितं प्रत्ययो भवति सुभद्रा प्रयोजनमस्य सौभद्रः संग्रामः गौरिमित्रः। योद्धृभ्यः। अहिमाला योद्धारोऽस्य संग्रामस्य आहिमा
लः। स्यांदनाश्वभारतः। संग्राम इति किं सुभद्रा प्रयोजनमस्य दानस्य प्रयोजनयोद्धृभ्य इति किं सुभद्रा प्रेक्षिकास्य संग्रामस्य॥ ॥
तदस्यां प्रहरणमिति क्रीडायां णः॥ सोऽस्मिन्प्रहरणमिति किं माला भूषणमस्यां क्रीडायां। क्रीडायामिति किं खड्गः प्रहरणम
स्यां सेनायां॥ ॥घञः साऽस्यां क्रियेति ञः॥ ॥सेति समर्थविभक्तिः अस्यामिति प्रत्ययार्थः स्त्रीलिंगः क्रियेति प्रकृत्यर्थ
विशेषणं घञ इति प्रकृतिनिर्देशः इति करणाद्विवक्षार्थः घञंतात्क्रियावाचिनः प्रथमासमर्थादस्यामिति सप्तम्यर्थे स्त्री
लिंगे ञप्रत्ययो भवति घञ इति कृद्ग्रहणात्तत्र गतिकारकपूर्वमपि गृह्यते श्येनपातोऽस्यां वर्त्तते श्यैनंपाता। तैलंपाता। घञ इ
ति किं श्येनपतनमस्यां वर्त्तते। क्रियेति किं प्राकारोऽस्यां वर्त्तते। अथ समर्थविभक्तिः प्रत्ययार्थश्च कस्मात्पुनरुपादीयते णाव
तादृशमपि प्रकृतमेवाक्रीडायामित्यनेन तत्संबद्धं तदनुवृत्तौ क्रीडानुवृत्तिरपि संभाव्येत सामान्येन चेदं विधानं दंडपातोऽस्यां
न तदंतादित्यर्थः श्येनंपातेति पतनं पातः श्येनानां पात इति कर्त्तरि षष्ठ्याः समासः ततो ञः श्येनतिलस्य पाते ञे इति मुमागम इति सूत्रव
नेनोपपंकर्मणि घञंतः उपसर्गस्य घञ्यमनुष्ये बहुलमिति प्रशब्दस्य दीर्घत्वं सामान्येन चेदं विधानमिति। एतदेवोदाहरणेन दर्शयति दंडपात इति
ण प्रत्ययो भवति यत्तदिति निर्दिष्टं प्रहरणं चेत्तद्भवति यत्तदस्यामिति निर्दिष्टं क्रीडा चेत्सा भवति इति करणात्तत्त्वविवक्षा। दंडः प्रहरणमस्यां क्रीडायां

© Dharmartha Trust J&K. Digitized by eGangotri

॥तदधीते॥ ॥इह योयं ग्रंथमधीते यस्तं स्वरूपतो वेत्ति यश्च वेत्ति सोवश्यमधीत इत्यनयोरव्यभिचारेणेनापि सिद्धं किमर्थमिमावर्थावुपदिश्येते नैतयोः स्वरूपकः
समावेशः अध्ययनं शब्दपाठः अर्थावबोधो वेदनं भवति च कश्चित्संपाठं पठति नार्थं वेत्ति स्वार्थं वेत्ति न संपाठं पठति सिद्धं तु ग्रहणमित्यादि तदधीते
वेदेत्युभमाने समुच्चयो विज्ञायेत तत्रश्च यस्तदधीते वेद च तत्रैव स्याद्यस्तु केवलमधीते वेद वा न तत्र स्यात् सिद्धं तु ग्रहणं तु वाक्यभेदेनाधीयानविदु
षोः पृथक्प्रत्ययविधानं सिध्यति ननु च तदस्मिन्नस्तीत्यादि तत्र नानार्थनिर्देशे प्रत्येकं समर्थविभक्तिः संबध्यते इति सिद्धं तु ग्रहणेनाध्यायोग्यु

॥ ॥तदधीते तद्वेद॥ ॥तदिति द्वितीयासमर्थादधीते वेदेत्येतयोरर्थयोर्यथाविहितं प्रत्ययो
भवति। छंदोधीते छान्दसः वैयाकरणः नैरुक्तः निमित्तानि वेद नैमित्तः मौहूर्तः औत्पातः। सिद्धं तु ग्र
हणमधीयानविदुषोः पृथग्विधानार्थः॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

सादपि प्यते नदीव्यतीत्यत्र प्रत्यर्थं प्रत्ययो भवति न प्रसंगेऽप्येवं सिद्धं तु ग्रहणमधीयानविदुषोः पृथग्विधानार्थमिति किं तर्हि उत्तरत्र क्रमादिभ्यो
नादृकवृत्तान्तादिभ्यष्ठगित्यत्रापि किंचकारणं न स्यात् क्रतुशब्दः कर्मनामधेयं वसंतादयोप्यर्थाः न तेषामध्ययनं संभवति तस्य शब्दविषयत्वात्तत
स्मिन्नपि तेषु ग्रंथेषु संभवति गौणत्वात्तु न गृह्यते मुख्यमेव तत्वेर्थे वेदनं संभवतीति तेभ्यो विदुष्येव स्यात् नाध्येतरि पुनरस्तु ग्रहणे तु पृथक्त्वाध्येत
र्यापि ग्रहणात्तत्रापि भवति॥ ॥छ॥ ॥

का॰ प॰ ४
९३

॥क्रतूक्थादि॥ ॥क्रतुविशेषवाचिभ्य इति स्वरूपस्य ग्रहणं न भवतीति परिहारः उक्थादिषु च पठेत क्रतुसामान्यवाचिनामपि सोमयागादीनां प-
र्यायाणां न भवति उक्थादिषु यज्ञशब्दस्य पाठात् तस्माद्विशेषवाचिनामेव ग्रहणं तेभ्यो मुख्यार्थवृत्तिभ्यो वेदितव्यः प्रत्ययः तत्प्रतिपादनपरे ग्रन्थ
वृत्तिभ्यः स्वध्येतरि वार्त्तिकसूत्रिक इति वक्तव्यो मा भूद्वार्त्तिकं कथादिभ्यष्ठक वार्त्तिकं च तत्सूत्रं चेति कर्मधारयात्प्रत्ययः एवं सांग्रहसूत्रिक इति क-
ल्पसूत्रमिति कर्मधारयः समाहारद्वन्द्वो वा यज्ञायज्ञीयात्परेणेति एतया योगे पञ्चमी निर्दिश्यते नवापि परशब्दात्तासिकः पदात्तद्विधावुत्तराधरदक्षिणादा

॥क्रतूक्थादिसूत्रान्ताट्ठक्॥ ॥क्रतुविशेषवाचिभ्यः शब्देभ्य उक्थादिभ्यश्च सूत्रान्ताच्च ठक् प्रत्ययो भवति तदधीते तद्वेद
इत्यस्मिन्विषये अणोऽपवादः। अग्निष्टोममधीते वेद वा आग्निष्टोमिकः। वाजपेयिकः। उक्थादिभ्यः। औक्थिकः। लौकायतिकः। सूत्रा-
न्तात्। वार्त्तिकसूत्रिकः। सांग्रहसूत्रिकः। सूत्रान्तादकल्पादेरिष्यते। कल्पसूत्रमधीते काल्पसूत्रः। अणेव भवति। उक्थशब्दः केषुचि-
देव सामसु वर्तते। यज्ञायज्ञीयात्परेण यानि गीयन्ते। न च तान्यधीयाने प्रत्यय इष्यते। किं तर्हि सामलक्षणे औक्थिक्ये वर्तमानादुक्थश-
ब्दः प्रत्ययमुत्पादयति। उक्थमधीते औक्थिकः। औक्थिक्यमधीत इत्यर्थः। औक्थिक्यशब्दाच्च प्रत्ययो न भवत्यनभिधा-
नात्। विद्यालक्षणकल्पसूत्रान्तादिति वक्तव्यम्। वायसविद्यिकः। सार्पविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः। मातृक-
ल्पिकः। पाराशरकल्पिकः। विद्या चानङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा। आङ्गविद्यामधीते आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। सांसर्गविद्यः।

तिरिति नानुवर्त्तते रिक शब्देभ्यः सेवानुवर्त्तते न च तान्यधीयाने प्रत्यय इष्यत इति देवः अरण्यच प्रत्ययमपि नेष्यते तेनोक्थान्यधीत इति वाक्यमेव
भवति अत्र चाभिधानवशेन सामलक्षणां प्रातिशाख्ये औक्थिक्यमिति औक्थिकानामाम्नायः इदमर्थे छन्दोगौक्थिकेति ञ्यः औक्थिक्य- राम
शब्दाच्च प्रत्ययो न भवतीति। अणप्रत्ययपर इत्यर्थः इदं प्रसंगादुक्तं सूत्रान्तादिति अकल्पादिरिष्यत इत्याह विद्यालक्षणकल्पसूत्रान्तादिति वक्त- ९३
व्यमिति। विद्यावेलादिवाक्येनातिप्रसक्तस्यापवादः अङ्गादिपूर्वो विद्याशब्दः प्रत्ययं नोत्पादयतीत्यर्थः त्रैविद्य इति त्रयो विद्या त्रिविद्या ता-
मधीते त्रैविद्यः तिस्रो विद्या अधीत इति तु विग्रहे द्विगोर्लुगनपत्य इति लुक्प्रसंगः॥ १५॥

© Dharmartha Trust J&K. Digitized by eGangotri

यावक्रीतिक इति यवक्रीतमधिकृत्य कृतमाख्यानं यवक्रीतशब्देनोच्यते एवं प्रैयंगवमधिकृत्य कृतं कृतमुपचारात्प्रैयंगवमुच्यते वासवदत्तिक इति वा
सवदत्तामधिकृत्य कृता आख्यायिका अधिकृत्य कृते ग्रंथ इत्यत्रार्थे हि द्वाच्छः तस्य लुबाख्यायिकाभ्यो बहुलमिति लुप् ततोनेन ठक् एवं सोमनोत्तरिक इ
ति। ऐतिहासिक इतिहासादिति पत्र्योच्यते स इतिहासः पृषोदरादित्वात्साधुः सर्वसादेरिति सर्वादेः सादेर्द्विगोश्चेति सन्नन्तस्य प्रत्ययस्य लो भवति लुग्भवतो
ऽर्थः अर्थवतः सशब्दस्य ग्रहणात्सर्वशब्दः पृथगुपात्तः द्विगोश्चेत्यनेन द्विगोर्लुगनपत्य इत्ययमेव लुक् स्मारितः सर्ववेद इति सर्ववेदानधीत इत्यणो लु

॥आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठञ् वक्तव्यः॥ आख्यानाख्यायिकरूपेऽर्थग्रहणं इतिहासपुराणयोः स्वरूपग्रहणं
यावक्रीतिकः प्रैयंगविकः। वासवदत्तिकः सौमनोत्तरिकः। ऐतिहासिकः पौराणिकः॥ सर्वसादेर्द्विगोश्च लः॥ सर्वतंत्रः। सर्ववे
दः। सादेः। सवार्त्तिकः ससंग्रहः। द्विगोः। द्विवेदः पंचव्याकरणः। अनुसूलक्षणाभ्यां च। अनुसुर्नाम ग्रंथः तमधीते आनुसु
कः लाक्ष्यिकः लाक्षणिकः। इकन्पदोत्तरपदात् पौर्वपदिकः औत्तरपदिकः। शतषष्टेः षिकन्पथो बहुलं। शतपथि
कः शतपथिकः। षष्टिपथिकः षाष्टिपथिकः। बहुलग्रहणादणपि भवति शातपथः। षाष्टिपथः। उक्थ। लोकायत। न्या
स। निमित्त। पुनरुक्त। यज्ञ। चर्चा। धर्म। क्रमेतर। श्लक्ष्ण। संहिता। पदक्रम। संघात। वृत्ति। संग्रह। गुणागुण। आयुर्वेद॥ ॥
क्रमादिभ्यो वुन्॥ ॥क्रमादिभ्यः शब्देभ्यो वुन्प्रत्ययो भवति तदधीते तद्वेदेत्येतस्मिन् विषये। अणोऽपवादः। क्रमकः प
दकः। क्रम। पद। शिक्षा। मीमांसा। सामन्॥ ॥छ॥ ॥

कृत्सवार्त्तिक इति वार्त्तिकांतमधीत इति कारदेशः कोण + अनतवचने सहशब्दस्याव्ययीभावः अव्ययीभावे चाकाल इति सभावः ततोऽणो लुक् अनुसू
रिति। अनुसूशब्दः छकमुखादयुपतिलक्षणशब्दश्चेत्यर्थः आनुसुक इति अनुसूमधीत इति ठक् तस्येसुसुक्तान्तात्क इति कः इति प्रत्ययः पदोत्तरपदा
पस्य सतयोक्तः पूर्वपदमधीते पौर्वपदिकः एवमुत्तरपदिकः शतषष्टेरिति शतशब्दात्षष्टिशब्दाच्च परो यः पथिन्शब्दस्तदंतात्षिकन्भवति ष
कारो ङीषर्थः॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

अनुब्राह्मणात्॥ ॥ब्राह्मणसदृश इति यथार्थे यदव्ययमिति सादृश्ये ऽव्ययीभावः वोऽस्यातिमत्वर्थ इति परिहरति तत्रैतस्मादिति। दूषयति अ
नभिधानादिति साक्षात्परिहारमाह अणो निरस्यर्थं तु वचनमिति कश्चित्तु मत्वर्थ इत्यादि न पठ्यते॥ ॥वसंतादि॥ ॥वसंतसहचरित इति पत्र

॥अनुब्राह्मणादिनिः॥ ॥अनुब्राह्मणशब्दादिनिप्रत्ययो भवति तदधीते तद्वेदेत्येतस्मिन्विषये। अणोऽपवादः॥ ब्रा
ह्मणसदृशो ग्रंथो ऽनुब्राह्मणं तदधीते अनुब्राह्मणी अनुब्राह्मणिनौ अनुब्राह्मणिनः मत्वर्थेनात इनिठनाविति इनि
सिद्धं तत्रैतस्मादनपि प्राप्नोति अनभिधानान्न भविष्यति अणोऽपवादः बाधनिरस्यर्थं तर्हि वचनं॥ ॥वसंतादिभ्यष्ठक्॥
॥वसंत इत्येवमादिभ्यष्ठक्प्रत्ययो भवति तदधीते तद्वेदेत्येतस्मिन्विषये। अणोऽपवादः। वसंतसहचरितो ग्रंथो वसंतः त
मधीते वासंतिकः। वार्षिकः। वसंत। वर्षा। शरत्। हेमंत। शिशिर। प्रथम। गुण। चरम। अनुगुण। अपर्वन्। अथर्वन्॥
॥१५॥ ॥७॥ ॥

वसंतो वर्ण्यते यो वा वसंते ऽध्येयः वसंतसाहचर्यात्ताच्छब्द्यं लभते उक्थादिष्वेते पठितव्या एते वा वसंतादिषु तथा तु न कृतमित्येके अथर्वन् शब्दो ऽत्र
पठ्यते मत्वपचारेण प्रोक्ते ग्रंथे वर्तते अथर्वणिकः दांडिनायन हास्तिनायनेति निपातनान्न स्त्री इति टिलोपाभावः॥ ॥१४॥ ॥ राम॰
९४

।।प्रोक्तात्तु ख।। ।।प्रोक्तसहचरित इति। अर्थस्य प्रोक्तत्वादर्थे न प्रत्ययस्य गौणविषयविषयिणोगाम्भुपआर्थो संभवात्प्रोक्तप्रत्ययसहचरितस्यार्थः अपर
आह प्रोक्तशब्द इह स्वर्यते तेन तत्र दृष्टिकारविहितः प्रत्ययो गृह्यत इति यदि वा प्रोक्ते भवः प्रोक्त इति सौत्रो य अतद्धितान्निर्देशः पाणिनीयमिति न
नुपलो प्राप्तीतिपद्यीत एकापसंपाणिनः पाणिनस्यापत्यं पाणिनो युवा पाणिनिः ततस्तेन प्रोक्तमित्यर्थे विवक्षायामनिलुगिति इञो लुकि कृते
प्रत्ययलक्षणेन जश्च स्वरणप्राप्नोतीति नैष दोषः इञश्चेत्यत्र करणादिभ्यो गोत्रे इत्यतो गोत्र इत्यनुवर्त्तते तेने ञं विशेषयिष्यामः गोत्रे यइञ् विहित

।।प्रोक्ताल्लुक।। ।।प्रोक्तसहचरितप्रत्ययः प्रोक्तः प्रोक्तप्रत्ययान्तादध्येतृवेदित्रोरुत्पन्नस्य लुग्भव
ति। पाणिनिना प्रोक्तं पाणिनीयं तदधीते पाणिनीयः आपिशलः स्त्रियां स्वरे च विशेषः पाणिनीया ब्रा
ह्मणी।। ।।श्री७।। ।।

स्तदन्तादिति तत्र च पारिभाषिकं गोत्रं गृह्यते तेन यूनीञो न भविष्यतीति ततो हाच्छः आपिशलि शब्दादिञश्चेत्यण् उभयत्राध्येतृप्रत्ययस्य
लुक् न च तत्र लुकि सत्यसति वा तदेव रूपमिति नास्ति विशेषस्तत्राह स्त्रियां स्वरे च विशेष इति। असति लुकि स्त्रियां टिड्ढाणञिति ङीप् स्या
त् अणस्वरेणान्तोदात्तत्वं च लुकि तु सति टाप् भवति ञ्नित्स्वरेण मध्योदात्तत्वं च आपिशलेन तु स्वरे नास्ति विशेषः यथा न लुकि सत्यापिशले
सत्र ङीप् भवति तथानुपसर्जनादित्यत्र प्रत्ययादि॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥सूत्राच्च॥ ॥अष्टकं सूत्रमिति अष्टावध्यायाः परिमाणमस्य संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति संख्याया अतिशदन्तायाः कन् संख्या
प्रकृतेरिति वक्तव्यमिति संख्याप्रकृतिर्यस्य प्रत्ययस्य तदन्तात् कोपधादिति वक्तव्यमित्यर्थः कालापकमधीते कालापक इति कलापिना प्रोक्त
मधीयते कालापाः कलापिनोऽण् नान्तस्याटिलोपे सब्रह्मचारीत्सोपसंख्यानिकष्टिलोपः ततस्तदधीत इत्यण् प्रोक्ताल्लुक् कालापानामाम्ना
यः इति गोत्रचरणाद्वुञ् कालापकं तेन तत्तदधीत इत्यण् तस्य लुङ् भवति पारिस्था इत्यविरोधाद्वुञान्तत्वं सामान्त लुगभावे त्वरणः सरूपो भवति स्त्रियां

॥सूत्राच्च कोपधात्॥ ॥सूत्रवाचिनः ककारोपधाद्युत्पन्नस्य प्रत्ययस्य लुग्भवति अप्रोक्तार्थ आरंभः। पा
णिनीयमष्टकं सूत्रं तदधीयते अष्टकाः पाणिनीयाः दशकाः वैयाघ्रपदीयाः त्रिकाः काशकृत्स्नाः। संख्याप्र
कृतेरिति वक्तव्यं इह मा भूत् महावार्त्तिकं सूत्रमधीते माहावार्त्तिकः कालापकमधीते कालापकः। कोपधादि
ति किं चतुष्टयमधीते चातुष्टयः॥ ॥छंदोब्राह्मणानि च तद्विषयाणि॥ ॥प्रोक्तग्रहणमनुवर्त्तते छंदांसि
ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाण्येव भवंति अध्येतृवेदितृप्रत्ययविषयाणि॥ ६६ ॥ ॥ रामं॰

वडीवृ भवति चतुष्टयप्रभृति चत्वारोवयवा अस्य संख्याया अवयवे तयप् कृत्स्वात्मादौ तद्धित इति मृद्धत्वम्॥ ॥छंदोब्राह्मणानि॥ ॥प्रोक्तग्रह ९५
णमनुवर्त्तत इति तदनुवर्त्तमानमेव पूर्वसूत्र आरंभसामर्थ्यान्न संबध्यते छंदांसि च ब्राह्मणानि चेति। तद्वाची निर्देशाद्रूपाणामित्यर्थः स्वरूपग्रहणं
तु न भवति बहुवचनातिर्देशात् अप्रोक्तप्रत्ययान्तत्वाच्च प्रोक्तप्रत्ययान्तानीति प्रोक्तादिति पंचम्यंतं त्रकृतं प्रथमा बहुवचनांतं विपरिणाम्यते छं
दोब्राह्मणानीत्यनेन सामानाधिकरण्यादिति भावः अध्येतृवेदितृप्रत्ययविषयाणीत्यनेनेतद्दर्शयति तत्र छंदोनाध्येतृवेदितृप्रत्ययः परा
म् इष्यते विधेयतयाप्रधानत्वात् नाध्येतृवेदितारावर्थौ तयोः प्रत्ययविधौ गुणाभावादिति किं सिद्धं भवति अध्येतृविषयमपि वाक्यं निवर्त्तितं भवति॥ ६६॥

© Dharmartha Trust J&K. Digitized by eGangotri

अनन्तरभावो विषयार्थ इति ग्रामसमुदायादित्विति तु विषयशब्दो ऽसंभवान्न गृह्यते। अत्र यद्यधीते वेदेत्यनुवर्तेत ततो ऽभेदेन वेदितृविवक्षायामेव तद्विष
यता विधीयेत ततश्च तद्विषयमेव वाक्यं निवर्तयेत न क्रियान्तरविषयं नापि स्वार्थं तमनुपात्तं ततो योगं च यदाह तत्र पृथगधिकारात्तद्विषयप्रसंगाद् इति तस्मात्प्रो
क्तग्रहणमेवानुवर्तते नाधीते वेदेति न च्छन्दसि नच प्रत्ययः परार्थः एवं ते विषयग्रहणं स्वार्थनन्तरभावार्थः तेन सर्वमेतत्स्वार्थं आदि निवर्तते आह च सिद्धं तु प्रो
क्ताधिकारे तद्विषयत्वं च नादिति प्रोक्तग्रहणमेवाधिक्रियते नाधीते वेदेत्येतावर्थौ विस्पष्टार्थः इह प्रोक्तप्रत्ययान्तस्यैव द्रुमप्रकारता दृश्यते स्वार्थं तमनुपात्तं ततो
योगो वाक्यमध्येतृवेदित्रोः प्रत्यय इति चार्थं तं तावत्पाणिनिना प्रोक्तं पाणिनीयमिति प्रोक्तार्थ एव वृत्तिः उपात्तं ततो योगो महत्पाणिनीयमिति वाक्यं पाणि
नीयमधीत इति प्रत्ययः पाणिनीया छात्रा इति छन्दोब्राह्मणानां तु प्रोक्तप्रत्ययान्तानां नित्यमध्येतृवेदित्वं प्रत्ययान्ते तेष्वन्तेन तु स्वार्थं तं आदि इत्यर्थः

अनन्तरभावो विषयार्थः। तेन स्वार्थं तमनुपात्तं अनन्तरयोगो वाक्यं च निवर्तते। कठेन प्रोक्तमधीयते कठाः। मौदाः। पैप्पला
दाः। आर्चाभिनः। वाजसनेयिनः। ब्राह्मणानि खल्वपि। ताण्डिनः। भाल्लविनः। शाट्यायनिनः। ऐतरेयिणः। ब्राह्म
णग्रहणं किं यावता छन्द एव तत्। ब्राह्मणविशेषप्रतिपत्त्यर्थं इह तद्विषयता मा भूत्। याज्ञवल्क्येन प्रोक्तानि ब्राह्मणा
नि याज्ञवल्कानि। सौलभानि। चकारो ऽनुक्तसमुच्चयार्थः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

मिदमारभ्यते तेन शाह तेनेति एवं च कृत्वा अर्थरूपस्यापि तत्रैराति विग्रहः कठान्तिरिति दर्शयति कठेन प्रोक्तमधीयते कठाः। वैशंपायनान्तेवासित्वाच्चिनिः
न स्य कठचरकाल्लुगिति लुक् तत्र स्वधीत इत्यणस्तत्रस्याणि प्रोक्ताल्लुगिति लुक् स्व इति पिप्पलादशब्दाद् प्रोक्तार्थे औत्सर्गिको ऽण् शेषं यथायो
गं पूर्ववत्। ऋचाभो वैशंपायनान्तेवासी एवं तारायः। वाजसनेयशब्दः शौनकादिः। ताण्डिन इति आपत्यस्येति यलोपः। भाल्लविशब्द इञन्तः। शाट्यश
ब्दो गर्गादियञन्तः यञिञोश्चेति फक् ऐतरेयशब्दः शुभ्रादिढगन्तः तेभ्यः पुराणप्रोक्तेष्विति णिनिः सर्वत्राभेदप्रत्ययस्य लुक् ब्राह्मणविशेषप्र
तिपत्त्यर्थमिति। ब्राह्मणस्य विशेषः पुराणप्रोक्तत्वं याज्ञवल्कानीति याज्ञवल्क्यशब्दः कण्वादिः सुलभादौत्सर्गिको ऽण् अत्र स्वार्थं संभव
ति। पुराणप्रोक्तेष्विति अत्र तस्य याज्ञवल्क्यादयो ह्यचिरकालप्रवृत्ता इत्याख्याने षु वार्तिकं॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का०प१८.४ काश्यपिनः कौशिकिन इति काश्यपकौशिकाभ्यामृषिभ्यां णिनिः पाराशरिण इति पाराशर्यशब्दात् ऋण्यादिपञ्जंनात्पाराशर्यशिलालिभ्यामिति णि-
९६ निः पूर्ववद्यलोपः कर्मन्दिन इति कर्मन्दकृशाश्वाद्दिनिः पिंगशब्दात्पुराणप्रोक्तेष्विति णिनिः॥ ॥ तदस्मिन्नस्ति॥ ॥ इति करणात्तत्रश्चेद्विवक्षेति न
नु तन्नामग्रहणाद्देवातिप्रसंगो न भविष्यतीति तन्न द्विविधं नाम कादाचित्केन चित्संकेतितं नित्यं व्यवहारानुपाति तत्र द्वितीयस्यापि ग्रहार्थमिति क

कल्पे काश्यपेन प्रोक्तमधीयते काश्यपिनः। कौशिकिनः। सूत्रे पाराशर्येण प्रोक्तमधीयते पाराशरिणो भिक्षवः।
शैलालिनो नटाः। कर्मन्दिनः। कृशाश्विनः। छन्दोब्राह्मणानीति किं। पाणिनीयं व्याकरणं। पैङ्गी कल्पः॥ ॥ तद
स्मि[redacted]न्नस्तीति देशे तन्नाम्नि॥ ॥ तदिति प्रथमासमर्थविभक्तिः अस्मिन्निति प्रत्ययार्थः अस्तीति प्रकृत्य
र्थविशेषणं इति करणो विवक्षार्थः देशे तन्नाम्नीति प्रत्ययार्थविशेषणं तदिति प्रथमासमर्थादस्मिन्निति सप्त
म्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थमस्ति चेद्भवति यत्तदस्मिन्निति निर्दिष्टं देशश्चेत्स तन्नामा भवति
प्रत्ययान्तनामा इति करणात्तत्रश्चेद्विवक्षा। उदुम्बरा अस्मिन्देशे सन्ति औदुम्बरः बाल्वजः पार्वतः मत्वर्थीयापवादो
योगाः॥ ॥६७॥ ॥ एम०
रणाः क्रियते भूमादिविशेषपरिग्रहार्थं च तन्नाम्नीत्येतत्तु नामधेयताविशेषिणो बलीयसोपि प्रत्ययान्बाधितुं अन्यथा नाप्राप्ते मत्वर्थारंभात्त ९६
स्यायं बाधकः तदपवादत्वेनैत्ति निर्दिष्टादिभिः सह संप्रधारणायामयं वा द्विप्रतिषेधादिति उदाहरणं पूर्ववत्॥ ६७ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥तेननिर्वृत्तः॥ ॥निर्वृत्तमित्यत्रभवितव्यपर्याप्तेः कर्मणि क्तः॥ ॥तस्य॥ ॥अर्जुनावामिति अर्जुनीनौर्येषांतेषामित्यर्थः॥ ॥अदूर॥ ॥
अदूरमंतिकं तत्रभवतीत्यदूरभवः निपातनात्सप्तमी समासः विदिशाया इति दूरांतिकार्थैः षष्ठ्यन्यतरस्यामिति षष्ठी चकार इत्यादि अनुवर्तितुं तस्मिन्त्रा

॥तेन निर्वृत्तं॥ ॥तेनेति तृतीयासमर्थान्निर्वृत्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने देशे तन्नाम्नि
चतुर्ष्वपि योगेषु संबध्यते सहस्रेण निर्वृत्ता साहस्री परिखा कुशांबेन निर्वृत्ता कौशांबी नगरी हेतौ कर्तरि च यथायोगं तृतीया सम
र्थविभक्तिः॥ ॥तस्य निवासः॥ ॥तस्येति षष्ठीसमर्थान्निवास इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति विदिशाया अदूरभवं न
गरं वैदिशं त्रैहिमतं च कारः पूर्वेषां त्रयाणां देशनामधेये गम्यमाने निवसंत्यस्मिन्निति निवासः अर्जुनावां निवासः आर्जुनावः शै
बः आरिष्टः॥ ॥अदूरभवश्च॥ ॥षष्ठीसमर्थविभक्तिरनुवर्त्तते तस्येति षष्ठीसमर्थादूरभव इत्येतस्मिन्नर्थे यथाविहितं
प्रत्ययो भवति एतत्सामर्थ्यानामिह संनिधानार्थः तेनोत्तरेषु योगेषु चत्वारोप्यर्थाः संबध्यंते॥ ॥ओरञ्॥ ॥चत्वारोर्था अनुवर्त्त
न्ते उवर्णांतात्प्रातिपदिकाद्यथापथं समर्थविभक्तियुक्तादञ् प्रत्ययो भवति तदस्मिन्नस्तीत्येवमादिषु चतुर्ष्वर्थेषु अणोपवादः
अरडु आरडवं कक्षतु काक्षतवं कर्कटेलु कार्कटेलवं नद्यां तु परत्वान्मतुबेव भवति इक्षुमती अञधिकारः प्राक् सुवास्त्वादिभ्योणः॥
॥मतोश्च बह्वजंगात्॥ ॥बह्वच् अंगं यस्यासौ बह्वजंगो मतुप् तदंतात्प्रातिपदिकादञ्प्रत्ययो भवति चातुरर्थिकः अणोप
वादः ऐषुकावतं सैध्रकावतं बह्वजंगादिति किं आहिमतं त्रैहिमतं यावमतं॥ ॥

नंतर्पदि यमेवार्थस्तत्र संबध्येत॥ ॥ओरञ्॥ ॥अरडुः क्षत्रियविशेषः नद्यां मतुप्परत्वादिति आरडवमित्यादिरजोवकाशः नद्यां मतुविषयो
दुंबएवतीत्याद्यि॥ ॥मतोश्च॥ ॥चातुरर्थिका इति चतुर्णामर्थानां समूहश्चतुरर्थी तत्र भवः अध्यात्मादित्वाट्ठञ् तद्धितार्थे द्विगौ तु ठञो लुक् स्यात्॥

© Dharmartha Trust J&K. Digitized by eGangotri

र्थग्रहणं किमिति। मतोऽस्य बह्वच इत्येवास्तु अधिकारोऽयं पंचम्यो बह्वचो यो विहितो मतुपनद्यां दिति विज्ञायमाने सिद्ध्यत्येव विवक्षितमिति प्रश्नः। म
तुवंतविशेषणं मा भूदिति। अन्यथा सामानाधिकरण्ये संभवति वैयधिकरण्यस्यायुक्तत्वान्नत्वस्यैव विशेषणं स्यादिति भावः। अस्ति चेदिदानीं बह्वि

र्थग्रहणं बह्वजिति तद्विशेषणं यथा विज्ञायेत मत्वंतविशेषणं मा विज्ञायीति। मालावतां निवासो मालवती॥ ॥बह्वचः कू
पेषु॥ ॥बह्वचः प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः कूपेष्वभिधेयेषु अणोऽपवादः यथासंभवमर्थः संबध्यते दीर्घवर
त्रेण निर्वृत्तः कूपो दैर्घवरत्रः कापिलवरत्रः॥ ॥उदक् च विपाशः॥ ॥विपाशः उत्तरे कूले ये कूपास्तेष्वभिधेयेष्वञ् प्रत्ययो भव
ति चातुरर्थिकः अबह्वजर्थ आरंभः दत्तेन निर्वृत्तः कूपो दात्तः गौप्तः उदगिति किं दक्षिणतो विपाशः कूपेष्वण्
दात्तः गौप्तः स्वरे विशेषः महती सूक्ष्मेषीका वर्तते॥ ॥संकलादिभ्यश्च॥ ॥कूपेष्विति निवृत्तं संकल इत्येवमादिभ्यो
ञ् प्रत्ययो भवति चातुरर्थिकः अणोऽपवादः यथासंभवमर्थसंबंधः संगतः कलः संकलः संकलेन निर्वृत्तं सांकलं पौष्कलं
॥संकल॥ पुष्कल॥ उडुप। उत्पुट। कुंभ। निधान। सुदक्ष। सुदत्त। सुभूत। सुनेत्र। सुपिंगल। सिकता। पूतिक। पूलास। कूलास।
पलाश। निवेश। गवेश। गंभीर। इतर। अन्। अहन्। लोमन्। वेमन्। करुण। बहुल। सद्योज। अभिषिक्त। गोभृत्। राजभृत्।
मल्ल। माल॥ ॥स्त्रीषु सौवीरसाल्वप्राक्षु॥ ॥देशे तन्नाम्नीत्यस्य विशेषणं सौवीरादयः स्त्रीत्वं च प्रातिपदिकादञ् प्र
त्ययो भवति चातुरर्थिकः अणोऽपवादः सौवीरे स्त्रीलिंगे देशे वाच्ये साल्वे प्राचि च। सौवीरेषु तावत्। दत्तामित्रेण निर्वृत्ता दात्तामित्री
नगरी। साल्वेषु विधूमाग्निना निर्वृत्ता वैधूमाग्नी नगरी। प्राचि खल्वपि माकंदेन नि
र्वृत्ता काकंदी माकंदी। मणिचरी। जारूषी ॥१८॥

स्वबह्वज्मत्वंतः यदर्थं बह्वज्ग्रहणं स्यात् अस्ति साहस्रवान् रुरुवान्॥ ॥उदक् च॥ ॥महती सूक्ष्मेषिकेति एवं नामस्वरेण्याचार्यो व्यवहित
इति आचार्यस्य प्रशंसैषा॥ १८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ ॥सुमासु॥ ॥अज इति अणग्रहणार हितसूत्राभिप्रायमेतत् तस्य तु प्रयोजनं स्वयमेव वक्ष्यति अणग्रहणं मतुपो बाधनार्थमिति तेन व
स्तुतो मतुपोऽप्ययमपवादः अथाणग्रहणं किमर्थं न सुवास्त्वादिभ्यो यथाविहितमिति सेत्स्यति तत्र निर्वचनात् द्वयोर्विहितो न च प्राप्नोतीति स एव भवि

॥सुवास्त्वादिभ्योऽण्॥ ॥सुवास्तु इत्येवमादिभ्यः अण् प्रत्ययो भवति चातुरर्थिकः यथासंभवमर्थसं
बंधः। अत्र उवर्णांतलक्षणस्य कूपलक्षणस्य चापवादः। सुवास्तोरदूरभवं सौवास्तवं। वार्णवं। अणग्र
हणं नद्यां मतुपो बाधनार्थं सौवास्तवी नदी। सुवास्तु। वर्णु। वंडु। शेवालिन्। कर्पूरिन्। शिखंडिन्। गर्त।
कर्कश। शटीकर्ण। कृष्ण। कर्क। धूमती। गोह। अहिसक्थ॥ छ॥ ॥७॥ ॥७॥ ॥

ष्यतीति विचारो भवति तत्राह अणग्रहणमिति असत्यणग्रहणे मध्येऽपवादन्यायेन यथाविहितमिति उच्यमानोऽणेव बाधकः स्यात् न तु मतुप
नुपरत्वाद्बाधकेन पुनरणग्रहणात् मतुपो विषये भवतीत्यर्थः किंच औत्सर्गिकस्य नद्यां मतुपः परत्वाद् बाधकः स्यात् तत्राप्यसत्यणग्रहणे यथावि
यादिस्वरेण अशेः सरन्यः संपूर्वाद्विदिति संवत्सरशब्दो न्तोदात्तः मुहूर्त्तनिमित्तशब्दौ प्रातिपदिकस्वरेण उपनिषत्शब्दः क्विप् उपनिषच्छब्द
ः कृत्स्वरेणान्तोदात्तः ॥ ॥ तत आगतः ॥ ॥ तत इति मुख्यं पञ्चमपादानं विवक्षितं तदिहग्रहणं तत इति मुख्यत्वादेव अपादानं तत्तु नान्तरीय

॥ ७४ ॥

राम॰
१२६

॥शुंडिका॥ ॥आपस्यानठकोपवाद इति उपलक्षणमेतत् ठककणशब्दात्कणापर्णान्नाठञ् इति छस्याप्यपवादः तीर्थशब्दात्सूमादिलक्षणस्य वुञोऽप
वादः उदपानशब्दाद्उत्साद्यञोऽप्यपवादः अथाणग्रहणं किमर्थं न शुंडिकादिभ्योऽयथाविहितमेवोच्यतेत्वचनसामर्थ्याद्विधेयो विहितो न च प्राप्नोतीत्य

॥शुंडिकादिभ्योऽण्॥ ॥शुंडिका इत्येवमादिभ्यः प्रातिपदिकेभ्योऽण्प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये आपस्या
नठकोपवादः शुंडिकादागतः शौंडिकः कार्कणः अणग्रहणं बाधकबाधनार्थं औदपानः॥ शुंडिका। ठकण। स्थंडिल।
उदपान। उपल। तीर्थ। भूमि। तृण। पर्ण॥ ॥विद्यायोनिसंबंधेभ्यो वुञ्॥ ॥विद्यायोनिकृतः संबंधो येषां ते विद्यायोनिसं
बंधास्तद्वाचिभ्यः प्रातिपदिकेभ्यो वुञ्प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये अणोऽपवादः छं तु परत्वाद्बाधते वि
द्यासंबंधेभ्यस्तावत् उपाध्यायादागतं औपाध्यायकं शैष्यकं आचार्यकं योनिसंबंधेभ्यः मातामहकं पैतामहकं मा
तुलकं॥ ॥ऋतष्ठञ्॥ ॥विद्यायोनिसंबंधेभ्य इत्येव ऋकारांतेभ्यः प्रातिपदिकेभ्यो विद्यायोनिसंबंधवाचिभ्यष्ठ
ञ्प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये वुञोऽपवादः विद्यासंबंधवाचिभ्यस्तावत् होतुरागतं हौतृकं पौतृकं यो
निसंबंधवाचिभ्यः भ्रातृकं स्वासृकं मातृकं तपरकरणं सुखार्थं विद्यायोनिभ्याम् अन्यत्र सावित्रं॥ ॥पितुर्यच्च॥ ॥पितृ
शब्दाद्यत्प्रत्ययो भवति चकाराट्ठञ्च तत आगत इत्येतस्मिन्विषये पितुरागतं पित्र्यं पैतृकं॥

येन बाधितत्वात्सर्वत्राणमेव प्रयुक्तत आहरणमिति उदपानशब्दः इह पठ्यते स चोत्सादिः तत्राणग्रहणमपि आपस्यानठकं बाधित्वा उत्सादिभ्यो
ञ् इत्यञेव स्यात् अणग्रहणात्स्वरो न भवति॥ ॥विद्यायोनि॥ ॥विद्यायोनिकृत इति बहुव्रीहौ गतार्थत्वात् कृतशब्दस्याप्रयोगः॥ ॥ऋत
ष्ठञ्॥ ॥ एतदाहरणेऽपि सुसुज्ञानात्कः एवं प्रक्रियालाघवं वायकञ्जे वायं विधेयः तथा तु न कृतमित्येव॥ ॥पितुर्यच्च॥ ॥पित्र्यमिति रीङ्

॥गोत्रादंक॥ ॥अंकग्रहणेन तस्येदमित्यर्थसामान्यं लक्ष्यत इति कथं पुनरेतद्भवति लक्षणाश्रीयते व्याख्यानमत्र शरणं अपरस्त्वाह अंके पद
ष्टं तदतिदिश्यते न त्वंक आहत्य विहितं गोत्रचरणाद्वुञित्यपि वुञ् तस्येदमिति सामान्ये विहितो यथा दिश्यति किं विषये केपि दृष्ट इति तस्याभ्य
तिदेश इति औपगवकमिति वुञ् उदाहरणं आणस्तु वैदं गार्ग्यं दाक्षमिति विवृतिः सर्वसाधारण्यार्थः कालेभ्यो भववत् चरणेभ्यो धर्मवदिति यथा॥ ॥हेतु

॥गोत्राद्ंकवत्॥ ॥अपत्याधिकारादन्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्यते गोत्रप्रत्ययान्तात्प्रातिपदिकादंकवत्प्रत्ययविधिर्भवति
तत आगत इत्येतस्मिन्विषये अंकग्रहणेन तस्येदमित्यर्थसामान्ये लक्ष्यते तस्माद्वुञ्प्रत्ययो निर्दिश्यते नाणेव संबोक लक्षणो वुञ् जि
नामणीति औपगवानामंकः औपगवकः कापटवकः नाडायनकः चारायणकः एवमौपगवेभ्य आगतमौपगवकं कापटवकं
नाडायनकं चारायणकं॥ ॥हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः॥ ॥हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां रूप्यप्रत्ययो भवति तत आगत
इत्येतस्मिन्विषये मनुष्यग्रहणमहेत्वर्थं हेतुः कारणं हेतुभ्यस्तावत् समादागतं समरूप्यं समीयं विषमरूप्यं विषमीयं गाहा
दिलाच्छः मनुष्येभ्यः देवदत्तरूप्यं यज्ञदत्तरूप्यं दैवदत्तं याज्ञदत्तं अवकुवचनं स्वरूपविधिनिरासार्थं॥ ॥मयट्॥ ॥हेतुभ्यो म
नुष्येभ्यश्च मयट् प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये सममयं विषममयं मनुष्येभ्यः देवदत्तमयं यज्ञदत्तमयं टकारो ङीब
र्थः सममपि योगविभागो यथासंख्यनिरासार्थः॥ ॥१५॥ ॥छ॥ ॥

मनु॥ ॥समादागतमिति समाद्धेतोरागतमित्यर्थः तत्र हेतावित्ति न तृतीया प्राप्नोति ज्ञापकात्सिद्धं पदं यंचम्यंताद्धेतोः प्रत्ययमाहत ज्ञापयति भव
ति हेतौ पंचमीति नैतदस्ति ज्ञापकं यत्र विभाषा गुणेऽस्त्रियामिति पंचमी तदर्थमेतत्स्यात् जाड्यादागतः स्त्रियां गुणाद्विभाषा गुणेऽस्त्रियां तत्र विभाषेति योगविभागाद्गु
णवचनादपि पंचमी भवति॥ ॥मयट्॥ ॥योगविभागो यथासंख्यनिरासार्थ इति विकल्पार्थेनान्यतरस्यांग्रहणेन रूप्यमयटोः पक्षाभावः प्र
तिपाद्यते तदभावे स्वशास्त्रेणैव प्राप्तः प्रत्ययो भवति तेन रूप्यमयटोरेवानेन विधानात्प्रसक्तियोगविभागोऽस्मादेव यथासंख्यमिति भावः॥ १५॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥प्रभवति॥ ॥प्रकाशत इति प्रथमनिर्वचनन्तु प्रभवति निर्गच्छते तेन तत्र जात इत्यनेनागतत्वात्॥ ॥विदूराञ्ञ्यः॥ ॥अयुक्तोऽयं निर्देश इत्याह ननु चेति वा
लवायो विदूरं चेति बालवायशब्दः प्रत्ययमुत्पादयति विदूरं चादेश्यमापाद्यते सूत्रे चादेश एव निर्दिष्टस्तेनानुरूपः स्यात् बालवायशब्द आक्षिप्यते यथा
शिवादिषु विश्रवणरवणादेशाभ्यां पठिताभ्यां विश्रवः शब्दः प्रकृत्यन्तरमेव वेति विदूरशब्दो नगरस्येव पर्वतस्यापि वाचकः स एवात्र प्रकृतिरित्यर्थः

॥प्रभवति॥ ॥तत इत्येव पंचमीसमर्थान्न च्यप्प्रातिपदिकात्प्रभवतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति प्रभवति प्रकाश
ते प्रथमत उपलभ्यत इत्यर्थः हिमवतः प्रभवति हैमवती गंगा शारदी सिंधुः॥ ॥विदूराञ्ञ्यः॥ ॥विदूरशब्दाञ्ञ्यप्रत्ययो भवति
ततः प्रभवतीत्यस्मिन् विषये अणोऽपवादः विदूरात्प्रभवति वैदूर्यो मणिः ननु च बालवायात्स प्रभवति न विदूरात् तत्र तु संस्क्रिय
ते एवं तर्हि बालवायो विदूरं च प्रकृत्यंतरमुच्यते नवैतत्रेति चेद्दुर्या जित्वरीवद्दुपाचरेत्॥ ॥तद्गच्छति पथिदूतयोः॥ ॥तदिति
द्वितीयासमर्थाद्गच्छतीत्येतस्मिन् विषये यथाविहितं प्रत्ययो भवति योऽसौ गच्छति पंथाश्चेत्स भवति दूतो वा स्रुघ्नं गच्छति स्रौघ्नः पंथाः
स्रौघ्नो दूतो वा माथुरः राष्ट्रियः तत्स्थेषु गच्छत्सु पंथा गच्छतीत्युच्यते अथवा स्रुघ्नप्राप्तिः पथो गमनं पथिदूतयोरिति किं स्रुघ्नं ग
च्छति सार्थः॥ ॥श्रीरामचंद्राय नमः॥ ॥
नवैतत्रेति चेदिति चेत् शब्दो लक्ष्मायां पर्वतवाची विदूरशब्दो न प्रसिद्ध इति चेत् स्यात् जित्वरीवद्दुपाचरेत् व्यवहरेत् यथा वणिज एव मंगलार्थं वाराणसीं
जित्वरीति व्यवहरंति एवं वैयाकरणा एव बालवाये विदूरमुपचरंति नियतपुरुषापेक्षापि प्रसिद्धिर्भवतीत्यर्थः॥ ॥तद्गच्छति॥ ॥प्राप्ति
फलेप्सित्वे देशगमिर्वर्तते तेन न पथः परिस्पंदोऽस्ति तस्मात् पुरुषवर्तिगमने यस्मात् स्रुघ्नपर्यंतस्थ इत्याह तत्स्थेष्विति अथवेति प्राप्त्यर्थे गमिर्वर्तते यथा दे
वमभ्युर्यं गत इति॥ ॥५१॥ ॥७॥ ॥

का·४३·४ अभिनिष्क्रामति॥ ॥द्वारमभिनिष्क्रमणक्रियायामिति॥ अनेनैतदाह तत्स्थेष्वभिनिष्क्रामत्सु करणं भूतेन द्वारेण द्वारेणोपाधारमेवाभिनिष्क्रामतीत्युक्तम् इति
१२८ अभिनिष्क्रमणं द्वारमिति तेनोक्तं न देशेति द्वितीयाधिकारात्तदाह हि कृयोगलक्षणा षष्ठी प्राप्नोति॥ ॥अधिकृत्य॥ ॥आख्यायिकाभ्य इति॥ तदर्थे

अभिनिष्क्रामति द्वारं॥ ॥तदित्येव द्वितीयासमर्थात् मतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तदभिनिष्क्रामति द्वारं चेत्तद्भ
वति आभिमुख्येन निष्क्रामति अभिनिष्क्रामति स्रुघ्नमभिनिष्क्रामति कान्यकुब्जं द्वारं स्रौघ्नं माथुरं राष्ट्रियं द्वारमभिनिष्क्रमणक्रियायां क
रणं प्रसिद्धं तदिह स्वार्तेनोच्यते यथा साधुरसिश्छिनत्तीति द्वारमिति किम् स्रुघ्नमभिनिष्क्रामति पुरुषः॥ ॥अधिकृत्य कृते ग्रं
थे॥ ॥तदित्येव अधिकृत्येत्येतदपेक्षा द्वितीया अधिकृत्य प्रस्तुत्यारभ्येत्यर्थः तदिति द्वितीयासमर्थादधिकृत्य कृत इत्येतस्मिन्नर्थे
यथाविहितं प्रत्ययो भवति यत्तत्कृतं ग्रन्थश्चेद्भवति सुभद्रामधिकृत्य कृतो ग्रन्थः सौभद्रः गौरिमित्रः यायातः ग्रन्थ इति किम् सुभद्रामधिकृ
त्य कृतः प्रासादः लुबाख्यायिकाभ्यः प्रत्ययस्य बहुलं वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता सुमनोत्तरा उर्वशी न च भव
ति भैमरथी॥ ॥शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः॥ ॥तदित्येव अधिकृत्य कृते ग्रन्थ इति च शिशुक्रन्दादिभ्यो द्वितीया
समर्थेभ्यश्छप्रत्ययो भवति अधिकृत्य कृते ग्रन्थे अणोऽपवादः शिशूनां क्रन्दनं शिशुक्रन्दस्तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः
यमस्य सभा यमसभं यमसभीयः द्वन्द्वात् अग्निकाश्यपीयः श्येनकपोतीयः शब्दार्थसंबन्धीयं प्रकरणं वाक्यपदीयं इन्द्रजननादिभ्यः
इन्द्रजननीयः प्रद्युम्नागमनीयः सीतान्वेषणीयः इन्द्रजननादिराकृतिगणः प्रयोगतोऽनुसर्तव्यः प्रातिपदिकेषु न पठ्यन्ते द्वन्द्वे देवासु
रादिभ्यः प्रतिषेधः दैवासुरं राक्षोसुरं गौणमुख्यं इन्द्रजननादेराकृतिगणत्वाच्छिशुक्रन्दादयोपि तत्रैव द्रष्टव्याः प्रपंचार्थमेषां ग्रहणं एवं
च सति देवासुरादिभ्यः प्रतिषेधो न वक्तव्यः तत्र छप्रत्ययस्यादर्शनात॥ १६॥ ॥

चतुर्थी आख्यायिका ग्रंथप्रभेदः तदभिधानाय प्रत्ययस्तस्य बहुलं लुप् भवतीत्यर्थः न चेदं वक्तव्यं अभेदोपचारेणाताच्छब्द्यलाभा एम॰
त् अभिधानलक्षणत्वाच्च चित्ताद्भुत उत्पद्यते न कश्चिन्॥ ॥शिशुक्रंद॥ ॥इन्द्रजननादिराकृतिगण इति तेन विरूढभोजनीयमध्यायमाख्या १२८
स्याम इति सिद्धं भवति॥ ॥१६॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥सोऽस्य॥ ॥इह यस्मात्स्रुघ्नो निवासः स्रुघ्ने सो भवति ततस्तत्र भव इत्येव सिद्धे शब्दार्थभेदात्तु पृथग्योगादानं॥ ॥अभिजनश्च॥ ॥अभिजनाः
पूर्वबांधवा इत्यभिजायन्तेनेभ्य इति कृत्वा पूर्वबांधवाः पित्रादयः बंधुशब्दः प्रजादिः तत्संबंधाद्देशोऽपीति यस्मिन् पितृसंबंधाद्देशे षष्ठिशब्दः पुरुषे व-
र्त्तते तथाभिजनशब्दो देशे कः पुनरसौ देश इत्याह यस्मिन्निति तदिहेतादिति दिति वाक्योपन्यासे कथं पुनर्मुख्ये ऽभिजने ऽस्य संभवति गोत्रा(?)न्यायोऽभ

॥सोऽस्य निवासः॥ ॥स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं निवासश्चेद्भ-
वति निवसंत्यस्मिन्निति निवासो देश उच्यते स्रुघ्नो निवासोऽस्य स्रौघ्नः माथुरः राष्ट्रियः॥ ॥अभिजनश्च॥ ॥सोऽस्येत्येव
स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थमभिजनश्चेत्स भवति अभिजनाः पूर्वबां-
धवास्तत्संबंधाद्देशोऽप्यभिजन उच्यते यस्मिन्पूर्वबांधवैरुषितं तस्मादिह देशवाचिनः प्रत्ययो न बंधुभ्य एव निवासप्रत्या-
सत्तेः स्रौघ्नोऽभिजनोऽस्य स्रौघ्नः माथुरः राष्ट्रियः निवासाभिजनयोः को विशेषः यत्र संप्रत्युष्यते स निवासः यत्र पूर्वैरुषि-
तं सोऽभिजनः योगविभाग उत्तरार्थः॥ ॥छ॥ ॥छ॥ ॥

वतीत्याह निवासप्रत्यासत्तेरिति प्रत्यासत्त्या नानंतरं संनिहितेन निवासशब्देनाभिजनस्य विशेषणादित्यर्थः इह हि निवासोऽप्यभिजन इति विशेषि-
ते तस्माद्देशवाचिन एव प्रत्ययः निवासाभिजनयोः को विशेष इति अभिजनस्यापि निवासत्वात्तस्य ग्रहणात्तस्यैव विशेष इत्यर्थः यत्रेति यत्र स्वयं नि-
वसति स तस्य निवासः यत्र तु पूर्वैः पित्रादिभिरुषितं सोऽभिजन इत्यर्थः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥आयुध॥ ॥आयुधजीविभ्य इति तादर्थ्ये चतुर्थी सा दित्तायुधजीविभ्य इति पंचमी स्यात् वर्त्तारितित्वज्ञोपेयं पंचमी आम्येयास्यात् ततआयमर्थः स्या
त् आयुधजीविभ्यः पर्वतमुद्दिश्य पर्वतेभिधेये छो भवतीति तत्र सोभिजन इत्यधिकारो बाध्येत॥ ॥शंडिका॥ ॥अणादेरपवाद इति आदिशब्देन

॥आयुधजीविभ्यश्छः पर्वते॥ सोऽस्याभिजन इति वर्त्तते आयुधजीविभ्य इति तादर्थ्ये चतुर्थी यिबत इति प्रकृतिविशेषणं प
र्वतवाचिनः प्रथमासमर्थादभिजनादस्येति षष्ठ्यर्थे छप्रत्ययो भवति आयुधजीविभ्यः आयुधजीभ्यर्थे आयुधजीविनोभिधा
तुं प्रत्ययो भवतीत्यर्थः हृद्गोलः पर्वतोभिजन एषामायुधजीविनां हृद्गोलीयाः अंधकवर्त्तीयाः रोहितगिरीयाः आयुधजीविभ्य
इति किं ऋक्षोदः पर्वतोभिजन एषां ब्राह्मणानाम् आर्क्षोदा ब्राह्मणाः पर्वत इति किं सांकाश्यकाः आयुधजीविनः॥ ॥शंडिका
दिभ्यो ञ्यः॥ ॥शंडिक इत्येवमादिभ्यः प्रातिपदिकेभ्यो ञ्यप्रत्ययो भवति सोऽस्याभिजन इत्येतस्मिन्विषये अणादेरपवादः
शांडिक्यः सार्वसेन्यः ।शंडिका सर्वसेन ।सर्वकेश ।शक ।शट ।रक ।शंख ।बोध ।॥ ॥सिंधुतक्षशिलादिभ्योऽणञौ॥ ॥आदिश
ब्दः प्रत्येकमभिसंबध्यते सिंध्वादिभ्यस्तक्षशिलादिभ्यश्च यथासंख्यमणञौ प्रत्ययौ भवतः सोऽस्याभिजन इत्येतस्मिन्विषये
सैंधवः वार्णवः ।सिंधु ।वर्णु ।गंधार ।मधुमत् ।कंबोज ।कश्मीर ।साल्व ।किष्किंधा ।गंदिक ।उरसा ।दरत् ।पेतुकच्छादिषु प
ठ्यंते सिंधुवर्णुप्रभृतयस्तेभ्यस्तत एवाणि सिद्धे मनुष्यवुञो बाधनार्थं वचनं ।तक्षशिलादिभ्यः खल्वपि ताक्षशिलः वात्सोद्ध
रणः ।तक्षशिला ।वत्सोद्धरण ।कैमेदुर ।कांडवारण ।ग्रामणी ।सरालक ।कंस ।किंनर ।संकुचित ।सिंह ।कोष्ठ ।कर्णीको
ष्ठ ।कर्णीकोष्ठ ।बर्बर ।अवसान॥ ९७ ॥

छ्देश्च तत्र यदि शंडिकादयः पर्वतशब्दास्ततः पूर्वेणैव छः प्राप्तः अथ जनपदशब्दास्ततो वृद्धादपि बहुवचनविषयादिति वुञ् शंडिकाशब्दात्कोप
धादण् प्राप्तः॥ ॥सिंधुतक्ष॥ ॥सिंधुवर्णुप्रभृतयः जनपदशब्दास्तेन मधुमत् कंबोज साल्व कश्मीर गंधार इत्येतेभ्यः किष्किंधादिभ्यश्चतुर्भ्यो
कच्छादित्वादिति वुञि प्राप्ते वचनं तक्षशिलादिषु पि ह केभ्यश्छः प्राप्तः शेषेभ्यः प्राग्दीव्यतोऽण॥ ९७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥अचित्ता॥ ॥अचित्तवाचिनइतिस्वरूपग्रहणंतुभवति देशकालप्रतिषेधात्ततस्ताहचर्याद्देशकालयोरपिस्वरूपग्रहणंनभवति॥ ॥ ॥ ॥

॥तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः॥ ॥तस्यादिभ्यश्चतुर्भ्यः शब्देभ्योयथासंख्यंचत्वारएवढक्छण्ढञ्यक्इत्येते
प्रत्ययाभवंतिसोस्याभिजनइत्येतस्मिन्विषयेअपवादः॥ तौदेयः॥ शालातुरीयः॥ वार्मतेयः॥ कौचवार्यः॥ भक्तिः॥ ॥स
मर्थविभक्तिः प्रत्ययार्थश्चानुवर्त्ततेअभिजनइतिनिवृत्तंसइतिप्रथमासमर्थादस्येतिषष्ठ्यर्थेयथाविहितंप्रत्ययोभवतियत्तत्प्र
थमासमर्थंभक्तिश्चेद्भवतिभज्यतेसेव्यतेइतिभक्तिः स्रुघ्नोभक्तिरस्यस्रौघ्नः माथुरः राष्ट्रियः॥ ॥अचित्तादेशकालाट्ठक्॥
॥देशकालव्यतिरिक्तादचित्तवाचिनः प्रातिपदिकाट्ठक्प्रत्ययोभवतिसोस्यभक्तिरित्येतस्मिन्विषयेअपवादः हृद्वाच्छुप
रत्वांघातेअपूपोभक्तिरस्यआपूपिकः शाष्कुलिकः पायसिकः अचित्तादितिकिं दैवदत्तः अदेशादितिकिंस्रौघ्नः अकालादि
तिकिंग्रैष्मः॥ ॥महाराजाट्ठञ्॥ ॥महाराजशब्दाट्ठञ्प्रत्ययोभवतिसोस्यभक्तिरित्येतस्मिन्विषयेअपवादः महाराजोभ
क्तिरस्यमाहाराजिकः प्रत्ययांतरकरणंस्वरार्थं॥ ॥छ छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का·प्र·४ वासुदेवा।। ।।छाणोरपवाद इति वासुदेवशब्दः संज्ञेति वक्ष्यति तेन न तत्रोन्तरस्य वुञो प्राप्तिः अर्जुनशब्दोपि गोत्रक्षत्रियविशेषवचनो वर्णविशेषवचनो वा न त
१३० त्र वुञः प्राप्तिः क्षत्रियवचनादपि बहुलवचनाद्वुञो प्राप्तिर्वेति भावः ननु चैसा शिव सुदेवस्याप संज्ञाध्येष कहाघ्निा कुरुभ्यश्च तस्मात् न चात्रेति तेन न तावद
ज्ञो विशेषः प्रागेव वृद्धत्वात् यो पिद्व हि निमित्तस्येति पुंवद्भावप्रतिषेधः सोत्राप्यत्र कोपधायाश्चास्य संज्ञेयादेवताविशेषस्येति वसतासिन्सर्वमि

वासुदेवार्जुनाभ्यां वुन्।। ।।वासुदेवार्जुनशब्दाभ्यां वुन् प्रत्ययो भवति सोस्य भक्तिरित्येतस्मिन्विषये छाणोरपवादः वासुदेवो भ
क्तिरस्य वासुदेवकः अर्जुनकः ननु च वासुदेवशब्दात् क्षत्रियाख्येभ्य इति वुञ्स्त्येव न चात्र वुञ्वुनोर्विशेषो विद्यते किमर्थं वासुदेवग्र
हणं संज्ञैषा देवताविशेषस्य न क्षत्रियाख्या अथवा एतज्ज्ञापयति अल्पाच्तरमिति चार्जुनशब्दस्य पूर्वनिपातमकुर्वन् ज्ञापयति अभ्यर्हि
तं पूर्वं निपततीति।। ।।गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्।। ।।गोत्राख्येभ्यः क्षत्रियाख्येभ्यश्च प्रातिपदिकेभ्यो बहुलं वुञ्
प्रत्ययो भवति सोस्य भक्तिरित्येतस्मिन्विषये अणोपवादः वृद्धाच्छं परत्वाद्बाधते ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः औ
पगवकः कापटवकः क्षत्रियाख्येभ्यः नाकुलकः साहदेवकः साम्बकः आख्याग्रहणं किमर्थं क्षत्रियशब्दपरिग्रहार्थं यथा
कथंचित् क्षत्रिय इति माभूत् बहुलग्रहणात् क्वचिन्न प्रवर्तते पाणिनो भक्तिरस्य पाणिनीयः पौरवीयः।। १८ ।। ।।

ति वुनस्त्याणमाल्त न एषा संज्ञा न क्षत्रियाख्येति तु फलक्षणमेतत् नापि गोत्राख्येत्यपि द्रष्टव्यं प्रसंगिकं प्रयोजनान्तरं वासुदेवग्रहणस्य दर्शयति राम॰
अज्ञापयदं तं अल्पाच्तरमिति चेन्निर्दिनिकरणः असेकमभि सेव ल्मते यद्यप्येतज्ज्ञाप्यते तथापि श्वयुवमघोनामतद्धित इति निर्देशात् क्वचिदन्यथापि १३०
भवति।। ।।गोत्रक्षत्रि।। ।।गोत्रक्षत्रियाख्येभ्य इत्याह एवं तत्याने मूलविभुजादित्वात्कः आख्याग्रहणमिति आह पूर्वस्या ख्यातेर्ग्रहणा
मित्यर्थः यथाकथंचिदिति क्षत्रियशब्दसामानाधिकरण्यात् येषां क्षत्रियवृत्तिः यथा शूद्रः क्षत्रिय इति तेभ्यो माभूदित्यर्थः।। ।।१८।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

का-५८४

०ज्ञनयदिनां॥ ॥जनपदिनां जनपदिवाचिनां शब्दानां जनपदवत् जनपदवाचिनां शब्दानामिव जनपदेन जनपदवाचिना शब्देन समानशब्दानां समानश्रुती
नां बहुवचने बह्वर्थाभिधाने वृत्तेरप्येष एवार्थः प्रत्ययः प्रकृतिश्चेति श्च अनेन सर्वं ग्राह्यस्यार्थो दर्शितः जनपदिनो जनपदस्वामिन इति तत्स्वामिभावसंबन्धे मत्वर्थी
यं दर्शयति। अंगा जनपद इत्यादिना दृष्टान्ते प्रवृत्तिप्रकारमाह तद्धितेत्यादिना तदाहरणे सर्वत्र बहुषु यर्थेषु अणाधेत्यादिना विहितस्याणस्तद्राजस्य बहुषु त्विति लु

॥जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने॥ ॥जनपदिनो ये बहुवचने जनपदेन समानशब्दास्तेषां जनपदवत्सर्वं
भवति प्रत्ययः प्रकृतिश्च सोस्य भक्तिरित्येतस्मिन्विषये जनपदतद्वध्योश्चेत्यत्र प्रकरणे ये प्रत्यया विहितास्ते जनपदिभ्योप्यस्मिन्नर्थे विधि
ध्यन्ते जनपदिनो जनपदस्वामिनः क्षत्रियाः अंगा जनपदो भक्तिरस्य आंगकः वांगकः सौह्मकः पौण्ड्रकः तद्वदंगाः क्षत्रिया भक्तिरस्य आंगकः
वांगकः सौह्मकः पौण्ड्रकः जनपदिनामिति किं पंचाला ब्राह्मणा भक्तिरस्य पांचालः सर्वग्रहणं प्रकृत्यतिदेशार्थं स च द्व्येकयोरतिदेशं प्रयोज
यति वृद्धिनिमित्तेषु वुञादिषु विशेषो नास्तीति मद्रवृज्योः कनि विशेषः मद्रस्यापत्यं द्व्यञ्मगधकलिंगसूरमसादण् माद्रः वृजिद्वाद
पि वृद्धेत्कोसलाजादाञ्ञ्यङ् वार्ज्यः स भक्तिरस्येति प्रकृतिनिर्ह्रासिकृते मद्रकः वृजिकः॥ ॥श्री४॥ ॥श्री४॥ ॥

किं लुते समानशब्दत्वादपि बहुवचनेति वृजिविशेषिते गोत्रे लुगचीति वचनात् आंगाशब्दा हि जनपदपंचाला ब्राह्मणा इत्यभेदोपचाराद्ब्राह्मणेषु पंचाल
शब्दस्य वृत्तिः तत्रातिदेशाभावाद् वृद्धिर्न भवति सर्वग्रहणमित्यादि समनिमर्थ्यग्रहणे प्राधान्येनात्र यस्यैवातिदेशः स्यान्न प्रकृतेः वृत्तिनिर्देशस्तु ये जनपदे
ये जनपदिनस्तेषां तज्जनपदशब्दस्य वा यथा स्यात् तज्जनपदान्तरप्रत्ययो मा भूदित्येवमर्थः स्यान्न त्वनेन प्रकृत्यतिदेशो लभ्यते तस्मात्तदर्थं सर्वग्रहणं कि
यते स च द्व्येकयोः प्रयोजयतीति पाठः स्वप्रकृत्यतिदेशः सर्वग्रहणं द्व्येकयोः प्रयोजयति न बहुषु तत्र रूपस्याभिन्नत्वात्॥ ॥७॥ ॥७॥

यदाह बहुवचने समानशब्दानामिति छेकपोस्तु जनपदवाचिनो रूपं ह्यङ्जनपदवाचिनस्त्वं ह्यणमिति तत्रैव सर्वग्रहणं सप्रयोजनमित्यर्थः अतिदेशः
प्रयोजयति अतिदेशं प्रयोजयतीति वा पाठेन समीचीनमर्थं पश्यामः ह्यङ्निमित्ते षष्ठ्यास्तित्वं स्यादिति दृष्टे पि प्रकृतिरूपे पुनर्दृष्ट्या भावमिति नाति
विशेषः मद्रवृज्योः कन्निति विशेषयतीति तत्र ह्यस्य संभवान्न प्रकृतिनिर्देशो सेहृत ह्यणि निर्देशो सोपचयो द्रष्टव्य मित्यर्थः मद्रकः वृजिकः इति अस्य तिन्तु प्रकृत्यतिदेशो
माद्रकः वार्जिकः इति स्यात् बहुवचनग्रहणमित्यादि समानशब्दानां यो विषयः तस्य लक्षणं प्रदर्शनं तदर्थं यथा ह्येतिद्वि द्विवचनग्रहणं न क्रियते प
त्रैवेति बहुवचने तत्रैव हितद्राजस्य लुकि कृते समानशब्दता भवति एकवचनद्विवचनयोर्न स्यादिति लुगभावेन समानशब्दतायाः अभावात् ननु सर्वत्र

जनपदेन समानशब्दानामिति किं अनुषण्डो जनपदः पौरवो राजा समभक्तिरस्य पौरवीयः बहुवचनग्रहणं समानशब्दताविष
यलक्षणार्थं अन्यथा हि यत्रैव समानशब्दता तत्रैवातिदेशः स्यादेकवचनद्विवचनयोर्न स्यात् वांगो वांगौ वा भक्तिरस्येति बहु
वचनेषु समानशब्दानामेकवचनद्विवचनयोः सत्यपि शब्दभेदे तिदेशो भवति वांगो वांगौ वा भक्तिरस्य वांगकः॥ ॥तेन प्रोक्तं॥
॥तेनेति तृतीयासमर्थात्प्रोक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति प्रकर्षेण उक्तं प्रोक्तमित्युच्यते न तु कृतं कृते ग्रन्थ
इत्यनेन गतत्वात् अन्येन कृतं माथुरेण प्रोक्तं माथुरी वृत्तिः पाणिनीयं आपिशलं काशकृत्स्नं॥ १९ ॥ ॥

हणं प्रकृत्यतिदेशार्थं स च छेकपोः प्रयोजयतीत्युक्तं तत्कथं छेकपोन स्यात् तस्मात्सर्वग्रहणं यत्र बहुचित्समानशब्दानां सर्वत्रातिदेशः सिद्धः
अस्मै वार्थस्य विस्पष्टप्रतिपत्त्यर्थं बहुवचनं इत्युपलक्षणमुपात्तं॥ ॥तेन प्रोक्तं॥ ॥प्रकर्षेणोक्तमिति अध्यापनेनार्थव्याख्यानेन वा प्रकर्षेण प्र
काशितमित्यर्थः प्रकर्षेणेति वचनात् अन्येनाप्यामेय घापिकाठकादिकं देवदत्तादिभिः प्रोक्तं तेन तथापि तेभ्यः प्रत्ययो न भवति न तु कृतमिति प्रसङ्गे विवृतिः करणे
पि वर्त्तत इति भावः माथुरीति मथुरायां भवो माथुरः तेनोक्ता वृत्तिः छेप्रातेकलापिनोः शिष्याणां ग्रहणादधिकविधानार्थो हरणप्रत्ययः पाणिनीयमि
ति स्वयमन्येन वा कृतं यत्पाणिनिना प्रोक्तं तदुच्यते॥ १९ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ तित्तिरि ॥ ॥ छन्दसि चापमिष्यत इति छन्दस्येवमिष्यत इत्यर्थः । तित्तिरिणा प्रोक्ताः श्लोका इत्यत्र न भवतीति न केवलं छणेव अपि त्वणपि न भवत्यनभि-
धानादित्याह । कथं पुनरीप्समाणोऽपि छन्दसि लभ्यत इत्याह शौनकादिभ्य इति ॥ ॥ काश्यपकौशिका ॥ ॥ णकार उत्तरत्र वृद्ध्यर्थ इति । इहानुपूर्वमेव वृ-
द्धिः सिद्धत्वात् यद्यपि हि द्विनिमित्तस्येति पुंवद्भावप्रतिषेधः सोऽपि न प्रयोजनं णिनन्तस्याध्येतृवेदितृविषयत्वेन स्त्रियामसम्भवात् तेन तावपि ज्ञातव्याविति

॥ तित्तिरिवरतन्तुखण्डिकोखाच्छण् ॥ ॥ तित्तिर्यादिभ्यः शब्देभ्यश्छण् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये अणोऽप-
वादः । तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः वारतन्तवीयाः खाण्डिकीयाः औखीयाः छन्दसि चापमिष्यते तित्तिरिणा प्रोक्ताः श्लो-
काः अत्र न भवति शौनकादिभ्यश्छन्दसीत्यत्रेदमनुवर्तयितव्यमित्याहुः ॥ ॥ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ॥ ॥
काश्यपकौशिकशब्दाभ्यामृषिवाचिभ्यां णिनिप्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये छस्यापवादः । णकार उत्तरत्र वृद्ध्य-
र्थः कल्पे त्वाभ्यां प्रोक्त इति स्मर्यते तस्यापि तद्विषयता भवत्येव शौनकादिभ्यश्छन्दसीत्यत्रास्यानुवृत्तेः छन्दोधिकारविहिता-
नां च तद्विषयतेष्यते काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिनः कौशिकिनः ऋषिभ्यामिति किं इदानीन्तनेन गोत्रकाश्य-
पीयं ॥ ॥ श्री ४ ॥ ॥ छ ॥ ॥

सिद्धत्वात् चरणत्वेन ज्ञातित्वात् तस्यापि चेति कथं छन्दोब्राह्मणानामुच्यमानानां तद्विषयता कल्पस्य भवति तत्राह शौनकादिभ्य इति ननु तत्रा-
नुवृत्तोऽस्यामप्यस्य योगस्यानेन कल्पः छन्दो भवति नापि ब्राह्मणमत आह छन्दोधिकारविहितानां चेति छन्दोब्राह्मणानीत्यत्र छन्दोग्रहणा-
त्पर्यन्तेन तत्रस्वरितेनाधिकारगतिर्भवतीति छन्दः प्रकरणमध्यपातिनोऽणोऽपि णिनेस्तद्विषयता भवतीत्यर्थः यत्तु छन्दोब्राह्मणानीत्यत्र चका-
रानुकर्षसमुच्चयार्थत्वमाश्रित्य कल्पादेस्तद्विषयत्वप्रतिपादनं तत्प्रकरणान्तरं द्रष्टव्यं इदानीन्तनेन गोत्रकाश्यपेनेति नेत्यसाहर्षिरमन्त्रदर्शित्वात् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥कलापि॥ ॥कलाप्यंतेवासिना मिसादिस्त्रेलमेरोपवाणश्च णोनिर्देशः कलाप्यंतेवासिनश्चत्वारस्तत्रादिभ्यः त्रिशिष्यशिष्येष्वपि शिष्यव्यवहारो लो-
केदृश्यते तत्कथमियं तत्र एवेति नियमः तत्राह प्रस्यस्य कुरिणात् इति क्रियाश्रमान्वयवचनः करोतिः प्रकरणादिहाध्ययने वर्त्तते। कलापिनोऽणपनिग्रहणादिति-
स्त देवविहरणो नितथाहीति वैशंपायनांतेवासि सोंतेवासी कलापीपरिचोंतेवासंतेवासिनोपि गृह्यरन् कलापिग्रहणमनर्थकं वैशंपायनांतेवासिभ्यः

॥कलापिवैशंपायनांतेवासिभ्यश्च॥ ॥कलाप्यंतेवासिनां वैशंपायनांतेवासिनां च ये वाचकाः शब्दास्तेभ्यो णिनिप्रत्ययो भवति तेन
प्रोक्तमित्येतस्मिन्विषये अणोपवादः छंदस्यर्थलाद्धा घते तत्र कलाप्यंतेवासिनश्चत्वारः हरिद्रुः छगली तुंबुरुरुलप इति वैशंपायनां-
तेवासिनो नव आलंबिः पलिंगः कमलः ऋचाभः आरुणिः तांड्यः श्यामायनः कठः कलापी इति प्रत्ययस्य कारितागृह्यते नन्वमवहि-
ताः शिष्यशिष्याः कुतः कलापिखाडायनग्रहणात् तथा हि वैशंपायनांतेवासी कलापी तदंतेवासिनो वैशंपायनांतेवासिन एव
भवंति किं कलापिग्रहणेन तथा वैशंपायनांतेवासी कठः तदंतेवासी खाडायनः तस्य किं शौनकादिषु पाठेनं तत्र तेन तत्र छकारि
ग्रहणस्य लिंगं कलाप्यंतेवासिभ्यस्तावत् हारिद्रुणा प्रोक्तमधीयते हारिद्रविणः तौंबुरविणः औलपिनः छागलिनो ढिनुकं व-
क्ष्यति वैशंपायनांतेवासिभ्यः आलंबिनः पालंगिनः कामलिनः आर्चाभिनः आरुणिनः तांडिनः श्यामायनिनः कठाल्लु-
कं वक्ष्यति कलापिनश्चाण्॥ हरिद्रुरेषां प्रथमस्ततश्छगलितुंबरू उलपेन चतुर्थेन कालापकमिहोच्यते। आलंबिश्चरकः
प्राचां पलिंगकमलावुभौ। ऋचाभारुणितांड्याश्च मध्यमीयास्त्रयोऽपरे। श्यामायन उदीच्येषु उक्तः कठकलापिनोः चरक इति
वैशंपायनस्याख्यानं तत्संबंधेन सर्वे तदंतेवासिनः सर्वे चरका इत्युच्यंते॥ २० ॥

पे वसिद्धं कलाप्यंतेवासिनामपि वैशंपायनांतेवासित्वात् तथा वैशंपायनांतेवासी कठः कठांतेवासी खाडायनः तत्र भवहितायनामपि ग्रहणे वैशंपाय-
नांतेवासित्वात् तेनैव सिद्धे शौनकादिषु खाडायनशब्दस्य पाठो निष्फलः स्यात् उदाहरणेषु छंदोब्राह्मणानि इति विषयता अध्येतृप्रत्ययस्य प्रो-
क्तालुगिति लुक् उलपेन चतुर्थेनेति सहयोगे तृतीया कलापिनः इदं कालापकं गोत्रचरणाद्वुञ् तत्र धर्माम्नाययोरिति पद्यते तस्मादिहोपमा-
नात् शिष्यसमूहे प्रयोगः आलंबिश्चरकः प्राचामिति आलंबिर्निमित्तप्राचां देशे उत्पन्नश्चरकस्य शिष्यः एवं पलिंगकमलावुभौ प्राचामेव त्रय एते प्रा-

© Dharmartha Trust J&K. Digitized by eGangotri

॥पुराण॥ ॥भाल्लविन इत्यादि॥ भल्लुशाट्यायनऐतरेयपिंगअरुणपराञ्जि इत्येतेभ्यो णिनिः यज्ञवल्काश्मरथशब्दौ कण्वादीता भ्यां यञन्ताभ्याम् अण्
यस्येति च लोपः ननु च याज्ञवल्क्यादीन्यपि पुराणप्रोक्तान्येव शाट्यायनकादिभिर्ब्राह्मणैः तैः एककालत्वादित्यत आह॥ याज्ञवल्क्यादयो हि
ति॥ आख्यानाभिधानतो दीर्घकालत्वान् व्यवहरतीति॥ अर्थकालतथा न भवतत्यनम्यथा भवतीति भावः तद्विषयता कस्मान्न भवतीति॥ याज्ञवल्क्यादिविषयः प्र

॥पुराणप्रोक्तेषु ब्राह्मणकल्पेषु॥ ॥प्रत्ययार्थविशेषणमेतत् तृतीयासमर्थात् प्रोक्तमित्येतस्मिन्नर्थे णिनिः प्रत्ययो भ
वति यत्तत्प्रोक्तं पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवन्ति पुराणेन चिरन्तनेन मुनिना प्रोक्ताः पुराणप्रोक्ताः ब्राह्मणेषु तावत्
भाल्लविनः शाट्यायनिनः ऐतरेयिणः कल्पेषु पैङ्गी कल्पः आरुणपराजी पुराणप्रोक्तेष्विति किं याज्ञवल्कानि ब्राह्मणानि
आश्मरथः कल्पः याज्ञवल्क्यादयो ह्यचिरकाला इत्याख्यानेषु वार्त्ता तन्न पाञ्चव्यवहारेति सूत्रकारः। तद्विषयता कस्मा
न्न भवति प्रतिपदं ब्राह्मणेषु यः प्रत्ययस्तस्य तद्विषयता विधीयते न अणं तु याज्ञवल्क्यशब्दस्य कण्वादिभ्यो गोत्रे इति
कण्वादिगणपाठात् ॥ ॥छ॥ ॥छ॥ ॥

ब्रह्मणः छन्दसो ब्राह्मणानि चेत्यत्र पुराणप्रोक्तत्वविशेषणानपेक्षयणात्प्राप्नोतीति भावः। प्रतिपदमिति॥ एतद्वक्ष्यमाणस्य नियमस्योक्तपरिभाषया लभ्यते एत
तदर्थमेव च तत्र ब्राह्मणग्रहणं छन्दस्त्वादेव सिद्धेः कल्पेषु न हि किं स्यान्न भवतीति यथा काश्यपिनः कौशिकिन इत्यत्रेत्यत आह॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प२८·४ ॥नवाप्ययमिति॰ युक्तं तत्र छंदोधिकारे तस्य योगस्यानुवृत्तेः अयं तु तत्रैवेति कल्पेषु णिनि तद्विषयता न भवतीत्यर्थः न चात्यंतं बाधैवेति॰ सिद्धशुक्रपक्ष कवं

१३३ धेप्वेति निपातनादेव सिद्धे शुषः कः पचो वः इति लिंगमबाधकात्पि निपातनान्नाभिभवंतीति यथा तु सूत्रे भाष्यं तत्र यस्य यस्यापि निपातनान्नाबाध

॥नवाप्ययोगश्छंदोधिकारमनुवर्त्तति तेन कल्पेषु णिनिर्भवति पुराणप्रोक्तेषु निपातनात्तु न भावः न चात्यंतं बाधैव तेन पुराणप्रोक्तेष्वपि भवति

॥ ॥शौनकादिभ्यश्छंदसि॥ ॥शौनक इत्येवमादिभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये छंदस्यभिधेये छाणोऽपवा

दः शौनकेन प्रोक्तमधीयते शौनकिनः वाजसनेयिनः छंदसीति किं शौनकीया शिक्षा कठशाठ इत्यत्र पठ्यते तेन स्वार्थिके वलादिलुकं

वस्यति कठशाठाभ्यां प्रोक्तमधीयते काठशाठिनः॥ शौनक। वाजसनेय। शार्ङ्गरव। शापेय। शाष्पेय। खाडायन। स्तंभ। स्कंध। देवदर्शन। र

ज्जुभार। रज्जुकंठ। कठशाठ। तलवकार। पुरुषांसक। अश्वपेज॥ ॥कठचरकाल्लुक्॥ ॥कठचरकशब्दाभ्यां यस्य प्रोक्तप्रत्ययस्य लु

ग्भवति कठशब्दाद्वैशंपायनांतेवासिभ्यश्चेति णिनेश्चरकशब्दादण्णः कठेन प्रोक्तमधीयते कठाः चरकाः छंदसीत्येव काठाः चारकाः

श्लोकाः॥ ॥कलापिनोऽण्॥ ॥कलापिशब्दादण् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये वैशंपायनांतेवासित्वात् णिनेरपवा

दः कलापिना प्रोक्तमधीयते कालापाः इनण्यनपत्ये इति प्रकृतिभावे प्राप्ते नांतस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमि

तैतिलिजाजलिलांगलिशिलालिशिखंडिसूकरसद्मसुपर्वणामुपसंख्यानमिति टिलोपः अथवा णस्य ग्रहणं किं न यथाप्राप्तमि राम॰

त्येव सिद्धं अधिकविधानार्थं तेन माथुरी वृत्तिः सौलभानि ब्राह्मणानीत्येवमादि सिद्धं भवति॥ ॥छगलिनो ढिनुक्॥ ॥छगलिन् १३३

शब्दाड्ढिनुक् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन् विषये कलाप्यंतेवासित्वात् णिनेरपवादः छगलिना प्रोक्तमधीयते छागलेयिनः २१

कान्येवेति स्थितं॥ ॥कलापिनः॥ ॥यथाविहितमेवोच्यते तत्र वचनसामर्थ्याद्यो विहितो न च प्राप्नोतीत्याख्याप्यमभविष्यतीति भावः एवमादी

नीति कास्यिश्चिद्धेतनपाठः पैप्पलादाः शाकलाः इत्येतेषां ग्रहणं अत्र मुदपिप्पलादः शाकलस्य इत्येतेभ्यः प्रण्णप्रोक्ते स्थिति णिनेरपवादेनाभवति २१

© Dharmartha Trust J&K. Digitized by eGangotri

।पाराशर्या ।। ।।तदर्थं दोग्रहणमनुवर्त्यमिति निन्वतदनुक्त्वापिकथंभिक्षुनटसूत्रयोश्छंदस्त्वंतत्राह गुणाकल्पनयाचेतिउपचारस्यनिमित्तभूतोधर्मोगुणः मुख्यार्थस्तत्रिमित्ताकल्पनागुणकल्पनायाराशरिणा इतिपूर्ववद्यलोपः ।। शैलालिन इतिशिलामलतइतिशिलाली अलभूषणपर्याप्तिवारणेष्वितितस्मा

।।पाराशर्यशिलालिभ्यांभिक्षुनटसूत्रयोः ।। ।।णिनिरिहानुवर्त्ततेनछिनक् पाराशर्यशिलालिभ्यांणिनिप्रत्ययोभवतितेनप्रोक्तमित्येत स्मिन्विषयेभिक्षुनटसूत्रयोरितियथासंख्यंप्रत्ययार्थविशेषणंसूत्रशब्दः प्रत्येकमभिसंबध्यतेतद्विषयताचात्रेष्यतेतदर्थंछंदोग्रहणमनुव र्त्यगुणकल्पनयाचभिक्षुनटसूत्रयोश्छंदस्त्वंपाराशर्येणप्रोक्तमधीयतेपाराशरिणोभिक्षवः शैलालिनोनटाः भिक्षुनटसूत्रयोरितिकिंपा राशरंशैलालं ।। ।।कर्मंदकृशाश्वादिनिः ।। ।।भिक्षुनटसूत्रयोरित्येवकर्मंदकृशाश्वशब्दाभ्यामिनिप्रत्ययोभवतिअणोपवादः तेनप्रोक्त मित्येतस्मिन्विषयेयथासंख्यंभिक्षुनटसूत्रयोरभिधेययोः अत्रापितद्विषयार्थंछंदोग्रहणमनुवर्त्यकर्मंदेनप्रोक्तमधीयतेकर्मंदिनोभि क्षवः कृशाश्विनोनटाः भिक्षुनटसूत्रयोरित्येवकार्मंदंकार्शाश्वं ।। ।।तेनैकदिक् ।। ।।तेनेतितृतीयासमर्थादेकदिगित्येतस्मिन्नर्थे यथाविहितंप्रत्ययोभवतिएकतुल्यादिक्समानादिगित्यर्थः सुदाम्नाएकादिक्सौदामनीविद्युत्हिमवतीत्रैककुदीपैलुमूलीतेने तिप्रकृतेपुनः समर्थविभक्तिग्रहणांछंदोधिकारनिवृत्त्यर्थंसर्वत्राद्विष्ट्रंछंदोधिकारान्नतद्विषयतासाध्यते ।। ।।तसिश्च ।। ।।तसिश्चप्रत्य योभवतितेनैकदिगित्येतस्मिन्विषयेपक्षेणवादिषुणादिषुचप्राप्तेषुअपवादः प्रत्ययेनविधीयतेस्वरादिपाठस्त्वव्ययसंसुदामतः हि मवत्तः पीलुमूलतः ।। ।।उरसोयच्च ।। ।।उरसशब्दाद्यत्प्रत्ययोभवतिचकारात्तसिश्चतेनैकदिगित्येतस्मिन्विषयेअणोपवादः

न्युपपज्ञातावितिणिनिः ततोणिनिइनोरितिलोपः पाराशरमितिकाश्यपाद्यणशैलालमितिशैलालमिति वोत्सर्गिकेणिनांतस्यटिलोपेसब्रह्मचारीत्यादिनाटिलोपः ।। ।।तेनैक ।। ।।सौदामनीतिअन्नितिप्रकृतिभावः सुदामाद्यपर्वतविशेषः ।। ।।तसिश्च ।। ।।स्वरादिपाठस्त्वव्ययत्वमितितसिन्नेवार्थविधीय मानस्याव्ययलिंगसंख्यातुणाटानमपिस्वाभाविकंवेदितव्यं ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰८॰४ उपज्ञाते॥ ॥विनोपदेशेन ज्ञातमुपज्ञातमिति उपशब्दो ज्ञानादिकर्मप्रसिद्ध इति भावः॥ अकालकमिति व्याकरणमापिशलाद्याचार्यादिकालपरिभाषारहि
१३४ तमित्यर्थः गुरुलाघवं नामार्थशास्त्रं पतञ्जलिपाणिनीयमेव तं लाघवं वित्सते दुष्करमल्पेनैव कनशब्देन त्रिकम् पनेन पाणिनीयेन हि तं दुष्करणं व्याकरणं का

उपज्ञाते॥ ॥तेनेत्येव तृतीयासमर्थादुपज्ञातमित्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति विनोपदेशेन ज्ञातमुपज्ञातं स्वय
मभिसंबुद्धमित्यर्थः पाणिनिनोपज्ञातं पाणिनीयमकालकं व्याकरणं काशकृत्स्नं गुरुलाघवं आपिशलं दुष्करणं॥ ॥
कृते ग्रन्थे॥ ॥तेनेत्येव तृतीयासमर्थात्कृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तत्कृतं ग्रन्थश्चेत्स भवति वररुचिना कृ
ताः वाररुचाः श्लोकाः हैकपादो ग्रन्थः भैकुराटो ग्रन्थः जालूकः ग्रन्थ इति किं तक्ष्णा कृतः प्रासादः उत्पादितं कृतं विद्यामान
मेव ज्ञातमुपज्ञातमित्यनयोर्विशेषः॥ ॥संज्ञायां॥ ॥तृतीयासमर्थात्कृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति समु
दायेन चेत्संज्ञा गम्यते मक्षिकाभिः कृतं माक्षिकं सारघं पौत्तिकं मधुनः संज्ञा एताः॥ ॥कुलालादिभ्यो वुञ्॥ ॥तेन
कृते संज्ञायामिति चैतत्सर्वमनुवर्तते कुलालादिभ्यो वुञ् प्रत्ययो भवति तेन कृतमित्येतस्मिन्विषये संज्ञायां गम्यमानायां कौ
लालकं वारुडकं॥ कुलाल॥ वरुड। चंडाल। निषाद। कर्मार। सेना। सिरिध्र। सैन्धव। देवराज। परिषत्। वधू। रुरु। एम॰
ध्रुव। रुद्र। अनडुह्। ब्रह्मन्। कुंभकार। श्वपाक॥ २२ ॥ ॥ १३४
मज्ञातमित्यन्ये॥ ॥कृते ग्रन्थे॥ ॥तितिक्षितं त्वितरादीनि सूत्राणि पत्रप्रकरणोन परितानीति निर्णयो हि छन्दसां प्रकारः न कर्तारः नि
त्यानि हि छन्दांसि न केनापि क्रियन्ते॥ ॥संज्ञायां॥ ॥अर्थं व्याख्यातमिदं॥ ॥२२॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

स्रुग्दाम्बमा॥ ॥अर्णोपवादः इति वाक्यात् एवमुक्तं पादपशब्दो विकल्पितः प्राप्नोति अन्ये तु पादपशब्दस्य स्थाने परपदं पठन्ति॥ ॥तस्येदं॥ ॥तस्यापत्यमित्यत्रो
क्तमेवार्थं समाप्यति प्रकृतिप्रत्ययार्थयोः। लोटिप्रकृतो षष्ठ्यर्थमात्रं विवक्षितं प्रत्ययार्थे यत्र संबंधिमात्रं यद्येवा तत्र भवेत् तस्मिन्नभिधेये प्रत्ययः मात्रशब्दमवच्छे
दं दर्शयति पदस्याप्रमिति निर्देशः इदं प्रत्यक्षवचनः तच्छब्दः परोक्षवचनः आदि शब्देन सामान्याभिधायित्वं गत्वे तेन सर्वमविवक्षितमिति अत्र कारणं तस्यापत्य
मित्यत्रैवोक्तं वहे स्तुरिति। तन्त्र चोः सामान्ये नग्रहणं प्रावहित्रमिति इत्यादीनामसिद्धत्वात् सर्वं सिद्धं इति ते नित्याभावात् तेषाममावः। अग्नीध्र इति आग्नि

स्रुद्राम्राम खर पाद पादजा॥ ।तेन कृतेमं त्यागमिति चेन तत्सर्वमनुवर्तते स्रुद्रादिभ्यो ऽ अपत्यो भवति तेन कृतं तस्येत स्मिन् विषये सं
ज्ञायां गम्यमानायां अर्णोपवादः स्रां विशेषः। स्रुद्राभिः कृतं स्रौद्रं आमरं वारं पादपं॥ ॥तस्येदं। तस्येति षष्ठी समर्थादिदमि
ति तस्मिन्नर्थे यथाविहितं प्रत्ययो भवति अणादयः पंचमहोत्सर्गा बाह्यपरप्रत्ययाः यथाविहितं विधीयन्ते प्रकृति प्रत्ययार्थयोः ष
ष्ठ्यर्थमात्रं तत्संबंधिमात्रं च विवक्षितं पदस्यालिंगसंख्याप्रत्यक्षपरोक्षादिकं तत्सर्वमविवक्षितं उपगोरिदमौपगवं कापटवं राष्ट्रियं अ
वारपारीणं अनंतरादिष्वनभिधानात्र भवति दैवदत्तस्यानंतरमिति विहोतुरणि द्वसंबोदुः संसांवहित्रं मिहृ एवान्त्रेण ऊर्ध्वमुपसं
ख्यानं अग्नीधः शरणे रज भस्य आग्नीध्रं समिधामाधाने षेण्य णा सामिधेनो मंत्रः सामिधेनी अक॥ ॥छ॥ ॥छ॥ ॥

मिंधइति द्विपत्र अग्नीत् अत्विग्विशेषः त्वमग्नि इन्धीयते ऽस्मिन्नत्तस्योत्सर्गेऽस्वत्वं शरणं गृहं स्थानं यत्राग्नीध्रीयं धिष्ण्यं तदाग्नीध्रं तास्थानुमंत्राः
क्रोशन्तीति वद् द्विजिप्रयोगः कल्पसूत्रकाराणां तु प्रसाध्या वयेदाग्नीध्रः आग्नीध्रं पोतात्रं स्थानत्र इति छप्रत्ययं च ततः शरणे कुर्वन्ति आग्नीध्री
यसकाशं उत्तरेणाग्नीध्रीयं धिष्ण्यं परीतिति शरणावचनाच्छः समिदाधानं इति पयाम मिध्यतेऽग्निः सामिधेनी संपदादित्वात् करणे क्विप् सामि
दाधीयते ययामा सामिधेनी अक षित्वान्ङीष् हलस्तद्धितस्येति यलोपः॥ ॥

॥ रथाद्यत् ॥ ॥ रथ्यं युगमेवेष्यत इति पत्नुरथस्य वोढा रथ्य इति वोढरि प्रयोगः स तर्हि कथं पुंगवाश्वसंज्ञामिति द्रष्टव्यः स्यादेतत् अयमेव यत् वोढर्यपि ष्यञ्जातं वहतीति अत्र
रथग्रहणं मा कारि ति नैव शकटं वहतो रथो वहति द्विरथ्य इति द्विगोर्लुगनपत्ये इति प्राग्दीव्यतीयो लुक् प्राप्नोति यत्तु द्वयो रथयोर्योगं तत्र द्विरथ्यं त्रैरथ्यं भवति ॥ ॥ पत्राद्वा
ह्ये ॥ ॥ पतन्त्यनेनेति पत्रमिति दाम्नीशसेत्यादिना ष्ट्रन् अश्वश्च पत्र रथोऽश्वरथः षष्ठीसमासे इति सम्भवाद्युक्तार्थाश्च गतिः तत्संग्रामाश्वरथं ॥ ॥ पत्राध्वर्यु ॥

रथाद्यत्॥ ॥रथशब्दाद्यत्प्रत्ययो भवति तस्येदमित्यस्मिन्विषयेऽणोऽपवादः रथस्येदं रथ्यं चक्रं युगं वा रथ्यांगमेवेष्यते नान्यत्रान
भिधानान्न रथस्य सीता हलेऽप्यो पक्षिप्ताविति तदन्तविधिरप्यत्रेष्यते परमरथ्यं उत्तमरथ्यं॥ ॥पत्राद्वाह्ये॥ ॥पतन्ति तेनेति प
त्रं अश्वादिकं वाहनमुच्यते तत्पूर्वाद्वृष्टशब्दात् अण्प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये पूर्वस्यापवादः आश्वं रथं वक्रं औष्ट्र
यं गार्दभं रथं॥ ॥पत्राध्वर्युपरिषदश्च॥ ॥पत्रं वाहनं तद्वाचिनः प्रातिपदिकादध्वर्युपरिषच्छब्दाभ्यां चाञ्प्रत्ययो भवति तस्येदमित्ये
तस्मिन्विषयेऽणोऽपवादः पत्रात्प्रस्वेऽपि अश्वस्येदं वहनीयं आश्वं औष्ट्रं गार्दभं आध्वर्यवं पारिषदं॥ ॥हलसीराट्ठक्॥ ॥हलसीरश
ब्दाभ्यां ठक्प्रत्ययो भवति तस्येदमित्येतस्मिन्विषयेऽणोऽपवादः हलस्येदं हालिकं सैरिकं॥ ॥द्वन्द्वाद्वुन्वैरमैथुनिकयोः॥ ॥द्वन्द्वसं
ज्ञकाद्वुन्प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये वैरमैथुनिकयोः प्रत्ययार्थविशेषणयोः अणोऽपवादः छेत्रुपरत्वाद्बाधते वैरं बत
बाभ्रवशालंकायनिका काकोलूकिका मैथुनिकायां अत्रिभरद्वाजिका कुत्सकुशिकिका विवहनं मैथुनिका वैरे देवासुरादिभ्यः
प्रतिषेधो वक्तव्यः दैवासुरं राक्षोसुरं वैरं॥ २३॥ ॥

पत्रेत्यर्थग्रहणं इतरयोः स्वरूपग्रहणं आख्यानं चात्र शरणं॥ ॥द्वन्द्वाद्वुन्॥ ॥वैरं विरोधः वीराणामिदमिति कृत्वा मिथुनकर्म मैथुनिका मनोज्ञादित्वा
द्वुञ् मिथुनेदंपती कर्मक्रिया निष्पादनं वा बाभ्रवशालंकायनिके विवुञन्तं स्वभावतः स्त्रियां वर्त्तते॥ २३ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥गोत्रचरणात्॥ ॥वुनिप्रकृते वुञो विधानमद् (?)येषु वह्यर्थे इत्येषु वुनि वुञि च विशेषो नास्तीति स्वरं पश्य एव स्वरः पुंवद्भावप्रतिषेधोऽपि नकोपधायाश्चेत्य
भयोरस्ति॥ ॥संघांक॥ ॥पूर्वस्य वुञोऽपवादः इति गोत्रग्रहणमनुवर्तते रजतादीनां गोत्रप्रत्ययान्तानामत्र ग्रहणमिति भावः घोषग्रहणमत्र कर्तव्यमिति घोषश
ब्दाभीरस्थानं तत्रापि प्रत्ययो यथा स्यादित्येवमर्थं घोषग्रहणमानुषंगिकं प्रयोजनान्तरमाह तेनेत्यादि अथांकलक्षणयोः को विशेष इति निर्वृत्तंस्व

॥गोत्रचरणाद्वुञ्॥ ॥गोत्रवाचिभ्यश्चरणवाचिभ्यश्च प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये अणोऽप
वादः औपगवकं ग्लौचुकायनकं औपगवकं चरणात् कठानां धर्म आम्नायो वा काठकं कालापकं मौदकं
पैप्पलादकं॥ ॥संघांकलक्षणेष्वञ्यञिञामण्॥ ॥संघादिषु प्रत्ययार्थविशेषणेष्वञन्ताद्यञन्तादिञन्ताच्च प्रातिपदि
कादण्प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये पूर्वस्य वुञोऽपवादः घोषग्रहणमत्र कर्तव्यं तेन वैदस्याद्यथासंख्यं न भव
ति अञन्तात् बैदः संघः बैदोंकः बैदं लक्षणं बैदो घोषः यञन्तात् गार्गः संघः गार्गोंकः गार्गं लक्षणं गार्गो घोषः इञन्तात् दा
क्षः संघः दाक्षोंकः दाक्षं लक्षणं दाक्षो घोषः अंकलक्षणयोः को विशेषः लक्ष्मैव लक्षणमेव विद्धं भूतं तस्य यथा त्रिविधा विदो
अंकस्तु गवादिस्थो पिंगवादीनामस्त्वेन भवति त्रिल(?)क्षणोंऽकीबर्धपुंवद्भावप्रतिषेधार्थं च वैदी विद्यास्य वैदी विद्यः॥ ॥शाक
लाद्वा॥ ॥शाकलशब्दात्संघादिषु प्रत्ययार्थविशेषणेषु वाऽण्प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये वुञोऽपवादः श
कलेन प्रोक्तमधीयते शाकलास्तेषां संघः शाकलः शाकलकः शाकलोंकः शाकलकोंकः शाकलं लक्षणं शाकलकं लक्ष
णं शाकलो घोषः शाकलको घोषः॥ ॥

पर्यायपत्नयायां तान्नास्त्येव विशेष इत्यर्थः पृथगुपादानसामर्थ्यात् विशेषोऽत्राश्रीयते
मित्याह लक्षणं लक्ष्यस्यैवेति समातीयसंबंधीत्यर्थः वैदी विद्यास्यैति विदानामसाधारणीया विद्यास्यास्तीति वैदी विद्यः॥ ॥शाकलात्॥ ॥वु
ञोऽपवाद इति शाकलशब्दस्य चरणशब्दत्वात्तद्दर्शयति शकलेन प्रोक्तमिति॥ ॥

॥छंदोगा॥ ॥वुञोऽयमपवादः इति वरणाःशब्देभ्यो वुञोपवादः नटाट्टौत्सर्गिकि स्मृताः॥ ॥नंदरु॥ ॥दंडप्रधानमाणवा इति अर्थकथनमेतत् समासस्तु
मध्यपदलोपी समासः दंडप्रधाना माणवाः दंडमाणवा इति शब्दो माणवेषु वर्त्तते॥ ॥रैवति॥ ॥पूर्वेण गोत्रचरणाद्वुञि प्राप्ते छः विधीयते इति रैवतिकीय इति रैवतस्य अपत्यं रैवत्यादिभ्य ष्ठक् रैव

॥छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः॥ ॥संज्ञाशब्दो निरुक्ताः सामान्येन विधानं छंदोगादिभ्यः शब्देभ्यो ञ्यः प्रत्ययो भवति
तस्येदमित्यस्मिन्विषये वुञोऽपवादः चरणाद्धर्माम्नाययोरित्युक्तं तस्माद्धर्माम्नाययोरेव भवति छांदोग्य
नो धर्मः आम्नायो वा छांदोग्यं औक्थिक्यं याज्ञिक्यं बाह्वृच्यं नाट्यं॥ ॥न दंडमाणवान्तेवासिषु॥ ॥दंडप्रधाना माणवा
दंडमाणवाः अन्तेवासिनः शिष्याः तेष्वभिधेयेषु वुञ् प्रत्ययो न भवति गोत्रग्रहणमिहानुवर्त्तते तेन वुञः प्रतिषेधो
विज्ञायते गौकक्षाः दंडमाणवाः अन्तेवासिनो वा गौकक्षाः दाक्षाः माहकाः॥ ॥रैवतिकादिभ्यश्छः॥ ॥रैवतिकादिभ्यः
शब्देभ्यश्छ प्रत्ययो भवति तस्येदमित्यस्मिन्विषये गोत्रप्रत्ययांता एते तत्र पूर्वेण वुञि प्राप्ते विधानं रैवतिकीयः स्वापि
शीयः रैवतिक स्वापिशि क्षेमवृद्धि गौरग्रीवि औदमेघि औदवापि बैजवापि॥ ॥२४॥ ॥छ॥ ॥

तिकः ततश्छः अतो रजंताः तत्रानंतरस्तत्रात्प्रतिषेधस्य अनुवर्त्तिष्यते रैवतिकादिभ्यो वुञः प्रतिषेधो विज्ञायमाने यत्रापवादो नास्ति रैवतिकीय इति तत्र ॥म॰
द्वारेण इत्येव सिद्धः क्षेमवृद्धि शब्दात् पैलादिलाच्छः अस्मिन्धिकरणे स्यात् तस्माच्छग्रहणं॥ ॥छ॥ ॥छ॥ ॥छ॥ १३६

© Dharmartha Trust J&K. Digitized by eGangotri

॥कौपिञ्जल॥ ॥गोत्रवुञोपवाद इति कुतदृणादृगोत्राधिकारादिति कौपिञ्जल इति कुपिञ्जलस्यापत्यं अस्मादेव निपातनादण् तदन्तात्पुनरण् हास्तिप इत्यत्र हस्तिनः पादा इव पादा यस्य हस्तिपादः पादस्य लोपो न भवति अहस्त्यादिभ्य इति वचनात् हस्तिपादस्यापत्यं तस्यापत्यमिति अस्मादेव निपातनादण् पद्भावश्च हास्तिपदस्येदं पुनरण् अथ गण्ग्रहणं किमर्थं अगोत्रत्वादण्ग्रहणेन तदन्ताद्भवः प्राप्नोतीति सिद्धे चेत्तदेतद्ग्रहणं इति नासिद्धमिति गोत्रचरणाद्वुञिति वुञ् प्राप्नोति एवं तर्हि पक्षे तादृश्यात् स्यादृवतिकादि वद्धे वेदोपपठेत एवं हि विभक्त्यन्तनुरूपादण्ग्रहणं भवति तस्मात् यथा कारं भावेन च्छो न भविष्यति अन्यतस्तु यो विहितो न च प्राप्नोति स एव भविष्यति सदा गोत्र वर्तते सप्तम्याग्रहणेन यत्र वुञ् प्राप्तः प्रतिषिध्यते नवं उ मागत्वात्तेवाभिषु तत्र वुञो विधानार्थमेतत्स्यात्तस्मादण्ग्रहणं हीव

॥कौपिञ्जलहास्तिपदादण्॥ ॥कौपिञ्जल हास्तिपद शब्दाभ्यामण् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये गोत्रवुञोपवादः गोत्राधिकारात्॥ कौपिञ्जलः हास्तिपदः॥ ॥आथर्वणिकस्येकलोपश्च॥ ॥आणमेव आथर्वणिक शब्दादण् प्रत्ययो भवति तत्सन्नियोगेन चैकलोपः तस्येदमित्येतस्मिन्विषये चरणाद्वुञोपवादः आथर्वणिकस्यायमाथर्वणो धर्मः आम्नायो वा चरणाद्धर्माम्नाययोः॥ ॥तस्य विकारः॥ ॥तस्येति षष्ठीसमर्थाद्विकार इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति प्रकृतेरवस्थान्तरं विकारः किमिहोदाहरणं अप्राण्यणाद्युदात्तमवृद्धं पसवनानामातिपदं ग्रहणं। अश्मनो विकार आश्मनः आश्मः अश्मनो विकार इति टिलोपः पाक्षिकः भास्मनः मार्त्तिकः नित्स्वरेणाद्युदात्ता एते॥ ॥२५॥ ॥७॥ ॥

र्थं पुंवद्भावप्रतिषेधार्थं च कौपिञ्जली क्रियास्य कौपिञ्जली क्रिया इति॥ ॥आथर्वणिकस्य॥ ॥चरणाद्वुञोपवाद इति अथर्वणा प्रोक्तो वेदो ऽभेदोपचारादथर्वा तमधीते वसन्तादिभ्यष्ठक् आथर्वणिकः दाण्डिनायनादि सूत्रे निपातनाट्टिलोपाभावः अथवाथर्वणा प्रोक्तो वेद इत्तेन प्रोक्तमित्यण् ततश्छन्दो ब्राह्मणानीति तद्विषयता यामाथर्वणशब्द एणापि वसन्तादिषु पाठाद् घ्योतरि ठक् तस्य विधानसामर्थ्याल्लोकाल्लुगिति लुङ् न भवति आथर्वणिकः सूत्रेऽस्मिन् वसन्तादि केरणिना सत्रेषु प्रसिद्धिः॥ ॥तस्य विकारः॥ ॥प्रकृतेरिति उपादानकारणस्य अवस्थान्तरमिति अन्यथात्वं अपवादे नानाक्रान्तस्य विषयस्य दुर्लभत्वात्प्रश्नः किमिहोदाहरणमिति अप्राणीति प्राणिभ्योऽञं वक्ष्यति। आद्युदात्तमिति अनुदात्तादेरञं वक्ष्यति अवृद्धमिति वृद्धान्मयटं वक्ष्यति पस

॥ चर्मणः इति स्थानिगोपयसोर्यदिति विस्वरेणो ति अश्मभस्म
शार्ङ्गीमनिनप्रत्ययो तो मद हलिकं मृत्तिका॥ ॥२५॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४ तस्य प्रकरणे इतितस्येदमित्यस्मिन पुनर्वचनं शैषिकनिवृत्त्यर्थमितिप्रकरणं हितस्य ग्रहणं शैषिके घादिभिः संबन्धमतस्तस्यानुवृत्तौ तेष्वनुवर्त्तेरिन इदं तु सर्वं तस्य
ग्रहणं क्रियमाणं घादिभिः संबन्धस्य तस्य ग्रहणस्य निवर्त्तकं घादीनपि निवर्त्तयति तेनानुवविधेयतया प्रधानभूता घादयोन तेगुणभूतेन तस्य ग्रहणेन निवर्त्यमानेऽपि निव
१३७ र्त्तितुमर्हन्ति न हि गुणानुवर्त्तिप्रधानं किं तर्हि प्रधानानुवर्त्ती गुणः समस्तस्य ग्रहणसामर्थ्यात्प्रधानभूतानामपि घादीनां निवृत्तिः अणादयस्तु न निवर्त्तन्ते
प्राग्दीव्यतःप्राग्भवनादिति च विशिष्टावधिपरिच्छेदस्मादेतत्तमाभ्यन्तरेण न घादयस्तस्य ग्रहणेन निवर्त्तितत्वात् तस्येदमित्यनेन तु प्राप्नुवन्तितस्येदं विशेष

तस्य प्रकरणे तस्येति पुनर्वचनं शैषिकनिवृत्त्यर्थं विकारावयवयोर्बह्वादयो न भवन्ति हालः सैरः ॥ ॥ अवयवे च प्राण्योषधि
वृक्षेभ्यः ॥ ॥ प्राण्योषधिवृक्षवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्योऽवयवे यथाविहितं प्रत्ययो भवति चकाराद्विकारे च तत्र प्रा
णिभ्योऽञं वक्ष्यति कपोतस्य विकारोऽवयवो वा कापोतः मायूरः तैत्तिरः ओषधिभ्यः मौर्वं काण्डं मौर्वं भस्म वृक्षेभ्यः कारीरं का
ण्डं कारीरं भस्म रजतादिभ्योऽञ् प्रत्ययाः प्राण्योषधिवृक्षेभ्यो विकारावयवौ भवतः अन्येभ्यस्तु विकारमात्रे कथं द्वयमोषधि
क्रियते तस्य विकारः अवयवे च प्राण्योषधिवृक्षेभ्य इति विकारावयवयोः पृथगधिकारोऽपवादविधानार्थः ह्रजनि
र्देशो हितौ ॥ २६ ॥ ॥७॥ ॥

त्वाद्विकारावयवयोरितितन्न तस्येदमित्येव विकारावयवयोरणादिषु सिद्धेषु पुनस्तेषां विधानं शैषिकाणां बाधनार्थमेव किं तर्हि उच्यते तस्येति पुनर्वचनं ए॥म॰
शैषिकनिवृत्त्यर्थमिति यावता सूत्रप्रवृत्तिर्वै शैषिकनिवृत्त्यर्थमस्य तस्य ग्रहणात्वयतिस्तत्र प्रवृत्तिः शैषिकानपि विषयीकुर्याद्धि तिन तस्य ग्रहणस्यैवायं १३७
भारः यदुत शैषिका निवर्त्तन्ते हालः सैर इति हलशब्दो न विषयस्मान्नित्यं तस्येत्याद्युदात्तः सीरशब्दः कन्प्रत्ययान्तत्वान्नित्वरेणाद्युदात्तः नात्र वृक्षाभा
गात्सापवादस्य कस्यचित्प्रसङ्गात्स्त्र्याभवति इदं चैयोगविभागेनापि सिद्धं तस्यप्रयोजनं दर्शितं ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

यदि हि तस्य विकारो विकारो विल्वादिभ्यो ऽणिति तेनायं वा प्रत्ययविधानार्थमुच्यते तत्तो ऽहलस्य विकार इत्यत्र तस्येदमित्यनेन प्रत्ययो विधातव्यस्तत्र ब्राह्मणं
गाधिताहलक्षीरादृमितिठक्प्राप्नोति यथा मसिलास्येदं विग्रहे योगविभागेन च ब्राह्मणादीनां विधानाद्दोषो भवति तस्य ग्रहणेनानुवादादीनां निवृत्तिः प्र
योजनं तृणानि विकारो वा जरा इति प्रकृतिशब्दस्य फिट्सूत्रेषु विकल्पेनान्तोदात्तत्वविधानात्पक्षे आद्युदात्तत्वात् तस्य यदित्यत्र तस्येदमित्यण् प्रत्ययः स्या
दपि खलु अनेन बाधितो विधीयेरन् तत्तो मद्रवृद्धो ऽकन्निति कन्स्यात् तथा त्रिगर्तानां विकारः त्रैगर्त इति त्रिगर्तशब्दो बहुव्रीहिः पूर्वपदप्रकृतिस्वरेण
आद्युदात्तः अत्र प्रथमः प्राग्दीव्यतो ऽण् प्राप्तः जनपदलक्षणो वुञ् द्वितीयः गर्तोत्तरपदलक्षणश्छस्तृतीयः तद्वषियग्रहणेन हितो वुञ् चतुर्थः
अनेन त्वणेव भवति तथा शंकराणां विकारो शांकव इति अत्र प्राग्दीव्यतो ऽण् प्रथमः तदपवादयोर्वृद्धाद्यपीति औद् इति वुञ् ठञ् तौ सुलक्ष
णयोरन्यतरो द्वितीयः कोपधादणिति वाक्यादि पाठाद्वाणा ततीयः मनुष्यतत्स्थयोर्वुञ् चतुर्थः अनेन त्वण् प्राप्तः ओरञा बाधितः कोपधा
च्चेति प्रतिप्रसूयते यदि तर्हि विकारावयवयोर्यथा योन भवति पाटलिपुत्रस्यावयवाः पाटलिपुत्रकाः प्रासादा इति तस्येदमित्यत्रार्थे ऽपि पधेतो ः
प्राग्वामिति वुञ् प्राप्नोति नैष दोषः प्राण्योषधिवृक्षेभ्यो हि तादीनामवयवे निवृत्तिः तत्र कः प्रसंगो यदप्राण्योषधिवृक्षेभ्यो ऽवयवे निवृत्तिः
स्यात् ॥ ॥ अवयवे च ॥ ॥ मौर्वमिति मूर्वाशब्दस्त्र्योषध्यन्तानां च ह्रस्वामित्याद्युदात्तः कोविदारमिति स्मादेः स्तदिशवः किरच्च प्रत्ययां
तो निपातितस्तेनाद्युदात्तो ऽलिक्षणो वुञ् प्राप्नोति यदित्वरिष्यते विल्वादिषु पठितमः । कृतनिर्देशो हित्वा विनितस्येदमित्यनेन यथा
विशेषिकनिष्ट सर्थत्वं पूर्वयोगस्य प्रयोजनं मत्वं तथापि तदनयेक्ष्य भासनेनार्तिकमित्या दौतावदणादयः सिद्धास्तमभिसंधायेदमु
कं ॥ ॥२६॥ ॥७॥ ॥७॥७॥ ॥७॥

© Dharmartha Trust J&K. Digitized by eGangotri

का·प१८·४ ॥बिल्वादिभ्योऽण्॥ ॥अञ्मयटोरपवाद इति तत्र कोपधात् पाटलीशब्दाभ्यां च वृद्धलक्षणस्य मयटोऽपवादः शेषेभ्यस्त्वनुदात्तादिलक्षणस्याञः बिल्वशब्द
१३८ स्य बिल्वतिष्ययोर्वेति स्वरितत्वं· स्वरितत्वाद्व्रीहिमुद्गशब्दौ घृतादित्वादन्तोदात्तौ मसूरगोधूमगवेधुकशब्दाल्पघावं तेद्ध्यो मध्योदात्ताः इक्षुः
वेणुः इक्षुः प्रत्ययस्वरेणान्तोदात्तः वेणुशब्दो विभाषा वेणिंधानयोरिति पक्षेऽन्तोदात्तः कर्पासीशब्दो जातिलक्षणङीषन्तः कर्कन्धूशब्दो लाङ्गूलकर्कन्धू दि
धिषूरिति निपातनान्मध्योदात्तः कुटीरशब्दः कुटीशमीशुण्डाभ्यो रः प्रत्ययस्वरेणान्तोदात्तः मयड्बाधनार्थमिति मयड्वैतयोरित्यादिनाप्तस्य मयटो बाध

॥बिल्वादिभ्योऽण्॥ ॥बिल्व इत्येवमादिभ्योऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः। पश्चाद्योगमञ्मयटोरपवादः। बिल्वस्य
विकारोऽवयवो वा बैल्वः। गवेधुकाशब्दोऽत्र पठ्यते ततः कोपधत्वादेव सिद्धे मयड्बाधनार्थं ग्रहणं। बिल्व। व्रीहि। काण्ड। मुद्ग। मसूर।
गोधूम। इक्षु। वेणु। गवेधुका। कर्पासी। पाटली। कर्कन्धू। कुटीर॥ ॥कोपधाच्च॥ ॥ककारोपधाच्च प्रातिपदिकादण्
प्रत्ययो भवति यथायोगं विकारावयवयोरर्थयोः। अञोऽपवादः। तर्कु तार्कवं। तित्तिडीकं तैत्तिडीकं। माण्डूकं। दार्दुरूकं। माधूकं॥ ॥त्रपु
जतुनोः षुक्॥ ॥त्रपुजतुशब्दाभ्यामण् प्रत्ययो भवति विकारे तत्संनियोगेन च तयोः षुगागमो भवति। अञोऽपवादः
त्रपुणो विकारः त्रापुषं। जातुषं। अप्राण्यादित्वान्नावयवे॥ ॥श्रीः॥ ॥श्रीलक्ष्म्यै नमः॥ ॥छ॥ ॥

नार्थं शेषेभ्यस्त्वन्द्वेभ्यः शब्देभ्यः पक्षे मयड्वृत्त्येवम् अण्ग्रहणं बाधकबाधनार्थं बिल्वादिभ्यो यथाविहितमिष्यमाणे पिप्पलीपाटलीशब्दान्ङी रामं॰
षन्तादनुदात्तादिलक्षणस्याञो मयटा बाधे प्राप्ते पुनर्वचनादनेन वस्मादण्ग्रहणात्स्वरेणैव भवति॥ ॥कोपधाच्च॥ ॥अञोऽपवाद इति अञ्जन्म १३८
नुदात्तादेरञिति प्राप्तस्य तित्तिडीकादिपोलवानवृत्त इत्यादिनामध्योदात्ताः॥ ॥त्रपुजतुनोः॥ ॥अप्राण्यादित्वादिति प्राण्योषधिवृक्षेभ्योऽवयवे
तस्याभावादित्यर्थः॥ ॥छ॥ ॥छ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥ओरञ्॥ ॥देवदारुभद्रदारुशब्दौ पीतद्र्वर्थानामिति सादिनाद्युदात्तौ पीतद्रुः सरलोच्यते पीतद्रुरर्थेषि षांतेषंमादिरुदात्तो भवतीत्य र्थः॥ ॥अनुदात्तादेश्च॥ ॥दाधित्थे कपित्थमिति दधनिति ष्ठतीति सुपिस्थः उपपदसमासः पृषोदरादित्वात्सकारस्य तकारः कृदुत्तरपद प्रकृतिस्वरेणान्तोदात्तत्वं॥ ॥पलाशादिभ्यो वा॥ ॥उभयत्र विभाषेयमिति कथमित्याह पलाशखदिरेत्यादि पलाशशब्दो घञन्तादित्वादन्तोदा

॥ओरञ्॥ ॥उवर्णान्तात्प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरर्थयोः अणोऽपवादः अनुदात्तादेरञ् सिद्धो दा हरणं दैवदारवं भाद्रदारवं॥ ॥अनुदात्तादेश्च॥ ॥अनुदात्तादेः प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरर्थयोः अणोऽपवादः दधित्थस्य दाधित्थं कपित्थस्य कापित्थं माहित्थं माहित्थं॥ ॥पलाशादिभ्यो वा॥ ॥पलाशादिभ्यः प्रातिपदि केभ्यो वाञ् प्रत्ययो भवति विकारावयवयोरर्थयोः पालाशं पालाशं वा दि उभयत्र विभाषेयं पलाशखदिरशिंशपास्पन्दना नामनुदात्तादित्वात्प्राप्ते शेषाणामप्राप्ते॥ पलाश। खदिर। शिंशपा। स्पन्दन। मूलास। करीर। शिरीष। यवास। विकंकत॥ ॥शम्याः ष्ट्लञ्॥ ॥शमीशब्दात् ष्ट्लञ् प्रत्ययो भवति विकारावयवयोरर्थयोः अञोऽपवादः शामीलं भस्म शामीली स्रुक्

॥ ॥२७॥ ॥छ॥ ॥छ॥ ॥

न्तः एवाविशद्वो जिशिशिंशेत्यादौ किरच प्रत्ययांतो निपातितः शिंशपाशब्दो द्वितीयं प्रागीषादिति वर्तमाने षांतादीनां यवादीनामिति मध्योदात्तः स्पंदि किंचिच्चलने अनुदात्तेतश्च हलादेरिति युच् करिरितेरिस्न करीरं कृतस्यो मिथुन शृह्यांकि च शिरीषं शेषे नित्स्वरेणाद्युदात्तावेतौ विकंकतमूला सयवासशब्दाश्चा मारीनांवेसाद्युदात्ताः॥ ॥शम्याः॥ ॥अञोपवाद इति शमी शब्दो गौरादिङीषन्तः शामीली स्रुगिति चातुर्मास्येष्वभूय प्रभावासेषु शमय्यः स्रुवो भवंतीति श्रुतेः॥ २७॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰ ४
१३९

॥मयड्वैतयोः॥ ॥मौद्गः सूपः कार्पासमाच्छादनमिति उभयत्र गिल्वाघाणः विकारावयवयोरभक्ष्याच्छादनयोश्च यथासंख्यं न भवति विकारावयवयो
र्भक्ष्याच्छादनयोर्निर्देशेन प्रत्येकमभिसंबन्धात तद्विषयेऽपि यथा स्यादिति । घटयोः ततोऽनन्तरं विशेषप्रत्ययेऽजादिभिः संप्रधारणायां परत्वात् एव स्युः
पूर्वेषां विशेषप्रत्ययानां मयड्भावप्रसंगे माभूदिति शालमयं पक्षे यल्लोऽमयट् केवलं भवतः तस्मात्प्राणिरजतादिभ्यो जातरूपस्तु केऽपि तयोरिति निर्वचनं पुन

॥मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ ॥प्रकृतिमात्राद्भाषायां मयट् प्रत्ययो भवति भक्ष्याच्छादनवर्जितयोर्विकारावयवयोरर्थयो
र्भाषायां विषये यथायथं प्रत्ययेषु प्राप्तेषु अश्ममयं अश्मनं मूर्वामयं मौर्वं । भाषायामिति किं । बैल्वः खादिरो वा यूपः स्या
त् । अभक्ष्याच्छादनयोरिति किं । मौद्गः सूपः कार्पासमाच्छादनं । एतयोरित्यनेन किं । यावन्तो विकारावयवयोः प्रकृतास्तेषु विषयेषु वि
शेषप्रत्ययाः प्राणिरजतादिभ्योऽञित्येवमादयः तद्विषयेऽपि यथा स्यात् कपोतमयं कापोतं लोहमयं लौहमिति ॥ ॥नि
त्यं वृद्धशरादिभ्यः॥ ॥भाषायामभक्ष्याच्छादनयोरित्येव वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादनयोर्विकारावय
वयोर्भाषायां विषये नित्यं मयट् प्रत्ययो भवति वृद्धेभ्यस्तावत् आम्रमयं शालमयं शरादिभ्यः शरमयं दर्भमयं मृन्मयं नित्य
ग्रहणं किं यावता समर्थ्यादेव नित्यं भविष्यति एकाचो नित्यं मयटमिच्छन्तीति तदनेन क्रियते तत्त्वङ्मयं स्त्रग्मयं वाङ्म
यमिति ॥ शर । दर्भ । मृत् । कुटी । तृण । सोम । बल्वज ॥ ॥

विधानं संपद्यत इति परेषामपि विषये मयड्भवति ॥ ॥नित्यं वृद्ध॥ ॥नित्यं मयट् प्रत्ययो भवतीति प्रागदीव्यतीयानामपवादः अणादीनां प्रत्ययलक्षणा
मजेव परत्वाद्बाधते शाकमयं आम्रमयमिति आम्रशब्दो अमितम्भोरिं इत्यस्मिन्नित्यनेन प्रत्ययान्तः । तदनेन क्रियान इति नित्यं शब्दोऽतिरिक्तमानः एतदाचार्य
पठितमस्वाकारस्ताकरणीत्येवं च मञ्जुहृदयशरादिषु पाठे योवप्रयञ्चार्थो द्रष्टव्यः ॥ ॥२ ३॥ ॥३ ३॥ ॥ ॥

राम॰
१३९

© Dharmartha Trust J&K. Digitized by eGangotri

गोश्च पुरीषे ॥ ॥ गोरपि पठ्यते इति कथं पुनरत्र प्रसंगः यावता विकारावयवयोरिति वर्त्तते यच्च न विकारो नावयवः तत्राह पुरीषं न विकार इत्यादि अत्र क्रिय
माणे पुरीषग्रहणेनेष्टसिध्यर्थमेव तस्येदमित्यधिकारे गोर्मयडिति सूत्रं कर्त्तव्यं ततश्चात्रापि प्रसंग इत्यर्थः ॥ ॥ पिष्टाच्च ॥ ॥ पिष्टमयं भस्मेति पि

॥ गोश्च पुरीषे ॥ ॥ गोशब्दात्पुरीषे ऽभिधेये मयट् प्रत्ययो भवति गोमयं पुरीषमिति किमर्थमिदं पुरीषं न विकारो नावयवस्त
स्मिन्विषये विधानं विकारावयवयोस्तु गोपयसोर्यदिति वक्ष्यति ॥ ॥ पिष्टाच्च ॥ पिष्टान्नित्यं मयट् प्रत्ययो भवति तस्य विकार इत्ये
तस्मिन्विषये ऽणोपवादः पिष्टमयं भस्म ॥ ॥ संज्ञायां कन् ॥ ॥ पिष्टशब्दात्कन्प्रत्ययो भवति विकारे संज्ञायां विषये मय
टोपवादः पिष्टकाः ॥ ॥ व्रीहेः पुरोडाशे ॥ ॥ व्रीहिशब्दान्मयट् प्रत्ययो भवति पुरोडाशे विकारे बिल्वादित्वादणोपवादः व्री
हिमयः पुरोडाशः व्रैहमन्यत् ॥ ॥ असंज्ञायां तिलयवाभ्यां ॥ ॥ तिलयवशब्दाभ्यामसंज्ञायां विषये मयट् प्रत्ययो भवति
विकारावयवयोरर्थयोः तिलमयं यवमयं असंज्ञायामिति किं तैलं यावकः यावादिभ्यः कन् ॥ ॥ द्व्यचश्छन्दसि ॥ ॥ द्व्य
चः प्रातिपदिकाच्छन्दसि विषये मयट् प्रत्ययो भवति विकारावयवयोरर्थयोः मयड्वैतयोर्भाषायामिति नित्यं विधीयते यस्य पर्ण
मयी जुहूर्भवति दर्भमयं वासो भवति शरमयं बर्हिर्भवति ॥ २८ ॥ श्रीरामलक्ष्मणाय नमो नमः ॥ ॥ ७ ॥ ॥

द्वीसुरेति तु सामान्यविवक्षायां तस्येदमित्यण्प्रत्ययः तदा शरथापमेथिलीनिवृत्त ॥ ॥ असंज्ञायां ॥ ॥ यावकइत्यत्र यवशब्दाद्विकारे ऽणन्तं
तावता स्यादिति स्वार्थे कन ॥ ॥ २८ ॥ ॥ ३ ३ ३ ॥ ॥ ३ ३ ॥ ॥ ३ ३ ॥ ॥ ३ ३ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰प९०४ ॥नोत्वद्वर्ध्र॥ ॥मौञ्जमिति मुञ्जशब्दात्तृणधान्यानां च द्व्यषामिति प्राप्तस्तत्वादौत्सर्गिकोऽण् गार्मुतमिति गर्मुच्छब्दः स्त्रोहतिः गोर्मुद्वेत्तुतिप्रत्ययांत
१५० त्वादंतोदात्तः स्त्रनुदात्तादेश्चेत्यञ् कथं तर्हि तस्मात् एतं गार्मुतं चरुं निर्वपेदिति तोदात्तत्वं सर्वविधीनां छंदसि विकल्पितत्वादण् भविष्यतीत्याहुः इति
बध्रशब्दो लघावंते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तस्तस्मादण् द्विगुणा जीतिङ्ग् पूमतु श्रेष्ठे ईशाद्यः स्यादित्यस्मतिति म्रिमयडादीनामपवादः तिस्रा दिशेदेनाज्जो ग्रहणं च
ऊक्तवचनं तु तयोरेव प्रकृतिभेदेन बद्धत्वात् तत्र तालशब्दात्कार्मीराद्यलोम रूपा प्रः वार्हिणस्य विकारो बार्हिणं प्राणिरजतादिभ्योऽञ् तस्मात्त्रिस्व

॥नोत्वद्वर्ध्रबिल्वात्॥ ॥उत्वतः प्रातिपदिकाद्वर्ध्रबिल्वशब्दाभ्यां च मयट् प्रत्ययो न भवतीत्यर्थः च छंदसीति प्राप्तः प्र
तिषिध्यते मौञ्जं शैक्यं गार्मुतं चरुः वार्ध्री बालप्रथिता भवति बैल्वो ब्रह्मवर्चसकामेन कार्यः तपरकरणं तत्कालार्थं
र्थं भ्रूमयं भ्रूमयमित्यत्र मा भूदित्येतदनुवर्तते न विधिनिरासार्थः इहैव सामर्थ्ये यायंविषयनिरिति॥ ॥तालादिभ्योऽण्॥ ॥
तालादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः मयडादीनामपवादः तालं धनुः बार्हिणं ऐ
न्द्रालिशं ऐन्द्रालिशः॥ तालाद्धनुषि। बर्हिण। इंद्रालिश। इंद्रायुध। चप। श्यामाक। पीयूक्षा॥ ॥श्रीः॥ ॥

तत्प्रत्ययादिस्वज् प्राप्तिः शेषेभ्योऽनुदात्तादिलक्षणाः अलिशिघपीभ्यामिं द्रशब्दउपपदे मूलविभुजादित्वात्कः अन्येषामपि दृश्यत इति दीर्घत्वं च राम॰
प्राप्तं चनेपचाघवृ पीयूक्षा शब्दो लघावंते इति मध्योदात्तः तत्राहि फिषइत्यधिकारान्योऽवरायः स्वरप्रवृत्तिः इंद्रायुधशब्दः समासस्वरेणांतो १५०
दात्तः तालाद्धनुषीति अन्यत्र तो लमयमिसेध्भवति अणग्रहणं बाधकबाधनार्थं अन्यथा विहितमित्युच्यमाने बार्हिणशब्दाद्वलक्षणोऽम
परस्यात्तवचनं तु नितत्वं न त्वस्यादित्यञोबाधनार्थं स्यात्॥ ॥

॥जातरूपेभ्यः॥ ॥मयड्वैतयोर्नामपवाद इति। आदिशब्दो नाजोऽग्रहणां बहुवचनं तु स्वरूपवत् तत्र हाटकेभ्यो हाटकादिभ्यो मयटोऽपवादः तपनीयादिभ्यो नुदात्तादिभ्योऽञः॥ ॥प्राणिरजतादिभ्योऽञ्॥ ॥अणादीनामिति। आदिशब्दो नमयडपेक्षते बहुवचनं तु स्वरूपवत् तत्राद्युदात्तेभ्यः प्राणिशब्देभ्यो णाप वादो बहुभ्यो मयटः रजतादिभ्यो पि पराद्युदात्तं तस्मादणोपवादः अनुदात्तादेरञ्मयटः कापोतं मायूरं तैत्तिरमिति तित्तिरिशब्दः स्वरेण सर्वत्राम्या

॥जातरूपेभ्यः परिमाणे॥ ॥जातरूपं सुवर्णं बहुवचननिर्देशात्तद्वाचिनः सर्वे गृह्यन्ते जातरूपवाचिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति परिमाणे विकारे मयडादीनामपवादः हाटको निष्कः हाटकं कार्षापणं जातरूपं तापनीयं परिमाण इति किं हाटकमयी ॥ ॥प्राणिरजतादिभ्योऽञ्॥ ॥प्राणिवाचिभ्यः प्रातिपदिकेभ्यो रजतादिभ्यश्चाञ् प्रत्ययो भवति विकारावयवयोरर्थयोः अणादीनामपवादः अनुदात्तादेरञ्विहित एव परिशिष्टमिहोदाहरणं प्राणिभ्यस्तावत् कापोतं मायूरं तैत्तिरं रजतादिभ्यः राजतं सैसं लौहं रजतादिषु येऽनुदात्तादयः पठ्यन्ते तेज नकरकाप्रभृतयस्तेभ्यो ज्ञिमिद्धे पुनर्वचनं मयड्बाधनार्थं॥ रजत। सीस। लोह। उदुम्बर। नीलदारु। रोहितक। बिभीतक। पीतदारु। तीव्रदारु। त्रिकण्टक॥ कण्टकार॥ २९ ॥

सस्येति किमत्ययान्तो तो दात्तः शेषो लघ्वावन्त इति मध्योदात्तो परिशिष्टमिहोदाहरणमिति चोक्तं तस्माच्छुकबकगृध्राद्युदात्ता हापीः शुकबकशब्दो प्राणिनां कुप्वीणामिति प्याद्युदात्तो गृध्रशब्दो रन्प्रत्ययान्त आद्युदात्तः कथं तर्हि कापोतमिति आद्युदात्तः तत्ससमानुदात्तादेः प्राणिग्रहणोऽनुदात्तादेरपि प्राणिभ्यः परत्वादनेनैवाञ् भवितुमर्हतीति तित्तिरयते आह चानुदात्तादेरञः प्राण्यञ् विप्रतिषेधेनेति कः पुनरत्र विशेषस्तेनवा सत्यनेन वा सापवादकः स विधिर्मयटापरेणाबाधा नेत्यपं पुनर्निरवादः अनेनैव हि परत्वान्मयड्बाध्यते किं सिद्धं भवति श्वाविधो विकारः शौवाविधमिति सिद्धं भवति कथं सिद्धं भवति श्वानं विध्यतीति क्विप् नहिवृतीति दीर्घः ग्रहिज्यादिसंप्रसारणं कृदुत्तरपदप्रकृतिस्वरेणान्तो

का॰ प॰ ८०४ ॥जितश्च तत्प्रत्ययात्॥ ॥तत्प्रत्ययात् जितो वृद्धनिमित्तकत्वेन यः संबंधी प्रत्ययः स तत्प्रत्ययः षष्ठीसमासः विकारावयवयोर्वेतिपरिमुत्तु जितस्तत्प्रत्ययान्तः माण्यौषधिवृक्षाद्वाची

१५१ संभवन्ति न तो वयवे पिभवति रूप्योः प्रकृत्य तल्यात्तल श्रमनपेक्षेव मुक्तं ननु च एवं पंचालाः पठोद्धृतिः अवयवे समुदाय एकदेशे विकारे च प्र

कृतिशब्दः शालीनं नु तेमु क्तोरितिण्यलि विकारावयवार्थः ननु तत्र च वद्व्याधि च पत्रविकार इत्यन्ते देविदार्वी दिशह इति ठिकमरा वयव

पोस्तेनन नेताज्ञा इत्यो भविष्यति नार्थी नेनेतां श्रमाहम यदोप वा दृत्ति सल मस्तिय थाकथंचित् इष्टसिद्धिस्तथापि च उलक्षणेण यत्रामाभू

दित्येवमर्थमेवाज्विधेयः अन्यथापेनेव हेतुनेतद्रूपकं भवति दैवदारवस्य विकारः शामलस्य विकारः तेनैव मयड्पि स्यात् विकारोतेनैव हेतु

॥जितश्च तत्प्रत्ययात्॥ ॥अञ् जित्से वृत्तादितिविकारावयवयोः प्रत्यवमर्शः जितो विकारावयवप्रत्ययान्ताद् तान्मा

त्रिपदिकात् प्रत्ययो भवति विकारावयवयोरेव मयट् अपवादः ओ रजतामा॰ इञ्ज प्रा नि रज्जता द्विभ्यो जत्र ञञ्जा हुजए

राणा ठञ्ज कं सीपर्णश्चयोर्धञ्ञज्ञानित्येते प्रत्ययाः एतेभ्यः दैवदारवस्य विकारोवयवो वा दैवदारवं दाधित्थस्य दा

धित्थं पालाशस्य पालाशं शामीलस्य शामीलं कापोतस्य कापोतं औष्ट्रकस्य औष्ट्रकं ऐणेयस्य ऐणेयं कौशेयस्य कौ

शेयं पारशवस्य पारशवं जितरतीति किं बैल्वमयं तत्प्रत्ययादिति किं बैल्वमयं ॥ ॥श्रीः॥ ॥श्रीः॥ ॥छ॥ ॥

नामपत्रु पि प्रामो तिःअनभिधानान्न भविष्यतीति तर्हि वत्सर्वं नमिधानं नियानेन प्रतिपाधते यद्येवं तस्य विकारः उष्ट्रा हुञ्ज औष्ट्रकं च प्रतिषणवे विकारः ओक्षिकोप पा॰ ४०

न दितिरिज्ञला जितितेी प्राप्नोति न चेष्यते एवं हि सोनाः पठंति वुञ्श्चाजाईतः प्रसंगद्दतितस्मादवयवे समुदायशब्दो विकारे च प्रकृतिशब्द इति तेन तेन ल

१५१ क्षणोकाज्ञा दृशो भविष्यंति अनभिधानात्तु विकारावयवप्रत्ययांतान्न मयड् भविष्यती सेन देवसांप्रत वैल्वम यभितिजितोपलेन मयट् सत्रकारे निवर्त्तय

न। अन्नतो च द्विमयदमिति च तिरुक्तो मतं। भाष्यवार्त्तिककारौ पुनराहतुस्तत्रानभिधानमाश्रयितव्यं अभिधानेहासतोपि मयाः प्रसंगः वैल्वस्य वि

कारइति॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥क्रीतवत्॥ ॥चरणेभ्यो धर्मवदिति यथा तेनैव तुल्यमेतत् संख्यायाश्च परिमाणग्रहणेन गृह्यत इति चकारादुन्मानं च परिमीयतेऽनेनेति परिमाणमिति यौगिकः
परिमाणशब्दस्यार्थः तदाह न रूढिपरिमाणमेवेति नैष्किक इति असमासे निष्कादिभ्य इति ठक् शत्यः शतिकः इति शताच्च ठन्यतावशते। साहस्रमि
ति शतमानविंशतिकसहस्रवसनादण् एवं तिः सर्वसादृश्यार्थ इति किमेवं सति सिद्धं भवति तदाह अध्यर्द्धपूर्वेत्यादि सूत्रे न प्रकृतिप्रत्यययोः प्राग्व

॥ञितश्च तत्प्रत्ययात्॥ ॥ञितश्चेवर्ततदिति विकारावयवयोः प्रत्यवमर्शः ञितो विकारावयवप्रत्ययस्तदन्तात् प्राति
पदिकादञ् प्रत्ययो॥ ॥क्रीतवत्परिमाणात्॥ ॥प्राग्वतेष्ठञित्यत आरभ्य क्रीतार्थे ये प्रत्ययाः परिमाणाद्विहितास्ते
विकारेति दिश्यन्ते परिमाणात् क्रीत इव प्रत्यया भवन्ति तस्य विकार इत्येतस्मिन् विषये अणादीनामपवादः संख्यायाश्च प
रिमाणग्रहणेन गृह्यते न रूढिपरिमाणमेव निष्केण क्रीतं नैष्किकं एवं निष्कस्य विकारो नैष्किकः शतेन क्रीतं श
त्यं शतिकं शतस्य विकारः शत्यः शतिकः साहस्रः वतिः सर्वसादृश्यार्थः अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायामित्येव
मादिकमप्यतिदिश्यते द्विसहस्रः द्विसाहस्रः द्विनिष्कः द्विनैष्किकः॥ ॥उष्ट्राद्वुञ्॥ ॥उष्ट्रशब्दाद्वुञ् प्रत्ययो
भवति विकारावयवयोरर्थयोः प्राण्यञोऽपवादः उष्ट्रस्य विकारोऽवयवो वा औष्ट्रकः॥ ३० ॥ ॥छ॥ ॥

तेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति तदन्तविधेश्च परिग्रहः एतदुक्तं भवति याभ्यः प्रकृतिभ्यो येनाविशेषणेन ये प्रत्यया विहितास्ताभ्यः
प्रकृतिभ्यस्तेनैव विशेषणेन त एव प्रत्यया विकारे भवन्ति द्विसाहस्रमिति पक्षे लुक् संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः द्विनैष्किकमि
ति प्राग्वतीयष्ठञ् द्वित्रिपूर्वान्निष्कादिति पक्षे लुक् परिमाणान्तस्येत्युत्तरपदवृद्धिः॥ ॥ ३० ॥ ॥छ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प॰र॰४
१४२

॥उमोर्णयोर्वा॥ ॥उमाशब्दस्तत्राधान्यानां चेत्याद्युदात्तः ऊर्णाशब्दः प्रातिपदिकस्वरेणान्तोदात्तः ताभ्यां वुञ् भावे यथाक्रममणञौ॥ ॥एण्या ढञ्॥
॥स्त्रीलिंगनिर्देशः प्रयोजनमाद्युदात्तत्वमस्त्वञेव भवतीति॥ ॥गोपयसो॥ ॥मयड्विषये त्वित्ति मयड् द्वैतयोरिति विहितस्य मयटो विषये॥ ॥द्रोश्च॥
॥अञोऽपवादः इति ओरञिति प्राप्ते॥ सूत्रप्राप्त्याभिप्रायेचैतत्· एकाचो नित्यं मयटमिच्छन्तीति मयट् स्यात् प्राप्नोति· द्रव्यमिति· द्रोर्विकारः द्रुरिति हस्वनाम·

॥उमोर्णयोर्वा॥ ॥उमाशब्दादूर्णाशब्दाच्च वा वुञ्प्रत्ययो भवति विकारावयवयोरर्थयोः औमकं औमं और्णकं और्णं॥
॥एण्या ढञ्॥ ॥एणीशब्दाड्ढञ् प्रत्ययो भवति विकारावयवयोरर्थयोः प्राण्यञोऽपवादः ऐणेयं मांसं पुंसस्त्वञेव
भवति ऐणस्य मांसं ऐणं॥ ॥गोपयसोर्यत्॥ ॥गोपयःशब्दाभ्यां यत्प्रत्ययो भवति विकारावयवयोरर्थयोः
गव्यं पयस्यं सर्वत्र गोरजादिप्रसंगे यदस्येवं मयड्विषये तु विधीयते॥ ॥द्रोश्च॥ ॥द्रुशब्दाद्यत्प्रत्ययो भवति
विकारावयवयोरर्थयोः ओरञोऽपवादः द्रव्यं॥ ॥माने वयः॥ ॥द्रुशब्दान्माने विकारविशेषे वयः प्रत्ययो
भवति· यतोऽपवादः द्रुवयः॥ ॥श्रीः॥ ॥श्रीश॥ ॥श्री कृष्णाय नमः॥ ॥छ॥ ॥

द्रुरिति वृक्षः तत्तो पि प्रत्ययस्य वा देशः एथिआदिषु वृणोद्व्यशब्दः न तस्येह उत्पत्तिः न हि एथिआदिर्द्रोर्विकारः तस्माद् द्रव्यं निष्पाद्युवं तिएतद्गुणा
इति द्रव्यमिस चोयदितिव्युत्पत्तिः उक्तं च गुणसंद्रावो द्रव्यमिति· गुणेः संद्रूयते प्राप्यत्वेन प्राप्यते इति गुणसंद्रावः गुणसमुदायो द्रव्यमिति·
पक्षे अवयवत्वेन गुणैः संद्रूयते प्राप्यत इति गुणसंद्रावः समिधुद्रुद्रुज्यति द्रदरोरबिलप्यपवादो घञ्॥ ॥माने वयः॥ ॥मीयतेयेनतन्मा

रा॰म॰
१४२

© Dharmartha Trust J&K. Digitized by eGangotri

॥फले लुक्॥ ॥तद्विशेषस्तद्विकारस्तदवयवविशेषे उदाहरणेषु आमलकीशब्दात् ... मयट् लुक् ... योगोऽपि ... आमनन्दत्तादिलक्षणाप्र
जः सर्वत्र लुक् इति लुकि तद्धितप्रत्ययस्य लुक् तेन वचनेन फलस्य विकारः स हि द्विविधो भवति णो वा प्रकृतिसुपम इति स्वाद्रिम ... णो वा प्रकृतेर्भवे
शान्तं करोति वा द्विः सुवइति फलं तु नैवं विधमिति तद्धेत्वित्वमपि कार्यकारिभिन्नत्वविकारो नावयवो नारम्भकत्वात् उत्पन्ने हि तद्धेषु पश्चात् फलमुप
जायते तत्कथं विकारावयवयोरुत्पन्नस्य प्रत्ययस्य लुग्विधीयते इत्यत आह फलितस्येति फलशब्दस्तावत्कोटिः प्रकृतेरवस्थान्तरं विकार इत्युक्तेः फलितावस्था
यां वृक्षफलितावस्थावस्थानात्तस्यैव तत्र वृक्षत्वं न भयत्रानुवर्तते सर्वत्र वो अवस्था विकारः सर्वश्चावयवः स्वोपतः प्राङ्गोपस्थितो नारम्भकः
यथा शरीरस्य हस्तादिरवयवः ... वा दैरवयवो भवति तदेतत्फलेऽपि समानं पल्लवशब्दो द्विर्घादिः फले लुग्विधानमनर्थकं प्रकृत्यन्तरत्वात् आमलकादिशब्दः

॥फले लुक्॥ ॥विकारावयवयोरुत्पन्नस्य फले तद्विशेषे विवक्षिते लुग्भवति आमलक्याः फलं आमलकं कुवलं बदरं फ
लितस्य वृक्षस्य फलमवयवो भवति विकारश्च पल्लवादिस्तस्यैव पल्लवः॥ ॥प्लक्षादिभ्योऽण्॥ ॥फल इत्येव प्लक्षादिभ्यः प्राति
पदिकेभ्यः फले विकारावयवत्वेन विवक्षिते अण्प्रत्ययो भवति अत्रापवादः विधानसामर्थ्यान्न चास्य लुङ् भवति प्लाक्षं नैयग्रो
धं प्लाक्षं नैयग्रोधं आश्वत्थं इङ्गुदी शिग्रु ह्रस्वा बृहती॥ ॥जम्ब्वा वा॥ ॥फल इत्येव जम्बूशब्दात्फले विषये वा अण्प्रत्ययो
भवति अत्रापवादः तत्राणो विधानसामर्थ्याल्लुङ् भवति अन्यत्र लुग्भवत्येव जाम्बवानि फलानि जम्बूनि वा॥ ३१॥ ॥

फलेवन्तिनपोत्तिकः आमलक्याः फलमिति यथा नामलकपोगात् ... आमलकीशब्दः आमलकफलस्यैव मामलकीति यथाङ्गादिशब्दः स्व
त्रियेजनपदे च प्रत्ययनिह सर्वथानुपपत्तेः लुक्को भवति आमलक्या विकारः कुवलस्य विकार इति तथाप्रत्ययोऽपि स्यात्॥ ॥प्लक्षादिभ्योऽण्॥ ॥अत्रो
पवाद इति शिग्रुकाशब्दाभ्यामनुकर्षाति लक्षणास्य शेषे समत्वनुदात्ते लक्षणासु तत्र प्लक्षशब्दः अघिपत्योदात्तः फिषितिप्रातिपदिकस्यान्त
मन्यग्रोधशब्दोऽन्तोदात्त इति मध्योदात्तः अश्वत्थशब्दोऽन्तोदात्तः इङ्गुदी बृहती गौरादिङीषन्तो विभाव सामर्थ्यादिति यद्यस्य
लुक् स्यात् विधानमनर्थकं स्यात् तत्रयणः ... वा लुक् कृतेऽस्ति विशेषः नैयग्रोधमिति न्यग्रोधस्य च केवलस्येति यजागमः॥ ॥जम्ब्वा वा॥ ॥अत्र
लुग्भवत्येवेति अन्योऽविधानसामर्थ्यात् फलात् अत्रान्यत्र तज्जम्बूनीति फलस्याभिधेयत्वान्नपुंसकत्वे सति जम्बुशब्दात् शिः नुम् सर्वनामस्थाने वे

॥लुप् च॥ ॥युक्तवद्भावे विशेष इति लुपि हि सति लुपि युक्तवद्व्यक्तिवचने इति प्रकृत्यर्थगते लिंगवचने भवतः लुकि त्वभिधेयवल्लिंगवचने स्यातां फलपा
कशुषामिति फलपाकेन शुष्यन्तीति फलपाकशुषः व्रीहयो मुद्गा इति बिल्वादिषु यो लुक् यवमाषतिलशब्दास्तु धान्यानां च यामिसाधुदात्तास्तेभ्यः क्री
त्यादिकस्याणो लुप् पुष्पमूलेषु बहुलमिति। पुष्पमूलेषु चाभिधेयेषु बहुलं लुब् भवति मल्लिकादिषु तु द्व्यचलक्षणस्याञो लुप् मल्लिकाशब्दो मादी
नामिति मध्योदात्तः अस्यार्थः अत्र द्वितीयं स्थानं गिषादिति प्रथमासिति कृत्तिमकारादीनां मध्ये द्वितीयमक्षरमुदात्तं भवति नवमालिकाशब्दो ल

॥लुप् च॥ ॥जंब्वाः फलेप्रत्ययस्य चालुब्भवति युक्तवद्भावे विशेषः जंब्वाः फलं जंबूः फलं जंबु फलं जांबवमिति वा
लुप्प्रकरणे फलपाकशुषामुपसंख्यानं व्रीहयः यवाः माषाः मुद्गाः तिलाः। पुष्पमूलेषु बहुलं। मल्लिकायाः पुष्पं म
ल्लिका नवमालिका जातिः विदार्या मूलं विदारी अंशुमती बृहती न च भवति पाटलानि पुष्पाणि शाल्वानि मूलानि बहु
लवचनात् क्वचिदन्यदपि भवति कदंबं पुष्पं अशोकं करवीरं बैल्वानि फलानीति॥ ॥हरीतक्यादिभ्यश्च॥ ॥हरीत
कीत्येवमादिभ्यः शब्देभ्यः फले प्रत्ययस्य लुप् भवति लुकि प्राप्ते वचनं युक्तवद्भावे स्त्रीप्रत्ययश्रवणाच्च विशेषः हरीत
क्याः फलं हरीतकी कोशातकी नखरजनी अत्र वचनस्य त्रियुक्तवद्भावेन वचनं त्वभिधेयवदेव भवति हरीतक्याः फला
नि हरीतक्यः। हरीतकी। कोशातकी। नखरजनी। शाष्कंडी। दाडी। दोडी। दाडिदोडी श्वेतपाकी। अर्जुनपाकी। काला।
द्राक्षा। ध्वांक्षा। गर्गरिका। कंटकारिका। शेफालिका। येषां च फलपाकनिमित्तः शोषः पुष्पमूलेषु बहुलं॥ ॥० ॥

घावंत इति मध्योदात्तः जातिशब्दोन्तोदात्तः क्तिच्क्तौ च संज्ञायामिति क्तिजंतः विदारी बृहतीशब्दौ गौरादिङीषंतौ अंतोदात्तौ अंशुमतीशब्दः प्रातिपदिक
स्वरेणांतोदात्तः ततो मतुप्प्रकृत्यनुदात्तौ मतुपाविति मतुबाद्युदात्तः श्री बहुदात्तः तदेवमंशुमतीशब्दे मतुब्वकार उदात्तः पाटलानीति बिल्वादित्वादणस्सो
ल्वशब्दः प्रातिपदिकस्वरेणांतोदात्तः क्वचिदन्यदपि भवतीति लुपोन्यदपि क्वचित्कार्यं भवतीति तात्पुनर्लुक् लुपोरभावश्च कदंबमित्यादावनुदा
त्तादिलक्षणस्याञो लुक् कदंबादयः शब्दाः लब्धावंत इति मध्योदात्ताः बैल्वानीति ॰ अत्रोभयाभावः बिल्वादयण्॥ ॥हरीतक्यादिभ्यश्च॥ ॥हरी

तक्यादिषु द्राक्षाप्रभृतिभ्यो मयटो लुप् उदात्तादिभ्योऽणः अनुदात्तादिभ्योऽञः॥ ॥

॥ कंसीयपरशव्ययोः ॥ ॥ प्राक्क्रीताच्छेन कंसीय इति प्राक्क्रीताच्छ इत्यधिकारे तस्मै हितमिति छप्रत्ययेन कंसीयशब्दो व्युत्पादितस्तस्यार्थः एतेनोग
वादिभ्यो यत परशव्यशब्दः इति आ ... तेन तस्मिन्नियोगे न कंसीयपरशव्ययोर्लुग्भवतीति प्रत्ययादर्शनस्य लुक्संज्ञाविधानात्तद्द्वयवयोः प्रत्ययो
लुग्भवतीत्यर्थः अथ ह हलिकषिकमिभ्यः स इति पः कंसशब्दे समप्रत्ययोपश्च पराशृणोतीति परशुः आङ् परयोः खनिशृभ्यां डिच्चेति कुप्रत्ययः
योर्लुक् स्यान्न भवतीति तत्राह प्रातिपदिकाधिकारादिति प्रातिपदिकाधिकारे हि ततः परयोः शब्दयतोर्लुग्भवति न धातुप्रत्ययस्य आह च स्वा

॥ कंसीयपरशव्ययोर्यञञौ लुक् च ॥ ॥ प्राक्क्रीताच्छेन कंसीयः उगवादिभ्यो यता परशव्यः कंसीयपरशव्यश
ब्दाभ्यां यथासंख्यं यञञौ प्रत्ययौ भवतः तस्य विकार इत्येतस्मिन्विषये तत्संनियोगेन कंसीयपरशव्ययोर्लुग्भव
ति कंसीयस्य विकारः कांस्यः पारशव्यस्य विकारः पारशवः प्रातिपदिकाधिकाराद्धि प्रत्ययस्य लुक् भवति प
रशव्यशब्दस्य तु दान्तादित्वादेव ञ्जित्वे अलुगर्थं वचनं ननु च यस्येति लोपे कृते हलस्तद्धितस्येति यलोपो
भविष्यतीति नैतदस्ति इतिरिति तत्रैव वक्ष्यति ॥ ॥ इति काशिकायां वृत्तौ चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

प्रातिपदिकग्रहणमंगपदसंज्ञार्थं यञञोश्चालुगर्थमिति नन्न चान्तः ष्ठाक स्मिकं सेत्यत्र कंसग्रहणं लिंगनावश्यमुरणादिषु व्युत्पन्निकार्थं भव
तीति तेनोकारसकारयोर्लुग्न भविष्यतीति सत्यं हृद्भ्राह हृद्वर्णोच्चारणा ग्लश्चणप्रत्ययविधौ न तत्प्रत्ययार्थमवरूपकर्त्रिम सञ्ज्ञा प्रातिकृत्य
हणस्यानुषंगिकं प्रयोजनं दर्शितं अत एव च स्वा प्रातिपदिकादित्यत्र नेदं वृत्तिकृता दर्शितं ॥ ॥ इति हरदत्तमिश्रविरचितायां पदमंजर्यां
चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ८·५ ॥ प्राग्वहतेष्ठक् ॥ ॥ तदाहेति वाक्यादेतत्प्रत्ययविधानमिति वक्ष्यति न च वाक्यात् द्वितीया संभवति प्रातिपदिकत्वात् तेनाह इतिकर्ममात्रनि
१४५ र्दिश्यते न तु द्वितीया समर्थविभक्तिः माशब्द इत्याहेति शब्दो मा कार्षीत् इत्याहेत्यर्थः संसर्गरूपस्य कार्थस्येति करणे प्रत्ययः मत्वर्थे इति वचन
क्रियाप्रतिकर्मत्वं संभवति नाम इत्येति मत्वैव विग्रहः वाक्यादेतत्प्रत्ययविधानमिति एतत्त्वाहौ प्रभूतादिभ्य इति पुनर्वचनात् प्रभृतेः प्रभृता

॥ प्राग्वहतेष्ठक् ॥ ॥ तद्वहति रथयुगप्रासंगमिति वक्ष्यति प्रागेतस्मात् ठहतिसंशब्दनाधानद्यानेः तु क्तमित्या
मष्टक्प्रत्ययस्तत्राधिकृतो वेदितव्यः वक्ष्यति तेन दीव्यति खनति जयति जितमिति अक्षैर्दीव्यति आक्षिकः । ठक्
प्रकरणे· तदाहेति माशब्दादिभ्य उपसंख्यानं माशब्दं इत्याह माशब्दिकः नैत्यशब्दिकः कार्यशब्दिकः प्रातिपदि
काधिकारेऽपि वाक्यादेतत्प्रत्ययविधानेऽप्याहौ प्रभूतादिभ्यः प्रभूतमाह प्राभूतिकः पार्याप्तिकः क्रियाविशेषणा
त्प्रत्ययः । पृच्छतौ सुस्नातादिभ्यः सुस्नातं पृच्छति सौस्नातिकः सौखरात्रिकः सौखशायनिकः । गच्छतौ परदा
रादिभ्यः परदारान् गच्छति पारदारिकः गौरुतल्पिकः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥

राम॰

दयो माशब्दादयः एवमवं तु किं पृच्छ्यतेऽन्वचनेन । आहौ प्रभूतादिभ्य इति आहेति प्रत्ययकृतिमात्रस्य आगंतुकेनेकारेणोऽस्मननुकरणं तत्र शब्दे कार्ये संभवा १४५
दर्थप्रत्ययविधिः क्रियाविशेषणादित्यात्र अभिधायिन इत्यर्थः पृच्छताविति तिङं तानुकरणमेतत् एवं गच्छताविति तिङं तादर्थ्ये तु प्रत्ययः सुस्ना
तं पृच्छतीति· सुस्नातं भवतेति सुस्नातो भवानिति एवं वा पृच्छतीत्यर्थः । सौखरात्रिक इति सुखरात्रिः यः पृच्छति स एव मुच्यते एतेन सौखशा
यनिको व्याख्यातः अनुशतिकादित्वादुभयपदवृद्धिः गौरुतल्पिक इति तल्पशब्देन भार्योपलक्ष्यते ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।तेनदीव्यति।। ।।सर्वत्रकरणेतृतीयेतिदीव्यत्यादावभिहितत्वात्कर्तरितृतीयानोपपद्यतेकरणेतृतीयातत्प्रपद्यतइतितस्मात्चर्मणाजितमि
त्यनेनापिकरणेएवतृतीयेतिसर्वशेषार्थः तेनदेवदत्तेनजितमित्यत्रनभवतिहितुतृतीयातुनाशंकनीयाकर्त्रनभिधानात्तेनहिहेतुतृतीया
तादुत्पद्यमानेनठकाविग्रहवाक्यार्थस्याभिधानमस्ति॰ प्रत्ययार्थइति॰ निर्द्धारणएषामेप्रमीसामान्यापेक्षमेकवचनंइहदीव्यन्तोनिर्णवहवो
र्थः कर्तृत्वंएकत्वसंख्या वर्तमानकालोप्रथमस्मपतिरिक्तइतितत्रप्रमध्यइत्यर्थः तदेवदर्शितंसंख्याकालयोरविवक्षेति॰ नान्तरीयकत्वात्अवश्यं
हियथाकथंचित्संख्ययाप्येकेनचित्कालेननिर्देशइतिनयोरुपादानंनतत्तयोर्विवक्षातत्आक्षिकोआक्षिकाइतिद्विवचनेरूपमपिभवतिअ
क्षैर्दीव्यद्दिस्यादोकालान्तरेवा क्षिकइतिभवति॰ न्यायस्यतुल्यत्वात्पुरुषस्याप्यविवक्षातेनाक्षिकस्त्वमाक्षिकोहमित्यत्रापिभवति॰ यथैव
नहिसंख्याकालपुरुषाणामविवक्षातथाकर्तुरपिप्राप्नोतिएकप्रत्ययवाच्यत्वात्तनैषदोषः कर्त्तुरविवक्षायामाख्यातोपादानमकिंचित्क

।।तेनदीव्यतिखनतिजयतिजितं।। ।।तेनेतितृतीयासमर्थाद्दीव्यतिखनतिजयतिजितमित्येतेष्वर्थेषु ठक्प्रत्ययोभ
वतिअक्षैर्दीव्यतिआक्षिकः शालाकिकः अभ्यावखनतिआभ्रिकः कौद्दालिकः अक्षैर्जयतिआक्षिकः अक्षैर्जितंआक्षि
कं शालाकिकं सर्वत्रकरणेतृतीयासमर्थविभक्तिः देवदत्तेनजितमित्यत्रनभवत्य नभिधानात्अंगुल्याखनतीत्येव।।
प्रत्ययार्थेसंख्याकालयोरविवक्षाक्रियाप्रधानत्वेपिह्याख्यातस्यतद्धितःस्वभावात्साधनप्रधानः।। ।।१।। ।।

रस्यात्॰ विपर्ययस्तुनभवति॰ कर्तुरविवक्षाकालादीनांविवक्षेतिकर्तुःप्रधानत्वात्संख्यादिविशिष्टोहिकर्ताआख्यातानांप्रधान
भूतोर्थस्तेनसतावाद्विवक्ष्यतेइतरेषांनान्तरीयकत्वादविवक्षाकिंचसाधनस्याप्यविवक्षायांजितमित्यस्योपादानमनर्थकंस्यात्॰ इहाख्या
तेषुक्रियाप्रधानभूतागुणभूतः कर्त्ताअतएवकिंकरोतिदेवदत्तइतिक्रियाप्रश्नेपचतीत्याख्यातेनोत्तरंदीयतेननुकृदंतेनपाचकइ
तितस्यसत्वप्रधानत्वात्॰ किंचपरिकृदंतेष्विवाख्यातेष्वपिकर्त्ताप्रधानभूतःस्यात्यथापाचकस्यापत्यमित्यपत्यादिभिर्योगोभवति
तथाख्यातेनाप्यस्यापिस्यात्पचत्यपत्यमितिक्रियावेशस्वस्यात्यथापाचकातिष्टतीतितस्मात्क्रियाप्रधानमाख्यातंततस्तत्रयर्थेवि
धीयमानःप्रत्ययोपिक्रियाप्रधानःस्यादितिजितंतयापत्याद्रितिपथातेनेकदिकृतमित्यत्रेत्येकस्मिन्नर्थेविधीयमानयोरायोस्तत्वभूतार्थो
नत्राहक्रियाप्रधानत्वेपिचाख्यातस्येति॰ आख्यायतेनेनक्रियाप्रधानभूतेनाख्यातत्तिङ्॰ तःकस्यत्वयोबहुलमितिकरणोक्तःखनिकाप्रति

© Dharmartha Trust J&K. Digitized by eGangotri

॥संस्कृतं॥ ॥योगविभाग उत्तरार्थ इति॰ उत्तरोपचारः संस्कृत एव यथा स्यात्॥ ॥कुलत्थ॥ ॥कुलेति शष्ट इति कुलत्थः अस्मादेव निपातनात्सका रस्य तकारः केचित्पुनः सकारमेवाधीयते॥ ॥नौघ॥ ॥इह ठगधिकारे सूत्रेषु ठञ्चित्को हि तिकः ठकारः कश्चित्प्रत्ययस्यानुबन्धो टीषर्थ इच चकंस्मा हितिकं साहितिकः को नानुबन्ध इति तत्र सन्देहे विषयपरिगणनं करिष्यन् लोकवार्त्तिककारः सर्वानेव घितः परिगणयति स्माकर्षादि इति॰ परि

॥संस्कृतं॥ ॥तेनेति तृतीयासमर्थात्संस्कृतमित्येतस्मिन्नर्थे ठक्प्रत्ययो भवति सत उत्कर्षाधानं संस्कारः दध्ना संस्कृतं दाधिकं शार्ङ्गवेरिकं मारिचिकं योगविभाग उत्तरार्थः॥ ॥कुलत्थकोपधादण्॥ ॥कुलत्थशब्दात्ककारोपधाच्च प्रातिपदिकादण्प्रत्ययो भवति संस्कृतमित्येतस्मिन्विषये ठकोपवादः कुलत्थैः संस्कृतं कौलत्थं ककारोपधात्तैत्तिडीकं दार्दभकं॥ ॥तरति॥ ॥तेनेति तृतीयासमर्थात्तरतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति तरति प्लवतेऽर्थः कांडप्लवेन तरति काण्डप्लविकः शारप्लविकः औडुपिकः॥ ॥गोपुच्छाट्ठञ्॥ ॥गोपुच्छशब्दाट्ठञ्प्रत्ययो भवति तरतीत्येतस्मिन्नर्थे ठकोपवादः स्वरे विशेषः गौपुच्छिकः॥ ॥नौद्व्यचष्ठन्॥ ॥नौशब्दाद्द्व्यचश्च प्रातिपदिकाट्ठन्प्रत्ययो भवति तरतीत्यस्मिन्विषये ठकोपवादः नावा तरति नाविकः घटिकः प्लविकः बाहुकः षकारः सो हि हितिकोनानुबन्धः बाहुका स्त्री आकर्षात्ष्ठल्। इमस्त्रादिभ्यः कुसीदसूत्राच्च आवसथात्किसरादेः षितः षडेते ठगधिकारे विधिवाक्यापेक्षया षडेव प्रत्ययाः स्मृताः॥ ॥चरति॥ ॥तेनेति तृतीयासमर्थाच्चरतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति॰ चरतिर्भक्षणे गतौ च वर्त्तते शकटेन चरति शाकटिकः हास्तिकः

तु पत्रसन्देहस्तावेतौ पाठायैतावन्तष्ठगधिकारे षित इत्युच्यते तदाहाकर्षादिषु प्रत्ययपक्षषित्वमनार्षमासंशकोत कुसीदसूत्रादिति॰ कुसीदादिकं सूत्रं पठ्यते तत्कुसीदसूत्रं कुसीदशब्दस्य दशैकादशशब्दस्य च ननु सर्वे ते भवन्ति कुसीदादिसूत्रेण ठकः षितो विधानादित्यत आह विधिवाक्यापेक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

॥ आकर्षात् ॥ ॥ आकर्षेति पुंसि संज्ञायां घः प्रायेणेति घः प्रत्ययः ॥ ॥ पर्प ॥ ॥ पर्पादिरिषुपादः पदिति पद्यते पादाभ्यामिति पर्पिकः प
दसत इत्यर्थ इत्यत्र वक्ष्यति पद्भाव इहके चरतावुपसंख्यानमिति सोऽस्येव प्रपंचार्थः ॥ ॥ श्वगणात् ॥ ॥ श्वगणिक इति । ननु च श्वगणाद्वेद्वारादिषु ॥

॥ आकर्षात्ष्ठल् ॥ ॥ आकर्षशब्दात्ष्ठल्प्रत्ययो भवति चरतीत्येतस्मिन्नर्थे ठकोऽपवादः लकारः स्वरार्थः षकारो ङीषर्थः
आकर्षेण चरति आकर्षिकः आकर्षिकी आकर्ष इति सुवर्णपरीक्षार्थो निकषोपल उच्यते ॥ ॥ पर्पादिभ्यः ष्ठन् ॥ ॥
पर्प इत्येवमादिभ्यः ष्ठन्प्रत्ययो भवति चरतीत्येतस्मिन्नर्थे ठकोऽपवादः नकारः स्वरार्थः षकारो ङीषर्थः पर्पिकः पर्पिकी
। अश्विकः अश्विकी । पर्प अश्व अश्वत्थ रथ जाल न्यास व्याल पादः पत ॥ ॥ श्वगणाट्ठञ्च ॥ ॥ श्वगणाट्ठञ्प्रत्य
यो भवति चकारात्ष्ठन् चरतीत्येतस्मिन्नर्थे ठकोऽपवादः श्वगणेन चरति श्वागणिकः श्वागणिकी ष्ठन् श्वगणिकः
श्वगणिकी । श्वादेरिञीत्यत्र वक्ष्यति इकारादिग्रहणं च श्वागणिकाद्यर्थमिति तेन ठञि ऐजागमादिकार्यं न भवति ॥ ॥
वेतनादिभ्यो जीवति ॥ ॥ तेनेति तृतीयासमर्थेभ्यो वेतनादिशब्देभ्यो जीवतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति । वेतनेन
जीवति वैतनिकः कर्मकरः धनुर्दण्डग्रहणं संघातविगृहीतार्थं धानुर्दण्डिकः धानुष्कः ॥ दाण्डिकः ॥ वेतन वाह अर्ध
वाह धनुर्दण्ड जाल वेश उपवेश प्रेषण उपस्ति सुख शय्या शक्ति उपनिषत् उपवेष स्रक् पाद उपस्थान ॥ ॥
वस्नक्रयविक्रयाट्ठन् ॥ ॥ वस्नक्रयविक्रयशब्दाभ्यां तृतीयासमर्थाभ्यां ठन्प्रत्ययो भवति जीवतीत्येतस्मिन्नर्थे ठकोऽप
वादः वस्नेन जीवति वस्निकः क्रयविक्रयग्रहणं संघातविगृहीतार्थं क्रयविक्रयिकः क्रयिकः विक्रयिकः ॥ २ ॥

पद्यते तदादिविधिश्च तत्रेष्यते तत्कथं श्वागणिक इति तत्राह श्वादेरिञीत्यत्रेति ॥ ॥ वेतन ॥ ॥ धनुर्दण्डग्रहणं संघातविगृहीतार्थमिति ।
तत्राहृत्सेक ग्रो धारणामन्यत माप्यशाणार ॥ ॥ वस्न ॥ ॥ वस्नेन वस्नं मूल्यं क्रयविक्रयग्रहणं संघातविगृहीतार्थमिति । उक्तोऽत्र हेतुः क्रय

© Dharmartha Trust J&K. Digitized by eGangotri

॥आयुधात्॥ ॥आयुधशब्दात्तेनेनेत्यायुधं जीवनार्थकविधानमिति छप्रत्ययः॥ ॥हरत्युत्॥ ॥हरतिग्रहणमुत्तरत्र योगे॥ ॥भस्त्रा॥ ॥भस्त्रा चर्मविकारः येन लोहादि ध्मापते येन वा धान्यादिकं नीयते तद्रूपामाश्रुभसित्यस्त्रन्तिति करणो ऽत्र न शीर्षे भार इति पठ्यते निपातनाच्छीर्षभावः सप्तमीसमास

॥आयुधाच्छ च॥ ॥आयुधशब्दाच्छप्रत्ययो भवति चकाराट्ठञ्च जीवतीत्येतस्मिन्नर्थे आयुधेन जीवति आयुधीयः आयुधिकः॥ ॥हरत्युत्संगादिभ्यः॥ ॥तेनेत्येव उत्संगादिभ्यस्तृतीयासमर्थेभ्यो हरतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति हरतिर्देशान्तरप्रापणे वर्त्तते उत्संगेन हरति औत्संगिकः औडुपिकः उत्संग उडुप उत्सल पिटक॥ ॥भस्त्रादिभ्यः ष्ठन्॥ ॥भस्त्रेत्येवमादिभ्यस्तृतीयासमर्थेभ्यो हरतीत्येतस्मिन्नर्थे ष्ठन्प्रत्ययो भवति भस्त्रया हरति भस्त्रिकः भस्त्रिकी भरटिकः भरटिकी भस्त्रा भरट भरण शीर्षभारः अंसेभार अंसेभार॥ ॥विभाषा विवधवीवधात्॥ ॥हरतीत्येव विवधवीवधशब्दाभ्यां तृतीयासमर्थाभ्यां विभाषा ष्ठन्प्रत्ययो भवति तेन मुक्ते ठगपि भवति विवधेन हरति विवधिकः विवधिकी वीवधिकः वीवधिकी ठक्खल्वपि वैवधिकः वैवधिकी विवधवीवधशब्दौ समानार्थौ पर्याहारे वर्त्तेते॥ ॥अण् कुटिलिकायाः॥ ॥हरतीत्येव कुटिलिकाशब्दात्तृतीयासमर्थादण्प्रत्ययो भवति हरतीत्येतस्मिन्नर्थे कुटिलिकया हरति मृगं व्याधः कौटिलिको व्याधः कुटिलिकया हरत्यंगारान् कौटिलिकः कर्मारः॥ ॥निर्वृत्तेऽक्षद्यूतादिभ्यः॥ ॥तेनेत्येव अक्षद्यूतादिभ्यस्तृतीयासमर्थेभ्यो निर्वृत्त इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति अक्षद्यूतेन निर्वृत्तं आक्षद्यूतिकं वैरं जानुप्रहृतिकं आक्षद्यूत जानुप्रहृत जंघाप्रहृत पादस्वेदन कंटकमर्दन गतागत

श्वतस्रुरुषेह्लतिवद्गुलामिति समस्या अनुक॥ ॥विभाषा॥ ॥पर्याहारश्चेति परितस्माद्ध्रियते तेनेन तं डुलादिकोर्थ इति पर्याहारः उभयतो बद्धशिक्यो स यन्त्रः काष्ठविशेष उच्यते वीवधशब्दो वार्त्तिकदर्शनात्सत्रे प्रक्षिप्तः॥ ॥अण्॥ ॥व्याधकर्मारयोरुपकरणं कुटिलिका संज्ञायां कन्॥ ॥छ॥ ॥ठ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥त्रेर्मप्॥ ड्वितः क्त्रिरित्ययं त्रिशब्दो गृह्यते ततस्तृतीयासमर्थाद् वचनमत्र न अभिधानान्न गृह्यते ते उ त्रिममिति विच्यादि स त्रेराम्प्रमाणं नित्यग्रहणं स्वात
न्त्र्यनिवृत्त्यर्थमिति तस्य परिहितस्यान्तस्य प्रयोगः स्वातन्त्र्यं स्वातन्त्र्यनिवृत्तौ मप्सायोगुणान्तं दर्शयति अन्ते नित्यं मप्प्रत्ययान्तमेव भवतीति एवका
रश्चावच्छेदं दर्शयति विषयान्तरे न प्रयोक्तव्यमिति न तु अभिधाय यावाको प्रसक्ते नित्यग्रहणं । किं प्रमाणं निर्वृत्ताधिकारे तद्विषयमेव वाक्यं निवर्त
यितुमर्हतीति यश्चित्रमं निर्वृत्तमिति यथा अनुपश्चाल्लोपि नो ययेतरसां नित्ये संज्ञा छन्दसोरि लितितश्च विषयान्तरगतस्वान्तस्य स्वातन्त्र्यं स्यादेव क

॥त्रेर्मप्नित्यं॥ ॥निर्वृत्त इत्येव ड्वितः क्त्रिरित्ययं त्रिशब्दो गृह्यते अन्तान्नित्यं मप्प्रत्ययो भवति तेन निर्वृत्त इ
त्येतस्मिन्विषये । डुपचष् पाके पक्त्रिमं डुवप् उप्त्रिमं डुकृञ् करणे कृत्रिमं । नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थं त्र्यन्तं नित्यं
मप्प्रत्ययान्तमेव भवति विषयान्तरे न प्रयोक्तव्यमिति । भावप्रत्ययेनाऽऽदिमप् वक्तव्यः पाकेन निर्वृत्तं पाकि
मं त्यागिमं रागिमं सेकिमं कुट्टिमं ॥ ३ ॥ ॥

त्रिमं महत्सु विहितमिति एवं मप्रत्ययो गम्यमानोऽत्र कर्तव्यः त्रेर्मप् भवति निर्वृत्त इत्येको योगः ततो नित्यं अत्र त्रेर्मप् विसर्गापेक्ष्यते न निर्वृत्त इ
ति योगविभागसामर्थ्यात् तेन सर्वविषयस्वातन्त्र्ये नित्यग्रहणेन निवृत्तिः । किं पुनः इमिनच्चेवमपि नित्यमित्यत्र निर्वृत्त इत्यस्मिन् अन्ये आप्य
स्वातन्त्र्यान्तरे नित्यमुपाधिः प्राप्नोति मप्संज्ञन अभिधानात्तु तथा नाश्रीयते भावप्रत्ययान्तादिमब्वक्तव्य इति तेन निर्वृत्त इत्येतस्मिन्नर्थे । पा
केन निर्वृत्तं पाकिममिति एवं च अन्तादपि भावाभिधायिनः इमप् इष्टेऽतिथे तिलोपे च क्त्रिममित्यादिसिद्धं भवति स्वरेऽपि नास्ति वि
शेषः उदात्तनिवृत्तिस्वरेणोदात्तत्वे सत्त्राम्भस्तु नित्यग्रहणेन स्वातन्त्र्यनिवर्त्यपि प्रमाणं एवमर्थो विदितव्यः ॥ ३ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४

१५७

अपमित्य अपमित्येति उदीचां माङो व्यतिहार इति क्त्वाप्रत्ययेऽपशब्देन समासे क्त्वो ल्यप् अपमयते इदं मत्तः स्वामिनी त्वं क्वातो मुक्तं पुनः इत्यप
पसंज्ञाते नना अत्र तृतीया समर्थात् प्रत्ययः॥ ॥संसृष्टे॥ ॥ननु पघेन संसृष्टं तत्तेन संस्कृतं भवतीति तस्य संस्कृतमित्येव संसृष्टेपि प्रत्ययः सिद्धः नसि
ध्यति एतत् उत्कर्षाधानं संस्कारः एकीभाववस्तु संसर्गः नच यत्रास्ति तत्रावश्यमुत्कर्षोस्ति अशुचिद्रव्यसंसर्गे हि प्रत्युतापकर्ष एव भवतीति तस्मा
त्संसृष्ट इति वक्तव्यं यद्यप्यतिरंधनमस्य तदेवास्तु माभूत् संस्कृतमित्येनन तदेव रूपं कर्तव्यं इहापि यथा स्यात् विघ्यासंस्कृतो वै वैधिक इ
ति न च यत्र संसर्गोस्ति न स्यात् तद्धर्मत्वात् किंच कुलत्थकोपधात् अण् संस्कृत एव यथा स्यात् संसृष्टे माभूदित्येवमर्थं संस्कृतमित्येतद्भवतीति व

अपमित्ययाचिताभ्यां कक्कनौ॥ ॥निर्वृत्त इत्येव अपमित्ययाचितशब्दाभ्यां यथासंख्यं कक्कनौ इत्येतौ प्रत्ययौ
भवतः निर्वृत्त इत्येतस्मिन्नर्थे आपमित्यकं याचितकं॥ ॥संसृष्टे॥ ॥तेनेत्येव तृतीयासमर्थात् संसृष्ट इत्येतस्मिन्न
र्थे ठक् प्रत्ययो भवति संसृष्टमेकीभूतं संमिश्रमित्यर्थः दध्ना संसृष्टं दाधिकं शार्ङ्गवेरिकं मारिचिकं पैप्पलिकं
॥ ॥चूर्णादिनिः॥ ॥चूर्णशब्दादिनिः प्रत्ययो भवति संसृष्टेर्थे ठकोपवादः चूर्णैः संसृष्टाश्चूर्णिनो अपूपाः चूर्णि
नो धानाः॥ ॥लवणाल्लुक्॥ संसृष्ट इत्येव तेनेत्यस्य ठको लवणशब्दाल्लुग्भवति लवणेन संसृष्टः लवणः सू
पः लवणं शाकं लवणा यवागूः द्रव्यवृत्तिलवणशब्दो लुकं प्रयोजयति न गुणवाची॥ ॥मुद्गशब्दादण् प्रत्य
यो भवति संसृष्ट इत्येतस्मिन् विषये ठकोपवादः मौद्ग

क्तव्यं॥ चूर्णात्॥ ॥चूर्णानि ये संसृष्टास्तेषां चूर्णाः सन्तीति मत्वर्थीयेनैवेनिना सिद्धं सत्यं तद्रूपविवक्षायां हि इदं संसर्गविवक्षायां तु ठक् प्राप्नो
ति अनभिधानं तु दुर्ज्ञानं॥ ॥लवणात्॥ ॥लवणाद्द्रव्यवाचीत्यादि लवणशब्दोयमस्ति गुणवचनः षण्णां रसानामन्यतमस्य वाचकः
अस्ति च द्रव्यवचनोपि सैंधवादिषु वर्तते तत्र यो गुणवचनः स न लुकं प्रयोजयति मधुरादिशब्दवदभेदोपचाराद्द्रव्ये वर्तते इति हेतुः द्रव्यश
ब्दस्तु सोयमित्यभिसंबंधाद्द्रव्ये वर्तमानः यद्यपि प्रसिद्ध्या वरीयस्त्वाः प्रवेशयत्यसौ द्रव्यशब्दस्यापि क्वचिदभेदोपचारो दृष्टस्तथापि भेदविव
क्षायां तत्र योपि द्रव्यवचनः स्यैव प्राधान्यमिति मतः पुरुषाणामिति तस्माद्द्रव्यवाच्येव लवणशब्दो लुकं प्रयोजयति स च प्रयोजयत्येव॥ ॥ ॥

राम॰

१५७

© Dharmartha Trust J&K. Digitized by eGangotri

व्यंजनैः॥ ॥ओदनादिषु रसोपेनव्यज्यते तद्व्यंजनं बहुवचननिर्देशः स्वरूपविधिनिरासार्थः उपसिक्तं सेचनेनमृदूकृतः इह पूर्वेणोपसि
क्तं तेन संस्कृतं भवति तत्र संस्कृते सिद्धे नियमार्थं वचनं व्यंजनेनैव उपसिक्त एवं संस्कृते यथा स्यात् संसृष्टमात्रं माभूत् दध्ना संसृष्टं स्थाली
ति॥ ॥तत्प्रत्यनु॥ ॥क्रियाविशेषणानिमित्तादि आम्नातं हि धात्वर्थस्य कर्तव्यतामाचष्टे वर्त्तति वर्त्तनं करोति सुप्यते वायः क्रियते शो
भनमोदनं पच्यते ओदनकर्मकः पाकः शोभनः क्रियत इति पविधात्वर्थः कर्त्तव्य एव संपद्यमानः कर्म संपद्यते तस्य पत्र समानाधिकरणं

व्यंजनेनोपसिक्ते॥ ॥तेनेत्येव व्यंजनवाचिभ्यः शब्देभ्यस्तृतीयासमर्थेभ्य उपसिक्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भव
ति दध्ना उपसिक्तं दाधिकं सौपिकं मनेनेरिति किं उदकेनोपसिक्त ओदनः॥ ॥ओजः सहोम्भसा वर्त्तते॥ ॥
ओजः सहोम्भः शब्देभ्यस्तृतीयासमर्थेभ्यो वर्त्तत इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति ओजसा वर्त्तते ओजसिकः
शूरः साहसिकश्चौरः आंभसिको मत्स्यः॥ ॥तत्प्रत्यनुपूर्वमीपलोमकूलं॥ ॥वर्त्ततिति द्वितीयासमर्थविभ
क्तिः प्रति अनु इत्येवं पूर्वेभ्य ईपलोमकूलशब्देभ्यो वर्त्तत इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति ननु वर्त्ततिरकर्मकस्त
स्य कथं कर्मणा संबंधः क्रियाविशेषणमकर्मकाणामपि कर्म भवति प्रतीपं वर्त्तते प्रातीपिकः आन्वीपिकः
आनुलोमिकः प्रातिलोमिकः आनुकूलिकः प्रातिकूलिकः॥ ४॥ ॥

विशेषणांतरूपिकमेवं भवति प्रातीपिक आन्वीपिक इति प्रतिगता आपो यस्मिन्निति बहुव्रीहिः ऋक्पूरब्धूःपथामानक्षे इत्यकारः समासांतः द्व्यंतरुपस
र्गेभ्योप ईदिति ईत्वं व्युत्पत्तिमात्रं चैतत् प्रतिकूलानुकूलपर्यायोत्वेनोद्देशस्त्वमत्र न भवति अदेशत्वात् देशत्वे क्रियाविशेषणात्वा
संभवात् सूत्रे ईप्शब्दस्य निर्देशात् प्रातिलोमिक आनुलोमिक इति पूर्ववद् बहुव्रीहिः अचप्रत्यन्ववपूर्वात् सामलोम्नः इत्यच् समासांतः अत्रापि व्यु
त्पत्तिमात्रमर्थस्तु पूर्वोक्त एव प्रातिकूलिक इति पूर्ववद् बहुव्रीहिः अत्रापि कूलार्थो नास्ति प्रतिसरणमनुसरणं चैतयोरर्थः॥ ४ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।परिमुखंच।। ।।पारिमुखिक इति। परिहि ह वर्जने वर्त्ततेत स्य चापपरीवर्जन इति कर्मप्रवचनीयसंज्ञायां पंचम्यपाङ्परिभिरिति पंचमी अपपरिबहिः चवः पंचम्या इत्यव्ययीभावः अनेन ठक् स्वामिनो मुखं वर्जयित्वा यः सेवको वर्त्तते स पारिमुखिकः सर्वतोभावे वा परिशब्दः परितो मुखं प्राप्तिसमासः पतो यतः स्वामिनो मुखं ततस्ततो वर्त्तते इत्यर्थः एवं पारिपार्श्विकः।। ।।प्रयच्छति।। ।।द्विगुणार्थं द्विगुणमिति द्वैगुणिक इत्यत्र गौणमर्थ उक्तेन चात्र द्विगुणं प्रयच्छति किं तर्ह्येकगुणं दत्वा द्विगुणं गृह्णाति अत एवात्रर्द्धं भवतीति तस्माद्द्विगुणार्थं द्विगुणशब्दो वर्त्तयितव्यः वार्धुषिक इति वृद्ध्यर्थं धने व

।।परिमुखंच।। ।।परिमुखशब्दाद्द्वितीयासमर्थाद्वर्त्तत इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति· परिमुखं वर्त्तते पारिमुखिकः सेवकः चकारोनुक्तसमुच्चयार्थः पारिपार्श्विकः।। ।।प्रयच्छतिगर्ह्यं।। ।।तदिति द्वितीयासमर्थात्प्रयच्छतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति यत्तद्द्वितीयासमर्थं गर्ह्यं चेत्तद्भवति· द्विगुणार्थं द्विगुणं तत्प्रयच्छति द्वैगुणिकः वृद्धेर्वृधुषिभावश्च· वार्धुषिकः प्रकृत्यन्तरं वा वृद्धिपर्यायो वृधुषिशब्दः गर्ह्यमिति किं द्विगुणं प्रयच्छत्यधमर्णाः।। ।।कुसीददशैकादशात्ष्ठन्ष्ठचौ।। ।।प्रयच्छति गर्ह्यमित्येव कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं एकादशार्थादशदशैकादशशब्देनोच्यते कुसीददशैकादशशब्दाभ्यां यथासंख्यं ष्ठन् ष्ठच इत्येतौ प्रत्ययौ भवतः प्रयच्छति गर्ह्यमित्येतस्मिन्विषये ठकोपवादः कुसीदं प्रयच्छति कुसीदिकः कुसीदिकी दशैकादशिकः दशैकादशिकी।। ।।उंछति।। ।।तदिति द्वितीयासमर्थादुंछतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति बदराण्युंछति बादरिकः श्यामाकिकः।। ।।

द्धिशब्दः प्रकृत्यन्तरमेवेति एतच्च वार्धुषिक इत्येतद्वृत्तिविषयमेव नियतविषया अपि हि शब्दा भवन्ति वृद्धिशब्दादनभिधानान्नैव भविष्यतीति तेन वार्धि कइत्यनिष्टप्रसंगो नोद्भावनीयः अथ कथं वार्धुषिः अमरपतवदान्यस्य च वार्धुषेरिति स्वच्छंदत्वाच्च अघयः।। ।।कुसीद।। ।।तदर्थं द्रव्यं कुसीदमिति अत्रापि कुसीदिक इत्युत्तमर्णस्याभिधानमिष्यते न चोत्तमर्णः कुसीदं प्रयच्छति किं तर्ह्यधमर्णाः न च तस्य वृद्धिप्रदानं गर्ह्यं तस्मात्तादर्थ्यात्ताच्छब्द्यमिति भावः एकादशार्थादश दशैकादशशब्देनोच्यत इति तत्रैकादशावयवस्यापि तदर्थे वृत्तिशब्दे वर्तते तैः सामानाधिकरण्ये सति विशेषणसमासः

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

॥रक्षति॥ ॥सामाजिक इति समाजः समूहः समजंत्यस्मिन्निति कृत्वा एवं संनिवेशः॥ ॥शब्ददर्दुरं॥ ॥शब्दं करोतीति कर्तरि इह ज्ञाने वर्त्तते प्रकृत्यादिविभागेन जानातीत्यर्थः एतच्चाभिधानस्वाभाव्याल्लभ्यते इह न भवति शब्दं करोति स्वर इति पात्रविशेषवाची दर्दुरशब्दः अत्र तु करणशब्दः संबध्यते॥ ॥पक्षिमत्स्य॥ ॥स्वरूपस्य तद्विशेषाणां पर्यायाणां च ग्रहणमिष्यते इति अत्र हेतुः स्वं रूपमित्यत्रैवोक्तः मात्स्य

॥रक्षति॥ ॥तदिति द्वितीयासमर्थादिति रक्षतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति समाजं रक्षति सामाजिकः सांनिवेशिकः॥ ॥शब्ददर्दुरं करोति॥ ॥तदिति द्वितीयासमर्थाभ्यां शब्ददर्दुरशब्दाभ्यां करोतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति शब्दं करोति शाब्दिको वैयाकरणः दार्दुरिकः कुंभकारः॥ ॥पक्षिमत्स्यमृगान्हंति॥ ॥तदित्येव पक्ष्यादिभ्यो द्वितीयासमर्थेभ्यो हंतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति स्वरूपस्य पर्यायाणां तद्विशेषाणां च ग्रहणमिष्यते· पक्षिणो हंति पाक्षिकः शाकुनिकः मायूरिकः तैत्तिरिकः मत्स्य· मात्सिकः मैनिकः शाफरिकः शाकुलिकः मृग· मार्गिकः हारिणिकः सौकरिकः सारंगिकः॥ ५ ॥ ॥

कइति लुप्यति य्येति यलोपो न भवति मत्स्यस्य स्वामिति परिगणनात् हारिणिकः सौकरिक इति अत्र मृगपर्यायस्योदाहरणं किमिति न प्रदर्शितं यथा पूर्वयोः द्वावपि येते तस्य द्विशेषो अरण्याश्च तुष्पादो मृगाः उच्यते हरिणपर्यायोऽपि मृगशब्दोस्तीति तदर्थे च यथा हारिणिकः इति पर्यायोदाहरणं॥ ५ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का·प८०४
१४९

॥परिपंथं॥ ॥तदिति द्वितीयासमर्थादिति परिपंथशब्दः परिमुखशब्दवदव्ययीभावः तत्पुरुषो वा तत्राव्ययीभावपक्षे क्रियाविशेषणत्वात्तिष्ठतेरकर्मक
त्वेपि परिपंथस्य कर्मत्वं तत्पुरुषे तु परितः पंथाः परिपंथ इति कालभावाध्वगंतव्याः इति वचनात्कर्मता अधिकारसामर्थ्यादिति अन्ये पारिपंथिकश्चौर इति
यः पंथानं वर्जयित्वा तिष्ठति यो वा पंथानं व्याप्य तिष्ठति स एवमुच्यते लौकिकवचनप्रदर्शनार्थमिति परिपंथं तिष्ठतीत्येतल्लौकिकं वाक्यं तत्प्रदर्शना
र्थं द्वितीयोच्चारणं॥ अथैवमर्थे द्वितीयोच्चारणे किं सिद्धं भवतीत्याह परिपथपर्याय इत्यादि किमनेन ज्ञापनेन प्रयोजनमित्याह सविषयांतरेपीति अस्त्येव तु आ

॥परिपंथं च तिष्ठति॥ ॥परिपंथशब्दात् द्वितीयासमर्थात्तिष्ठतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति परिपंथं तिष्ठति पा
रिपंथिकश्चौरः चकारो भिन्नक्रमः प्रत्ययार्थं समुच्चिनोति परिपंथं हंति पारिपंथिकः समर्थविभक्तिस्वरूपं पुनर्द्वितीयो
च्चारणं लौकिकवाक्यप्रदर्शनार्थं परिपथपर्यायः परिपंथशब्दोस्तीति ज्ञापयति सविषयांतरेपि प्रयोक्तव्यः॥ ॥माथो
त्तरपदपदव्यनुपदं धावति॥ ॥माथोत्तरपदात्प्रातिपदिकात्पदवीअनुपद इत्येताभ्यां च धावतीत्येतस्मिन्नर्थे ठक्प्रत्य
यो भवति दंडमाथं धावति दांडमाथिकः पदवीं पादविकः अनुपदमानुपदिकः माथशब्दः पथिपर्यायः॥ ॥आक्रं
दाट्ठञ्च॥ ॥आक्रंद इत्येतस्मिन्निति आक्रंदो देशः अथवा आक्रंद्यते इत्याक्रंदः आर्त्तायनमुच्यते विशेषाभावादुभय
स्यापि ग्रहणं आक्रंदशब्दात् द्वितीयासमर्थाद्धावतीत्येतस्मिन्नर्थे ठञ्प्रत्ययो भवति चकारात् ठक् स्वरे विशेषः रामः
आक्रंदं धावति आक्रंदिकः आक्रांदिकः॥ ॥छ॥ ॥

पने प्रत्ययसंनियोगेन परिपंथशब्दस्य निपातनं विज्ञायेत ततश्च ततोन्यत्र प्रयोगो न स्यात्॥ ॥माथोत्तर॥ ॥माथशब्दः पथिपर्याय इति मथ्यते प्राप्यते ए १४९
तभिरिति कृत्वा दंडाकारो माथो दंडमाथः॥ ॥आक्रंदात्॥ ॥आक्रंदो देश इति दुःखितानां रोदनस्थानमार्त्तायनमुच्यते इति आर्त्तैरीयते प्राप्यत
इति कृत्वा आर्त्तायनमार्त्तानां त्राणमाक्रंद उच्यते आक्रंद्यते आर्त्तैरिति कृत्वा॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

।।परोत्तरा।।।पदग्रहणेन स्वरूपंगृह्यते तेन मुक्तिरिः तमुत्तरपदस्य परत्वाव्यभिचारात् अत एवाह पदशब्द उत्तरपदस्येति।। ।।प्रतिकंठा। ।।कंठं कंठं प्रतिप्रति कंठं यथार्थ पदार्थमिति वीप्सायामव्ययीभावः आभिमुख्ये वा लक्षणेनाभिप्रति आभिमुख्य इति यणु प्रतिगान४ कंठं प्रतिकंठ इति प्रादि समासः तस्य ग्रह

।।परोत्तमपदं गृह्णाति।। ।।पदशब्दउत्तरपदं यस्य तस्मात् प्रादेरपदान्तादिति द्वितीयासमर्थाद्गृह्णातीत्येतस्मिन्नर्थे ठक् प्रत्य

यो भवति। पूर्वपदं गृह्णाति पौर्वपदिकः औत्तरपदिकः पदान्तादिति नोक्तं बहुपूर्वान्माभूत।। ।।प्रतिकंठार्थललामं च।।

।।प्रतिकंठार्थललामशब्देभ्यस्तदिति द्वितीयासमर्थेभ्यो गृह्णातीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। प्रतिकंठं गृह्णाति प्राति

कंठिकः आर्थिकः४ लालामिकः।। ।।धर्मं चरति।। ।।धर्मशब्दान्नदिति द्वितीयासमर्थाच्चरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भव

ति चरतिरासेवायां नानुष्ठानमात्रे। धर्मं चरति धार्मिकः अधर्माच्चेति वक्तव्यं आधर्मिकः।। ।।प्रतिपथमेति ठंश्च।। ।।प्रतिप

थशब्दान्नदिति द्वितीयासमर्थादेतीत्येतस्मिन्नर्थे ठन् प्रत्ययो भवति चकारादृक् प्रतिपथमेति प्रतिपथिकः प्रातिपथिकः

।। ६ ।। श्री४।। ।।छ।। ।।छ।। ।।छ।। ।।

णांनभवत्यनभिधानात्।। ।।धर्मं।। ।।अधर्माच्चेति वक्तव्यमिति ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधाद्वचनं आधर्मिक इति नञ्त्रयो

ष्विवचनः पापाचार इत्यर्थः।। ।।प्रतिपथं।। ।।प्रतिपथं।। ।।प्रतिपथमिति पूर्ववद्वीप्सायामव्ययीभावः ऋक्पूरब्धूरित्यकारः समासांतः।। ६।।

।। श्रीरामकृष्णाय नमो नमः४।। ।।छ।। ।।छ।। ।।छ।। ।।

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४ ॥समवायान्॥ ॥समवायः समूह उच्यत इति समवयन्ति तस्मिन्निति हृत्वा न संप्रधारणेति समवसर्वस्येत्याः संप्रधारणापामपि प्रयोगोऽस्तीति मन्यते
१५० समागच्छन्ति एकदेशीभवतीत्यर्थ इति तत्र गुणाभूतसमागमापेक्षया समवायमिति द्वितीयानिर्देशः लोके तु प्रायेण समवायप्रपुरुषे तेष्वेव गुणाः समव
यन्तीति॥ ॥परिषदः॥ ॥परितः सीदन्त्यस्यामिति परिषत् संपदादित्वात् क्विप् करणे सदिरप्रतेरिति षत्वं॥ ॥संज्ञायां॥ ॥संज्ञानं संज्ञा प्रतीतिः
प्रसिद्धिरित्यर्थः अभिधेयनियमार्थमिति अभिधेये सेवकविशेषे भिक्षुविशेषे च नियमस्तत्रैव यथा स्यात् अन्यत्र मा भूदित्यर्थः न ह्यर्थमिति लाला

॥समवायान्समवैति॥ ॥समवायशब्देभ्यः द्वितीयासमर्थेभ्यः समवैतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति॥
समवायः समूहः बहुवचनं स्वरूपविधिनिरासार्थं। समवैति समागच्छति एकदेशीभवतीत्यर्थः समवायं
समवैति सामवायिकः सामाजिकः सामूहिकः सान्निवेशिकः॥ ॥परिषदो ण्यः॥ ॥परिषच्छब्दाण्ण्यप्रत्ययो भवति समवायात्
समवैतीत्यस्मिन्विषये ठकोऽपवादः परिषदं समवैति पारिषद्यः॥ ॥सेनाया वा॥ ॥सेनाशब्दाण्ण्यप्रत्ययो भवति सम
वायात्समवैतीत्येतस्मिन्विषये ठकोऽपवादः पक्षे सोऽपि भवति सेनां समवैति सैन्यः सैनिकः॥ ॥संज्ञायां ललाटकुक्कुट्यौ प
श्यति॥ ॥ललाटकुक्कुटीशब्दाभ्यां द्वितीयासमर्थाभ्यां पश्यतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति संज्ञायां विषये सं
ज्ञाग्रहणमभिधेयनियमार्थं न त्वयर्थः ललाटं पश्यति लालाटिकः सेवकः कौक्कुटिको भिक्षुः सर्वविषयवेल्यो ललाटं दूरेदृष्ट्य
नेतदर्शनेन सेवकस्य स्वामिनं प्रत्यनुपश्लेषः कार्येष्वनुपस्थायित्वं लक्ष्यते लालाटिकः सेवकः स्वामिनः कार्येषु नोपतिष्ठत इत्य
र्थः कुक्कुटीशब्देनापि कुक्कुटीपातो लक्ष्यते देशस्याल्पता यो हि भिक्षुर्विक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य गच्छति स

टिककौक्कुटिकशब्दयोर्डित्यादिवद्रूढत्वात् तन्निपातेन वर्तते यावद्योगं वर्तते योगेऽपि ललाटकुक्कुटीदर्शनमात्रेण ठञ्न भवतीत्येतावत्संज्ञा
ग्रहणेन प्रसिद्ध्युपसंग्रहार्थेन क्षिपतेयाद्दृशस्तु योगोऽत्र विवक्षितस्तं दर्शयति सर्वविषयवेल्यो दृश्यादिरनुपश्लेषस्य विवरणं कार्येष्वनुपस्थायित्वं
मिति दूरे स्थितो ललाटमेव पश्यति न पुनः कार्येषूपतिष्ठत इत्यर्थः कुक्कुटीयातो लक्ष्यत इति यावति देशे कुक्कुटीपतनं तियावन्तं देशं समतीत्य निपतितं
समर्थास्तदेशो लक्ष्यत इत्यर्थः अनेनापि प्रकारेण दृष्ट्याल्पत्वं लक्ष्यते कुक्कुटीपतनं तु मात्रप्रमदिस्वाह देशस्याल्पत्वे नेति स्तत्रैव दृष्टिं पातयेद्यो हि भिक्षुरिति भि
क्षुः समाप्ती॥ ॥छ॥ ॥ ए॰ ९ १५०

उच्यते कौक्कुटिक इति तत्र यदभि
धेयनियमः संज्ञाग्रहणेन क्रियते॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥तस्य धर्म्यं॥ ॥धर्मानुवृत्त आचारस्ततो न येतं धर्म्यं धर्मपथ्यर्थन्यायादनपेत इति वचनात् दौवारिकमिति द्वारादीनां चेति ह्विप्रतिषेधः ऐजागमश्च॥
॥ऋतोञ्॥ ॥होतुर्धर्म्यं होत्रमिति होतृशब्दस्य महिष्यादिषु पाठाद्वियपाठोयं योनुर्धर्म्यमिति तु पाठः॥ अपरस्त्वाह यजमानस्य होतृवर्त्यादितिस्थिरवनस्य

॥तस्य धर्म्यं॥ ॥तस्येति षष्ठीसमर्थाद्धर्म्यमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति धर्म्यं न्याय्यमाचारयुक्तमित्यर्थः शु
ल्कशालाया धर्म्यं शौल्कशालिकं आतरगारिकं आपणिकं गौल्मिकं॥ आन्तरिकं। गोष्ठिकं। दौवारिकं॥
॥अण्महिष्यादिभ्यः॥ ॥महिष्यादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति तस्य धर्म्यमित्येतस्मिन्विषये ठकोऽप
वादः महिष्या धर्म्यं माहिषं प्राजावतं॰ महिषी प्रजावती॰ प्रलेपिका॰ विलेपिका॰ अनुलेपिका॰ पुरोहितः म
णिपादः अनुचारक होतृ यजमान॥ ॥ऋतोञ्॥ ॥ऋवर्णान्तात्प्रातिपदिकादञ् प्रत्ययो भवति तस्य धर्म्य
मित्येतस्मिन्विषये ठकोऽपवादः होतुर्धर्म्यं हौत्रं औद्गात्रं॰ नराच्चेति वक्तव्यं नरस्य धर्म्या नारी॰ विशसितुरिड्लो
पश्च॰ विशसितुर्धर्म्यं वैशस्तं॰ विभाजयितुर्णिलोपश्च॰ विभाजयितुर्धर्म्यं वैभाजित्रं॥ ॥७॥ ॥

होतृशब्दस्य महिष्यादिषु पाठः अयं तु क्रियाशब्द इदानीं इति नराच्चेति वक्तव्यमिति नृशब्दात्त्वञो वा जिनारमिति सिद्धे नरशब्दात् कोनि
वृत्त्यर्थं वचनमनभिधानं तु दर्शनं॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का·प४·४ ॥अवक्रयः॥ ॥अवक्रीयतेनेनेत्यवक्रयः इति क्रयो नाम स्वद्रव्यत्यागेन परद्रव्यस्वीकरणं तस्यावसमत्वमव शब्दो द्योतयति वा णिज्यार्थे तैल धान्यादि
१५१ कं देशाद्देशान्तरं नयतां आमिनशुल्कस्थाने प्रतिभारमेतावद्देयमिति तद्देशाधिपतिना यत्कल्पितं सोवक्रयः पिण्डक इति चोच्यते तत्र स्वद्रव्यमेव दत्त्वा स्व
द्रव्यमेव स्वीक्रियत इत्ययमवक्रयो भवति न मुख्यः ॥ नन्वित्यादि अवक्रयस्याप्यनादिप्रवृत्तत्वादिति भावः लोकपीडयेति अर्थलोभेन धर्मातिक्रमेणाधि

॥अवक्रयः॥ ॥तस्येत्येव षष्ठीसमर्थादवक्रय इत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति। अवक्रीयतेनेनेत्यवक्रयः पिण्डक उच्यते·
शुल्कशालायाः अवक्रयः शौल्कशालिकः आकरिकः आपणिकः गौल्मिकः नन्ववक्रयोपि धर्म्यमेव नैतदस्ति लोक
पीडया धर्मातिक्रमेणाप्यवक्रयो भवति॥ ॥तदस्य पण्यं॥ ॥तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्त
त्प्रथमासमर्थं पण्यं चेत्तद्भवति· अपूपाः पण्यमस्य आपूपिकः शाष्कुलिकः मौदकिकः पण्यमिति विशेषणं किं त्वावे
तं भूतमिति यत्पण्यशब्देन प्रयुज्यते॥ ॥लवणाट्ठञ्॥ ॥लवणशब्दाट्ठञ्प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन्विषये ठको
पवादः स्वरे विशेषः लवणं पण्यमस्य लावणिकः॥ ॥किशरादिभ्यः ष्ठन्॥ ॥किशर इत्येवमादिभ्यः प्रातिपदिकेभ्यस्तदस्य प
ण्यमित्येतस्मिन्विषये ष्ठन्प्रत्ययो भवति ठकोपवादः किशरादयो गन्धविशेषवाचिनः किशरं पण्यमस्य किशरिकः किशरिकी नद
रिकः नदरिकी· किशर नरद नलद स्थगल· तगर गुग्गुलु उशीर हरिद्रा हरिद्रु पर्णी॥ ॥ अ॥ ॥ ७॥ ॥ ॥ राम०

मपीत्येतत्तत्वं दर्शयति॥ ॥तदस्य पण्यं॥ ॥पण्यमिति विशेषणात् मित्यादिष्वयो विशेषणमुपाभिर्वैपणीयते द्योत्येतस्मिंस्तेन भवितव्यं तद्यथामा १५१
सादेवता इन्द्रो देवतास्यैन्द्रः स्थालीपाक इति देवतात्वं हत्वा वन्तर्भवति तद्वदत्रापि पण्यत्वमन्तर्भवतीति नात्रापूर्वं किंचित्॥ ॥किशरादि॥ ॥
किशरादयो गन्धविशेषवचना इत्युक्ते तत्र गन्धात्मिन इतीति यथा॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥शलालुनः॥ ॥शलालुक इति इसुसुक्तान्तात्कः॥ ॥शिल्पं॥ ॥कौशलमिति क्रियाभ्यासपूर्वको ज्ञानविशेषः मृदङ्गवादनं शिल्पमस्येति मृदङ्गो
वाद्यते येन तन्मृदङ्गवादनं शिल्पं भावसाधनस्य तु तस्यासामानाधिकरण्यं मृदङ्गवादनविषये शिल्पमस्येत्यर्थः मार्दङ्गिक इति ननु मृदङ्गवादनं शिल्पमस्येति वि
ग्रहः कृतः तत्र मार्दङ्गवादनिक इति भवितव्यं तत्राह मृदङ्गोपादिमृदङ्गवादनशब्दात्तु प्रत्ययो न भवत्यनभिधानात्। किन्तु एवमिति टञ् इत्येषोऽपि मृदङ्गशब्दादेव भवति

शलालुनोऽन्यतरस्यां॥ ॥शलालुशब्दादन्यतरस्यां ठक्प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन्विषये ठकोऽपवादः पक्षे सोऽपि भवति। शला
लुशब्दो गन्धविशेषवचनः शलालु पण्यमस्य शलालुकः॥ शलालुकी। शालालुकः शालालुकी॥ ॥शिल्पं॥ ॥तदिति प्रथमासम
र्थविभक्तिरस्येति च षष्ठ्यर्थोऽनुवर्त्तते प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं शिल्पं चेत्तद्भवति। शिल्पं कौश
लं मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः पाणविकः वैणिकः मृदङ्गवादने वर्त्तमानो मृदङ्गशब्दः प्रत्ययमुत्पादयति शिल्पं तद्धितवृत्ता
वन्तर्भवति॥ ॥मड्डुकझर्झरादणन्यतरस्यां॥ ॥मड्डुकझर्झरशब्दाभ्यामन्यतरस्यामण्प्रत्ययो भवति तदस्य शिल्पमित्येतस्मिन्विषये
ठकोऽपवादः पक्षे सोऽपि भवति मड्डुकवादनं शिल्पमस्य माड्डुकः माड्डुकिकः झार्झरः झार्झरिकः॥ ॥प्रहरणं॥ ॥तदस्येत्येव तदि
ति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्रहरणं चेत्तद्भवति। असिः प्रहरणमस्य आसिकः प्रासिकः चाक्रि
कः धानुष्कः॥ ॥परश्वधाट्ठञ्च॥ ॥परश्वधशब्दाट्ठञ्प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन्विषये चकाराट्ठक् च। स्वरे विशेषः

परश्वधः प्रहरणमस्य पारश्वधिकः॥ ॥८॥ ॥७॥ ॥

अत एवानभिधानान्मृदङ्गनिष्पादनं शिल्पमस्य मार्दङ्गिकः कुम्भकार इत्यत्र न भवति॥ ॥मड्डुकझर्झरात्॥ ॥अयमेव निर्देशो ज्ञापयति तद्धाद्धन्त
निम्नो मृदङ्गादिभ्यः प्रत्ययः इति नहि मुख्येन मड्डुकझर्झरयोः शिल्पेन सामानाधिकरण्यमुपपद्यते॥ ॥प्रहरणं॥ ॥प्रहरणमायुधं प्रक्षिप्यते येनेति कृत्वा धानु
ष्क इति पूर्ववत्कादेशः इणः षः इति विसर्जनीयस्य षत्वं॥ ॥परश्वधात्॥ ॥परश्वधः परशुः ८ ॥ ॥७ ७॥ ॥७॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ६॰ ४ ॥शक्तियष्ट्योः॥ ॥शक्यते नयाप्रहर्तुमिति शक्तिः यष्टिशब्दो व्युत्पन्नं प्रातिपदिकं किमर्थमीकगुच्यते नकारो गोच्यते कारप्रसिद्धिः शक्तियष्टिशब्दाभ्यां वाक्या
दिर्दीर्घत्वाभ्यां लिंगविशिष्टपरिभाषया कः किं कृते शाक्तीको याष्टीक इति सिद्धं न सिध्यति केऽणः इति ह्रस्वत्वं प्राप्नोति· अपि च ङिभावादीप्तकः न स्याद्वषये दीर्घ
१५२ स्य शके वनास्ति एवं तर्हि इकारो गोच्यते इकारेपि हि सवर्णे दीर्घत्वे सिद्ध यस्येति लोपः इकारो वा स्याम सामर्थ्यात् भविष्यति· पदस्यावग्रहनिर्दिष्ट इकारस्य प्र
योजनं एवं तर्हि सूत्रारंभो निष्फलः स्यात् पूर्वसूत्रविहितेन ठकैवापत्यहनिर्दिष्टेः सिद्धत्वात् नानर्थको वा मा निर्हस्वर्थत्वात् एव मपि प्रयत्नेन अनर्थकं शक्ति
यष्ट्योरिति तावद्ठकं मठकप्रकृतं तस्य सपुनर्विधानं वा कानिर्हस्वर्थं भविष्यति किमिक के विधानेन तद्विधानात्तु यस्येति लोपेन भविष्यति यथैव तर्हि यस्ये

॥शक्तियष्ट्योरीकक्॥ ॥शक्तियष्टिशब्दाभ्यामीकक् प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन्विषये ठकोपवादः
शक्तिः प्रहरणमस्य शाक्तीकः याष्टीकः॥ शाक्तीकी॥ याष्टीकी॥ ॥अस्तिनास्तिदिष्टं मतिः॥ ॥तदस्येत्येव तदि
ति प्रथमासमर्थेभ्योस्तिनास्तिदिष्टशब्देभ्योऽस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं मतिश्चेत्सा भवति· अ
स्तिमतिरस्य आस्तिकः नास्तिकः दैष्टिकः न च मतिसत्तामात्रे प्रत्यय इष्यते किं तर्हि परलोकोऽस्तीति यस्य मतिरस्ति स
आस्तिकः तद्विपरीतो नास्तिकः प्रमाणानुपातिनी यस्य मतिः स दैष्टिकः तदेतदभिधानशक्तिस्वाभाव्याल्लभ्यते· अ
स्तिनास्तिशब्दौ निपातौ वचनसामर्थ्याद्वा आख्यातात्काच्च प्रत्ययः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

ति लोपेन भवति एवं सवर्णदीर्घत्वमपि न स्यात् एवं विधिप्रत्युपदेशो नर्थकः सविधिर्बाध्यते यस्तु विधेर्निमित्तमेव नासौ बाध्यते यस्येति लोपं च प्रति नि राम
कारोऽत्राश्रयणमनर्थकं सवर्णदीर्घस्य पुनर्निमित्तमेव॥ ॥अस्ति॥ ॥यद्यस्ति मतिर्यस्य स आस्तिकः चौरेपि प्राप्नोति तस्यापि मतिसद्भावात् तत्राह
न चेति तद्विपरीत इति परलोको नास्तीति मतिर्यस्य स नास्तिको लौकायतिकः न च चेतनः पदार्थः सत्तामात्रे प्रत्ययस्यानिष्टत्वात् दिष्टं दैवं तद्विषया १५२
मतिर्यस्य स दैष्टिकः ह्रत्रावपि प्रमाणानुपातिनी मतिर्यस्यास्ति दैवचित् प्रमीयते तेभ्यो दैवमिति प्रमाणशब्देनेतिहासपुराणादि विवक्षितं अस्ति नास्ति
शब्दौ निपातौ विभक्तिप्रतिरूपकौ अधिकारेण बाध्यत इति भावः वचनसामर्थ्याद्धातोरप्युपगम्यवादः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥शीलं॥ ॥शीलं स्वभाव इति शीलम् ते पुनः पुनः क्रियते नेनेति कृत्वात्र अपूपभक्षणं शीलमस्येति शील विषये शीलत्वमारोप्य सामानाधिकरण्ये
न षष्ठ्यर्थे शः भक्षणं क्रियेत्यादि शीलं तावद्रूपान्तत्वादंतर्भवति क्रियाविषयत्वाच्च शीलस्य क्रियार्थं तर्भवति स्वभावाच्च भक्षणं क्रियान निष्पादनादिको॥
छत्रादिभ्यः॥ ॥छत्रशीलतां शिष्यस्य दर्शयितुमाह छादनादावरणाच्छत्रमिति छादयतेः ष्ट्रन् इरस्मन्त्रन्क्किषु चेति ह्रस्वः छत्र शीलः इति छत्रसहचरितो

॥शीलं॥ ॥तदस्येत्येव तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं शीलं चेत्तद्भव
ति॰ शीलं स्वभावः अपूपभक्षणं शीलमस्य आपूपिकः शाष्कुलिकः मौदकिकः भक्षणक्रियातद्विषयं वा शी
लं तद्धितवृत्तावंतर्भवति॥ ॥छत्रादिभ्यो णः॥ ॥छत्र इत्येवमादिभ्यः प्रातिपदिकेभ्यो णः प्रत्ययो भवति तद
स्य शीलमित्येतस्मिन्विषये ठकोऽपवादः छादनादावरणाच्छत्रं गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तश्छ
त्रशीलः शिष्यश्छात्रः स्था शब्दो त्र पर्यंत उपसर्गपूर्वोऽयं त्यते आस्था॰ संस्था॰ अवस्थेति॰ छत्र शिक्षा भिक्षा प्र
रोह॰ स्था॰ बुभुक्षा चुरा तितिक्षा॰ उपस्थान॰ कृषि कर्मन् वैर विश्वधा तपस सत्य अन्न तशिका॥ ६॥ ॥

छादनक्रियाशीलमस्येत्यर्थः यदि त्वपूपभक्षणं शीलमस्यापूपिक इतिवत् छत्रधारणं शीलमस्य छात्र इति व्युत्पाद्यते तदा दृष्टान्तेपि प्राप्नोति अभिधान
लाभाभावात्तु तथा नाश्रीयते उपसर्गपूर्वोऽयं स्थान इति तत्स्थानस्यात उपसर्ग इत्यादिना उत्पत्तेः केवलस्य स्था शब्दस्याभावात् केवलस्य तु पाठः सर्वोपस
र्गसंग्रहार्थः चुरा इति पठ्यते तत्र चोरयतेरपि असंश्रुते पुजि इति पुजिविप्रामेषा देव निपातनात् कारो गुणाभावश्च न च युचो लक्षं बाधः चोरणे सापि भवति॥८॥

॥ छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४
१५३

॥कर्माध्ययने॥ ॥कर्मक्रियायातत्र स्खलितमपचाररूपं विवक्षितं न तच्छीलं कर्म तेनेह न भवति अध्ययने जयो वृत्तोऽस्येति एतच्चाभिधानस्वाभाव्या
ल्लभ्यते तदेतद्दर्शयति यस्याध्ययने नियुक्तस्येत्यादि एकमन्यदित्यादि सम्यक्पाठापेक्षया॥ ॥बह्वच॥ ॥स्वरभेदे यथा सम्भवति न वर्णभेदः एवं स्याहरुदा
त्तेकर्तृभ्य इति उदाहरणं सम्यक्स्वरस्योपलक्षणं अनुदात्तग्रहणं च सम्यक्स्वरस्य॥ ॥हितं॥ ॥हितंभक्षा इति षष्ठ्योः पर्यवसानेन संबन्धः अत्र

॥कर्माध्ययने वृत्तं॥ ॥तदस्येत्येव तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं कर्म चेद्वृत्त
मध्ययनविषये तद्भवति॰ एकमन्यदध्ययने कर्म वृत्तं जातं समुत्पन्नमस्य ऐकान्यिकः एवं द्वैयन्यिकः त्रैयन्यिकः + स्खलनमस्य ऐकान्यिकः
द्वैयन्यिकः त्रैयन्यिकः एकमन्यदिति विग्रहस्य तद्धितार्थ इति समासः ततष्ठक्प्रत्ययो भवति॰ अध्ययने कर्म वृत्तमित्येतत्स
र्वं तद्धितवृत्त्यावगतं भवति॰ यस्याध्ययने नियुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूपमेकं ॥ ॥बह्वच्पूर्वपदाट्ठच्॥
॥बह्वच्पूर्वपदं यस्य तस्मात् बह्वच्पूर्वपदात्तस्मात् प्रातिपदिकाट्ठच्प्रत्ययो भवति तदस्य कर्माध्ययने वृत्तमित्येतस्मिन्विषये ठकोऽपवादः
द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः त्रयोदशान्यिकः चतुर्दशान्यिकः चतुर्दशापपाठा अस्य जाता इत्यर्थः
उदात्तेकर्तृव्ये योऽनुदात्तं करोतीत्यर्थः अतोऽन्यत्वं करोषीति हि॥ ॥हितं भक्षाः॥ ॥तदस्येत्येव तदिति प्रथमासमर्थादस्येति ष
ष्ठ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं हितं चेत्तद्भवति तच्च भक्षाः ननु च हितयोगे चतुर्थ्या भवितव्यं तत्र कथं षष्ठ्यर्थे प्रत्ययो वि
धीयते एवं तर्हि सामर्थ्याद्भक्षिक्रियापेक्षया भविष्यति॰ अपूपभक्षणं हितमस्मै आपूपिकः शाष्कुलिकः मौदकिकः हितार्थः

हितमिति सामान्योपक्रमत्वादेकवचनं नपुंसकत्वं च भक्षा इत्यपूपादिविशेषोपसंग्रहानुल्लिंगं बहुवचनं च अत एवाह यत्तत्प्रथमासमर्थं हितं चे
त्तद्भवति तच्च भक्षा इति एवं नेहापीति एवं च चतुर्थ्यर्थे प्रत्ययो न षष्ठ्यर्थे कथं तर्हि पूर्वमुक्तमस्येति षष्ठ्यर्थे इति एवं तर्ह्यधिकारमात्रापेक्षया तदुक्तं अपर आ
ह हितं भक्षास्तदस्मा इति सूत्रच्छेदः ततोऽरीयते नियुक्तमिति तस्मा एवेति हितार्थः क्रियाचेति हितार्थस्तावदुपात्तत्वादन्तर्भवति भक्षणक्रियापेक्षया
दिशा दानां लक्षणया तत्र वृत्तेरन्तर्भवति॥ ॥

एम॰
१५३

© Dharmartha Trust J&K. Digitized by eGangotri

॥तदस्मै॥ ॥अव्यभिचारो नियोगस्तस्मिन्नर्थे नियुक्तमिति क्रियाविशेषणत्वात्कर्मणि द्वितीया अग्रभोजनमस्मै नियुक्तं दीयत इति यदग्र-
तो भोजनं दीयते तदस्मा एवेत्येष नियोगार्थः तेन कदाचिल्लोपेऽपि न नियुक्ततापहानिः केचिदिति अत्र पक्षे नियुक्तमित्यस्य संयोगे द्वितीया॥ ॥
श्राणा॥ ॥श्राणेति कोक्तः शीरह विकोरेव निपातनाच्छ भावाभावे संयोगादेरातो धातोरिति निष्ठातकारस्य नकारः श्राणा यवागूः मांसमिश्र ओद-

॥तदस्मै दीयते नियुक्तं॥ ॥तदिति प्रथमासमर्थादस्मा इति चतुर्थ्यर्थे ठक्प्रत्ययो भवति यत्तत्प्रथमासमर्थं तत्
चेद्दीयते नियुक्तं नियोगेनाव्यभिचारेण दीयत इत्यर्थः अव्यभिचारो नियोगः अग्रभोजनमस्मै नियुक्तं दीयते आग्रभो-
जनिकः आपूपिकः शाष्कुलिकः केचित्तु नियुक्तं नित्यमित्याहुः अपूपा नित्यमस्मै दीयन्ते आपूपिकः॥ ॥
श्राणामांसौदनाट्टिठन्॥ ॥श्राणामांसौदनशब्दाभ्यां टिठन्प्रत्ययो भवति तदस्मै दीयते नियुक्तमित्येतस्मिन्वि-
षये ठकोऽपवादः इकार उच्चारणार्थः टकारो ङीबर्थः श्राणा नियुक्तमस्मै दीयते श्राणिकः श्राणिकी मांसौ-
दनिकः मांसौदनिकी ठञेव कस्मान्नोक्तः नत्वत्र ठञ्ठिठनोर्वा विशेषोऽस्ति मांसौदनग्रहणं संघातविग्र-
हीतार्थं केचिदिच्छन्ति तत्र वृद्ध्यभावे विशेषः ओदनिकः ओदनिकी १० ॥

नो मांसौदनः ठञेव कस्मान्नोक्त इति लाघवात्स एव युक्तो वक्तुमिति भावः नत्वत्रेति ठञ्प्येते प्रकृतिरेवमेव वृद्ध्येयोपि ह्रि मिमित्यस्येति खुंव
ड्डव प्रतिषेधः स टिठन्यपि न कोयथाया इति भवति मांसौदनग्रहणमित्यादि स्वेव वक्तव्यौ ठनो वचनमेवात्र प्रमाणमिति तेषां भावः १०

॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ २॰४ ॥भक्ताद्णन्॥ ॥भजेः क्तः भक्तमन्नं॥ ॥तत्रनियुक्तः॥ ॥नियुक्तमितिप्रकृते पुनर्नियुक्तग्रहणमर्थभेदार्थमेवतमेवार्थभेदं दर्शयति नियुक्तोधि
१५४ कृतइत्यादि किंचप्रकृते नियुक्तग्रहणं प्रकृत्यर्थविशेषणमेवदीयतइत्यस्योपाधिर्नत्विहप्रत्ययार्थत्वेनास्य विज्ञानं तु॥ ॥अध्यायिनि॥ ॥अधीतइत्यध्यायी
आवश्यके णिनिः यस्यादिलक्षणोवा अध्ययनस्ययौ देशकालौ शास्त्रेणप्रतिषिद्धौ तावदेशकालशब्देनोच्येते इति अप्रतिषिद्धाभ्यां देशकालाभ्यामन्यत्वात्

भक्ताद्णन्यतरस्यां॥ ॥भक्तशब्दादणप्रत्ययो भवत्यन्यतरस्यां तदस्मै दीयते नियुक्तमित्येतस्मिन्विषये ठकोपवादः प
क्षे सोपि भवति भक्तमस्मै दीयते भाक्तः भाक्तिकः॥ ॥तत्र नियुक्तः॥ ॥तत्रेति सप्तमीसमर्थान्नियुक्त इत्येतस्मिन्न
र्थे ठक् प्रत्ययो भवति नियुक्तोधिकृतो व्यापारितइत्यर्थः शुल्कशालायां नियुक्तः शौल्कशालिकः आकरिकः
आपणिकः दौवारिकः॥ ॥अगारान्ताट्ठन्॥ ॥अगारशब्दान्तात्प्रातिपदिकाट्ठन्प्रत्ययो भवति तत्र नियुक्त
इत्येतस्मिन्विषये ठकोपवादः देवागारे नियुक्तः देवागारिकः भाण्डागारिकः॥ ॥अध्यायिन्यदेशकालात्॥
॥तत्रेत्येव सप्तमीसमर्थाद्देशवाचिनः कालवाचिनश्च प्रातिपदिकादध्यायिन्यभिधेये ठक्प्रत्ययो भवति।
अध्ययनस्ययौ देशकालौ शास्त्रेणप्रतिषिद्धौ तावदेशकालशब्देनोच्येते तत इदं प्रत्ययविधानं श्मशानेधीते
श्माशानिकः चातुष्पथिकः अकालात् चतुर्दश्यामधीते चातुर्दशिकः आमावास्यिकः अदेशकालादितिकिं

पुंदासवत्स्नात्रमस्यास्पर्शनीयवत्तथ्याश्च द्वादिप्रतिभिर्भक्ष्यमाणामपि लभ्यतमसम भक्ष्यामिसुच्यतेस्यानध्यायेपि चण्डालोस्पृश्य इत्युच्यते अप्रति एका॰
षिद्धाभ्यां भक्ष्यस्वरूपेणाभ्यामसत्वात् तत्र हि श्मशानचतुर्दश्योः स्वरूपेणादेशकालत्वेव संतानप्रतिषिद्धाभ्यां देशकालाभ्यामन्यत्वाददेशका १५४
लशब्देनोच्येते अध्ययनस्येति तदध्यायिनाप्रत्ययार्थेनासंनिधापितत्वाल्लभ्यते॥ ॥

॥कठिनांत॥ ॥व्यवहृतिः संभवतिपरिणामसमानार्थः आह क्रियाव्यवहारयोः समर्थयोरीति अस्ति विवादे व्यवहारे पराजित इति अस्ति विशेषे शलाकां व्यवहरतीति अस्ति क्रियातत्वेऽस इह च इमस समूहणं तद्धितस्वभावादित्याह व्यवहार क्रियातत्वमिति यत्र देशे या क्रिया यथानुष्ठेया तत्र तत्र सा तथा नुष्ठानमित्यर्थः वंशकठिनाव्यवः कठिना अस्मिन् वंशकठिनो देशः वध्रा चर्मविकारः कठिना अस्मिन् वध्रकठिनः आहिताग्न्यादित्वाद्धि शेष्यस्य परनि

॥कठिनांतप्रस्तारसंस्थानेषु व्यवहरति॥ ॥तत्रेत्येव कठिनशब्दांतात्सप्तमीसमर्थात्प्रस्तारसंस्थानशब्दाभ्यां च ठक् प्रत्ययो भवति व्यवहरतीत्येतस्मिन्नर्थे व्यवहारः क्रियातत्वं यथा लौकिको व्यवहार इति वंशकठिने व्यवहरति वांशकठिनिकः वाध्रकठिनिकश्चक्रचरः प्रास्तारिकः सांस्थानिकः॥ ॥निकटे वसति॥ ॥निकटशब्दात्सप्तमीसमर्थाद्वसतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति यस्य शास्त्रतो निकटवासस्तस्यायं विधिः आरण्यकेन भिक्षुणा ग्रामात्क्रोशे वस्तव्यमिति शास्त्रे निकटे वसति नैकटिको भिक्षुः॥ ॥आवसथात्ष्ठल्॥ ॥तत्रेत्येव सप्तमीसमर्थादावसथशब्दाद्वसतीत्येतस्मिन्नर्थे ष्ठल्प्रत्ययो भवति लकारः स्वरार्थः षकारो ङीषर्थः आवसथे वसति आवसथिकः आवसथिकी ठकः पूर्णो वधिः अतः परमसमर्थः प्रत्ययोऽधिक्रियते॥ ॥प्राग्घिताद्यत्॥ ॥तस्मै हितमिति वक्ष्यति प्राग्हितसंशब्दनाद्यानि तदूर्ध्वमनुक्रमिष्यामो यत्प्रत्ययस्तेष्वधिकृतो वेदितव्यः वक्ष्यति तद्वहति रथयुगप्रासंगं रथ्यं वहति रथ्यः युग्यः प्रासंग्यः

पानः चक्रयुक्तेन शकटेन चरतीति चक्रचरः सदेशानक्रमेणाचरन् तत्र तत्रानुष्ठेयक्रियासु विपरीताचरन्नेव मुच्यते संस्थानप्रस्तारो... निवेशो॥ ॥निकटे॥ ॥आरण्यके निगमीयस्य स आरण्यकः अरण्ये मनुष्य इति वुञ् भिक्षुः सन्यासी ग्रामात्क्रोश इति यतश्चाध्वकालनिर्माण इति पंचमी अचयं विशेषोऽभिधानस्वभावाल्लभ्यते॥ ॥आवसथात्॥ ॥आवसन्त्येतस्मिन्निति आवसथः उपसर्गे वसेरित्यथप्रत्ययः ठकः पूर्णो विधिरिति प्राग्वहतीयस्य ठको विधानं पूर्णमित्यर्थः अवधिरिति पाठे पूर्णः प्राप्त इत्यर्थः ११

© Dharmartha Trust J&K. Digitized by eGangotri

का॰प८॰४ ॥ तद्वहति ॥ ॥ ननु य एवार्थो रथं वहतीति स एव रथस्य वोढेति तत्र तस्येदमित्यादिनैव सिद्धं नार्थो रथग्रहणेन नानु तत्रोक्तं रथाङ्गमेवेष्यत इति वोढर्यपि प्रयोगदर्श-
१५५ नादिष्यत इदं तावदिह प्रयोजनं द्वौ रथौ वहति द्विरथ्यः द्विगोर्लुगनपत्य इति प्राग्दीव्यतीयो लुग्भवति तत्र रथसीताहलेभ्यो यद्विधाविति तदन्तविधिः युग्यं च पत्रे इत्येव सिद्धे युग-
ग्रहणं अयुग्यमिति प्रयतोश्चान्तदर्शयति स्वरार्थं निपातनमस्य तु कबन्तत्वादेवस्वरोनस्यात् योगविभागनोयं युगशब्दः इह न भवति युगं वहति ए जा सौ कलि-
द्वापर मेव वेति प्रासङ्गशब्दो वत्सानां दमनकाले स्कन्धे यत्काष्ठमासज्यते तद्वाचीग्स्यते प्रासज्यत इति प्रासङ्गः इह न भवति प्रसङ्गादागतः प्रासङ्गस्तं वहतीति ॥

॥ तद्वहति रथयुगप्रासङ्गम् ॥ ॥ तदिति द्वितीयासमर्थेभ्यो रथयुगप्रासङ्गेभ्यो वहतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति ।
रथं वहति रथ्यः युग्यः प्रासङ्ग्यः ॥ ॥ धुरो यड्ढकौ ॥ ॥ तद्वहतीत्येव धुर इत्येतस्माद्द्वितीयासमर्थाद्वहतीत्येत-
स्मिन्नर्थे यत् ढक् इत्येतौ प्रत्ययौ भवतः धुरं वहति धुर्यः धौरेयः ॥ ॥ खः सर्वधुरात् ॥ ॥ तद्वहतीत्येव सर्वधुराश-
ब्दाद्द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे खः प्रत्ययो भवति । सर्वधुरां वहति सर्वधुरीणः स्त्रीलिङ्गेन्याप्यः सर्वधु-
रादिति प्रातिपदिकमात्रापेक्षो निर्देशः ख इति योगविभागः कर्तव्य उत्तरसंग्रहार्थः दक्षिणाधुरीणः उत्तरधु-
रीणः ॥ ॥ छ ॥ ॥ एभ४

तच्चाभिधानस्वभावाल्लभ्यते ॥ ॥ धुरः ॥ ॥ धूर्धुर्वितिः आजमात इति क्विप् एकल्लोपः धुरं वहतीति धुर्य इति न भकुर्छुरामिति प्रतिषेधाद्धलि चेति दीर्घा- १५५
भावः ढगत्र विधीयते न तु ढक् न धौरेयो भविता पि तु रिति च दृश्यते धौरेयक इति स्वार्थिके कनि भवति इह धुरो ढक् चेति वक्तव्ये चकारात् प्राग्धितीयोप-
द्रविष्यति ॥ ॥ खः सर्व ॥ ॥ स्त्रीलिङ्गनिर्देशोन्याप्य इति सर्वा चासौ धूश्चेति पूर्वकालैकेत्यादिना समासः ऋक्पूरब्धूरित्यकारः समासान्तः तत्र धूःश-
ब्दस्य स्त्रीलिङ्गत्वात्परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति वचनात् स्त्रीलिङ्गनिर्देशस्यान्याय्यत्वं यथा वंधुनि बहुव्रीहाविति यत्र दक्षिणाधुरीणः दक्षिणां धुरं वह-
ति उत्तरां धुरं वहतीति तद्धितार्थेति समासः ततोऽकारः समासान्तः ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥एकधुरात्॥ ॥एकधुराद्दिति निर्देशः सर्वधुरादित्यनेनव्याख्यातः चकारेणाखोनुकृष्यते तेन मतावद्विशेषः प्रत्ययादर्शनस्य चलुक्संज्ञान चामोत्रप्रसङ्गः तेन खस्यैव लुग्विज्ञायते तस्यापि लुक्स्याच्चकारेणानुकृष्य विधानमनर्थकं स्यात् एकधुराल्लुगिति वक्तव्ये लुक्खभावात् अनन्तरस्य खस्य प्राकरणिकस्य यतो वा विधिरनुमास्यते न दाह तस्य च लुग्भवतीति एकधुरीणः इति एकां धुरं वहतीति तद्धितार्थे समासः तत्रोक्तो कारः

॥एकधुराल्लुक् च॥ ॥तद्वहतीत्येव एकधुराशब्दाद्द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे खप्रत्ययो भवति तस्य च लुग्भवति वचनसामर्थ्यात् पक्षे लुग्विज्ञायते एकधुरां वहति एकधुरीणः एकधुरः॥ ॥शकटादण्॥ ॥तद्वहतीत्येव शकटशब्दात् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे अण्प्रत्ययो भवति शकटं वहति शाकटो गौः॥ ॥हलसीराट्ठक्॥ ॥तद्वहतीत्येव हलसीरशब्दाभ्यां द्वितीयासमर्थाभ्यां वहतीत्येतस्मिन्नर्थे ठक्प्रत्ययो भवति हलं वहति हालिकः सैरिकः ११

समासान्तः ततः खः॥ ॥शकटात्॥ ॥शकटादण्विधानमनर्थकं कथं शाकट इति तस्येदमित्यण भविष्यति यो हि शकटं वहति शकटस्यासौ वोढा भवति तत्राह अरम्भसामर्थ्यात् त्रापितदन्तविधिः द्वैहालिकः द्वैसारि तेन द्वे शकटे वहति द्वैशकट इति प्राग्दीव्यतीयो लुग् भवति॥ ॥हलसीरात्॥ ॥इह यो हलं वहति सीरं वा तस्यासौ वोढा भवति तत्र तस्येदं हलसीराद् गीस्येव हालिकः सैरिक इति सिद्धं नार्थो नेन अत्राह आरम्भसामर्थ्यात् त्रापितदन्तविधिः द्वैहालिकः द्वैसीरिकः त्रैसीरिक इति लुग् भवतीति॥ ११ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥संज्ञायां॥ ॥जामातुर्वधूस्येति माहिश्रणापकलहारौ जनी जामातुः समीपं प्रापय ति जनीं वधूरुच्यते इति जायापते स्यांगभेद इति कृत्वा जनिवृद्धिमा
मितीज प्रत्यये जनिवध्योश्चेति ह्रस्वप्रतिषेधे कर्दिकारात्कृतिन इति ङीष्॥ ॥विध्यति॥ ॥पादौ विध्यंतिपद्याः इति नृदंतीत्यर्थः यद्यत्र तदर्थ इति
पशवः ऊरमाइति। श्रोत्रगुणाः ग्रांतोपि प्रत्यये नन्व समर्थत्वादिति सापेक्षमसमर्थं भवतीत्यसामर्थ्यं प्रत्ययार्थे सति बाह्ये करणं धनुरपेक्ष्यते नन्व
मधनमत्र सापेक्षं करणं क्रिययोः संबंधात् अधनं च प्रधानं क्रिया प्रधानत्वात् आत्मोत स्य भवति च प्रधानस्य सापेक्षत्वेपि वृत्तिः यथा राजपु
रुषः शोभन इति भवतु क्रिया प्रधानमा ख्यातं तद्धित तुल्याभावात् साधनप्रधानः क्रियातु गुणाभूतेत्युक्तं साच धनुरपेक्षतस्तत्सामर्थ्यं अनभि

॥संज्ञायां जन्याः॥ ॥तद्वहतीत्येवजनी शब्दाद्धितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति समुदायेन चेत्सं
ज्ञा गम्यते॥ जनीं वहति जन्या जामातुर्वयस्या जनीवधूरुच्यते॥ ॥विध्यत्यधनुषा॥ ॥तदिति द्वितीयासमर्थाद्विध्यती
त्येतस्मिन्नर्थे यत्प्रत्ययो भवति न चेद्धनुः करणं भवति॥ पादौ विध्यंति पद्याः शर्कराः कुश्याः कंटकाः अधनुषेति किं पा
दौ विध्यति धनुषा॥ ननु चासमर्थत्वादनभिधानाच्चात्र प्रत्ययो न भविष्यति नहि धनुषा पद्य इत्युक्ते विवक्षितोर्थः प्रती
यते॥ एवं तर्हि धनुष्प्रतिषेधेन अधनक्रियाविशेष्यते यस्यां धनुः करणं न संभाव्यत इति चोरं विध्यति शत्रून्विध्यति देव
दत्त इति॥ ॥छ॥ ॥छ॥ ॥

धानाच्चेति अत्रैवोपपत्त्यंतरं अनभिधानमेव दर्शयति नहीति धनुषा पद्य इत्युक्ते स्वयंभूतलक्षणाः सहयोगलक्षणा वा तृतीया स्यादेवेन नु
पादौ धनुषा विध्यतीत्ययं विवक्षितोर्थः अवश्यं चैतदेवं विज्ञेयं असमर्थत्वादनभिधानाच्चात्र प्रत्ययो न भवतीति यो हि मन्यते अधनुषेति प्र
तिषेधात्प्रत्ययो न भवतीति तस्य शर्कराभिः पादौ विध्यति कंटके हस्तौ विध्यतीत्यत्र प्रत्ययः स्यादेव एवं तर्ह्यापत्ति॥ अधनेऽ विशेषोपलक्षणपरोत्र
धनुषेति निर्देशः ननु धनुषः करणत्वप्रतिषेधपर इत्यर्थः धनुष्प्रतिषेधेनेति नित्यं समासेनुत्तरपदस्थस्येति षत्वं उपलक्षणत्वमेव प्र
तिपादयति यस्यामिति तेनेह न भवति चोरं विध्यतीति संभाव्यते हि प्रयत्नछेदनादिकार्यं चोरस्य अधाना क्रियायां धनुषः करणत्वं॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥धनगणं॥ ॥लब्धेति लब्धं तृन्नन्तमेतमेत इति तृजन्तेन तु कर्तृकर्मणोः कृतीति षष्ठ्या भवितव्यं तन्न नेनुनलोकाव्ययनिष्ठेति प्रतिषेधाद्द्वितीयैव भवति॥
॥वशं॥ ॥वशं कान्ते वश कान्तौ वशः वशिरण्योरुपसंख्यानमिति सर्वकामस्थानं प्राप्त इति परेच्छानुगामीत्यर्थः॥ ॥पदमस्मिन्॥ ॥निर्दिष्टादेवप्रथ

॥धनगणं लब्धा॥ ॥तदस्मिन्नेव धनगणशब्दाभ्यां द्वितीयासमर्थाभ्यां लब्धा इत्येतस्मिन्नर्थे यथाविहितं यत्प्रत्ययो भ
वति· धनं लब्धा धन्यः गण्यः लब्धेति तृन्नन्तमेतत्तेन द्वितीयासमर्थविभक्तिर्युज्यते॥ ॥अन्नाण्णः॥ ॥अन्नशब्दाद्द्वि
तीयासमर्थाल्लब्धेत्येतस्मिन्नर्थे णप्रत्ययो भवति· अन्नं लब्धा आन्नः॥ ॥वशंगतः॥ ॥वशशब्दाद्द्वितीयासम
र्थात् गत इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति· वशंगतः वश्यः कामप्राप्तो विधेय इत्यर्थः॥ ॥पदमस्मिन्दृश्यं॥ ॥नि
र्दिष्टादेवात्र प्रथमासमर्थविभक्तिः पदशब्दात्प्रथमासमर्थाद्दृश्योपाधिकादस्मिन्निति सप्तम्यर्थे यत्प्रत्ययो भवति·
पदं दृश्यमस्मिन्पद्यः कर्दमः पद्याः पांसवः ग्रामार्थे कस्य शक्यते पत्रयदं द्रष्टुं प्रतिमुद्रोत्पादनसमर्थः कर्दमः क
र्दमस्यावस्थोच्यते नातिद्रवो नातिशुष्कः॥ ॥१३॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

मासमर्थविभक्तिरिति द्वितीया तु न भवति दृश्यमिति णिकर्मणोऽभिहितत्वात् शब्दार्थे कृत्प्रत्यय इति तेन योग्यत्वे सति पदस्पर्शाभा
वेऽपि पद्यः कर्दम इति प्रयोग उपपद्यत इति भावः मुद्रामेति वेद्याः प्रतिरूपां मुद्रां प्रतिमुद्रां नातिद्रवो नातिशुष्क इति पांसवोऽपि नातिस्थूला ना
तिबहुलाः पद्याः॥ ॥१३॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४
१५६

॥मूलमस्य॥ ॥प्रथमासमर्थादिति द्वितीयायाश्च निमित्ताभावान्निर्देशादेव प्रथमैव भवतीति भावः। उद्धृत्य उद्यमनेनावाक्षिपन्तं बादिः। इत्यतो हि उद्धृत्य
सह मूलमिन्द्रियस्य सुखिनः प्रबर्हणार्थेति ह्वबर्हति मनोदेवप्रत्ययश्चाबर्हणमाबर्हः उत्पाटनं यथा बर्हो मत्स्यस्तोमसाबर्हि सुखुपकानशमंतेमुग्रहौ
तु मध्यातो लुप्यमाने कोशस्याप्यपियस्थामवस्थायापातेप्रसमग्रस्थाप्राप्तादिस्वार्थः॥ ॥संज्ञायां॥ ॥यद्यप्यसको निपातस्तत्र तु कुत्रार्थे स्वयं
हि शार्यत्वात्तथैतद्दाहयाधेनुरूपं तस्मर्णायेति कथं पुनर्यतिप्रकृतेर्यस्सयो निपात्यते तत्राह्णीतोदातोपिस्वयं निपात्यत इति यनिहितिनिस्वरित

॥मूलमस्याबर्हि॥ ॥मूलशब्दात्प्रथमासमर्थादाबर्हीत्येवमुपाधिकादस्येति षष्ठ्यर्थे यत्प्रत्ययो भवति। मूलमेषामा
बर्हि मूल्या मुद्गाः। मूल्या माषाः। उद्धृत्य उद्यमनेनैषां मूलमाबर्ह्यते अपाद्यते ते मूल्याः। मुद्गा निष्फलाः। मूलोत्पाटनेन विना
संग्रहीतुं न शक्यन्त इत्यर्थः॥ ॥संज्ञायां धेनुष्या॥ ॥धेनुष्येति निपात्यते संज्ञाया विषये। संज्ञाग्रहणमभिधेयनियमार्थं
धेनोः सुगागमो यश्च प्रत्ययः। अन्तोदात्तोपि स्वयं निपात्यते। या धेनुरुत्तमर्णाय पन्था ऋणप्रदानादोहार्थं दीयते सा धेनुष्या
पीतदुग्धेति यस्याः प्रसिद्धिः। धेनुष्यां भवते दास्यामीति॥ ॥गृहपतिना संयुक्ते ञ्यः॥ ॥निर्देशादेव तृतीयासमर्थविभक्तिः
गृहपतिशब्दात्तृतीयासमर्थात्संयुक्त इत्येतस्मिन्नर्थे ञ्यः प्रत्ययो भवति। गृहपतिना संयुक्तो गार्हपत्योग्निः। अन्यस्यापि गृहप
तिना संयोगोस्ति तत्र संज्ञाधिकाराद् इतिप्रसङ्गनिवृत्तिः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

मिति स्वरितः स्यात्। अन्तोदात्तश्चेष्यते न केवलं संज्ञायामपि त्वन्तोदात्तोपीत्यपिशब्दस्यार्थः॥ ॥गृहपतिना॥ ॥अन्यस्यापीत्यादि। गृहपतिर्हि
यजमानः स यथा गार्हपत्ये कार्याणि करोतीति तथा दक्षिणाग्नावाहवनीये च भूयोवाहवनीये तस्मादन्यस्यापि गृहपतिना योगोस्तीति यद्येवं तत्राथ निमसं
गृह्यतन्नाह तत्रेति। अयमर्थः आह गृहपतिरग्निविशेषस्तेन संयोगो गार्हपत्यस्यैवाग्निहोत्रे यो गार्हपत्ये अग्नये गृहपतये प्रजापतये पत्नीसंयाजेषु
चतत्रैव इज्यत इति तत्रापि गृहपतिर्गृहपतिरग्निर्गृह्यते न यजमान इत्यत्र संज्ञाधिकार एव शरणम्॥

पा॰
१५६

© Dharmartha Trust J&K. Digitized by eGangotri

॥नौवयोधर्म॥ ॥तत्र नावादीनां प्रथमस्य मूलान्तानां पंचानां द्वितीयस्य मूलादीनां चत्वारिंशतो पूर्वं पृथक् पृथक् द्वन्द्वं कृत्वा ततो द्वन्द्वयोरप्येकद्वन्द्वः कृतः न
लक्षणानां पुनः पत्समस्तविग्रहः किं सिद्धं भवति मूलयोः सारूप्यादेकशेषो भवति का पुनरत्र समर्थविभक्तिरित्यत आह प्रत्ययार्थद्वारेणेति द्वारं मुखमुपायः
इह तार्याद्यः प्रत्ययार्थाः तत्संबंधेकएकतरो हि हेतौ तुल्यार्थयोगे च यथासंभवं तृतीयैव भवति नाम्नामिति अत्र नागसरणा क्रियाणां करणत्वं ब्रूयात्
तुल्यः इति तत्र हेतौ न तृतीया वयसा हेतुना प्रायेण वयस्तुल्यः सतमप्रति वयस्यः शत्रौ न भवतीति किंतु मित्र एव भवति ननु चेति धर्मेण प्राप्यं सुखादि फ

॥नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु॥ ॥नावादिभ्यो
ऽष्टभ्यः शब्देभ्यो यथासंख्यं तार्यादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवति। प्रत्ययार्थद्वारेण तत्समर्थविभक्तिर्ल
भ्यते। नावा तार्यं नाव्यमुदकं नाव्या नदी। वयसा तुल्यः वयस्यः सखा संज्ञाधिकारोऽभिधेयनि
यमार्थः तेन वयसा तुल्ये शत्रौ न भवति। धर्मेण प्राप्यं धर्म्यं। ननु च धर्मादनपेत इति वक्ष्यमाणेनैव सिद्धं ने
तदस्ति। धर्मपदं त्वनुवर्तते तद्धर्मादनपेतमपि सुखमतः फलं तु धर्मादपैत्येव कार्यविरोधित्वाद्धर्मस्य १४ ॥ ॥

लमपि धर्मादनपेतमेव कार्यस्य कारणाद्विनाभावादिति प्रश्नः४ धर्मपदमनुवर्तत इति अनादिः शिष्टसमाचारलक्षणो वा मत्सरो धर्मः तदनु
ष्ठानमनुवर्त्तते तद्धर्मादनपेतं फलं तु धर्मादपैत्येवेति कुत इत्याह। कार्यविरोधित्वादिति धर्मस्य कार्यं सुखानुभवः कार्यविरोधि नाशकं यस्य स
कार्यविरोधी तस्य भावः कार्यविरोधित्वं तस्मादित्यर्थः उत्पन्ने हि फले धर्मो नश्यति अन्यथा सकृद्धर्मे कृते स्वर्गमनुभवतः प्रभवो न स्यात्॥

॥ १४ ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का·प्र·४

१५५

वधमर्हतीत्यर्थ इति वधशब्दस्तं दर्शयति तत्रार्थे मुख्याश्रितत्वात् आनाम्यमभिभवनीयमिति अनेकार्थत्वाद्धातूनामाह पूर्वेण निमित्तमभि
भवन्ति पटादीनामुत्पत्तिकारणानीति पटादीनामुत्पत्त्यर्थं गृहीत्वा त्रिपुरुक्तं पटस्तन्तुन्मूलशब्देनाच्यते इत्यर्थः तेनेति मूलेन तदिति मूल्यं शेषीक्रि
यत इति शेषीकरणमेवात्राभिभव इत्यर्थः गुणाभावमापद्यते कथमित्याह मूल्यं हि सगुणं मूलं करोतीति मूल्यमिह कर्तृ मूलं कर्म यदा हि विक्री
यमाणो पुनः मूलाभेति किं वस्तु लाभो नाम तन्मूल्यं गुणो भागः स पुनरिह मूल्यमेव तेन सह वर्तते इति सगुणः द्विगुणो हि तौ एतदुक्तं भवति य
स्मान्मूल्यमात्मनैव भागभूतेन सभागं मूलं करोतीति तस्मान्मूलेन मूल्यमभिभूयते शेषीक्रियते मूल्यमानीतेन गुणेन सगुणं मूलं भवतीत्य

विषेण वध्यो विष्यः विषेण वधमर्हतीत्यर्थः मूलेनानाम्यं मूल्यं आनाम्यमभिभवनीयं पटादीनामुत्पत्तिकार
णं मूलं तेन तदभिभूयते शेषीक्रियते मूल्येन हि सगुणं मूलं करोति पटादि तिप्रत्ययप्राप्ते आनाम्यमिति निपात
नात् मूलेन समो मूल्यः पटः उपादानेन समानफल इत्यर्थः सीतया समितं सीत्यं क्षेत्रं समितं संगतमि
त्यर्थः रथ्या सीता हलेख्योपद्धतिरिति तदन्तविधिरपीष्यते परमसीत्यं उत्तमसीत्यं द्विसीत्यं त्रिसीत्यं तुलया संमि
तं तुल्यं संमितं सममानं सदृशमित्यर्थः यथा तुलापरिच्छिन्नं त्रिऽ एवमेतदपीति॥ ॥ ॥९१॥ ॥

मेव चानतिः आयमेवाभिभवः इत्येव शेषीकरणं लोके तु यावता द्रव्येण पटादिको विक्रीयते तत्र समुदाये मूल्यशब्दः प्रसिद्धो न मूलातिरिक्ते
भागे स च मूल्यसंभवादेकदेशिकः एवं च यत्रापि मूल्यं नास्ति दायप्रतिग्रहादिना क्षेत्रं क्रीयमाणेन तत्रापि क्रयद्रव्ये मूल्यशब्दप्रयोगः सिद्धो रा·स·
भवति सीता हलाग्रं सपूर्वाद्दिगाः समितं संगतं निष्पन्नं नाशितं हितं कृतमित्यर्थः समीकृतमिति यावत् द्विसीत्यमिति द्वाभ्यां सीताभ्यां समी १५५
कृतमिति तद्धितार्थे समासः ततः प्रत्ययः तुलया संमितं तुल्यमिति अत्र तुल्यार्थयोगे तृतीया यद्यपि तद्योगे षष्ठ्यपि भवति तथापि नावादि
भिः साहचर्यात् तुलाशब्दात् तृतीयासमर्थादेव प्रत्ययः अत एव पूर्वमुक्तं तृतीयासमर्थविभक्तिर्लभ्यत इति षष्ठ्यन्तादपि न कश्चिद्दोषः स्या
मस्तु कथितः कथं पुनस्तुल्यस्य तुलया सदृशत्वमत आह यथेति एवं तदपीति तदपि तुल्यं प्रतियोगिनः सादृश्येन परिच्छिन्नमिति एतत् खुल्यत्वम्

पत्तेन प्रदर्शितं सदृशपर्यायस्तुल्यशब्दः नावयवार्थः कश्चिदत एव तु
ल्यास्यप्रयत्नं सवर्णमित्यत्रोक्तं तुल्यशब्दः सदृशपर्याय इति ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

धर्मपथ्यर्थ॥ ॥निर्दिष्टादेवेति सत्यर्थसंभवे यंति रस्य च्यासंभवे सति निर्दिष्टादिति दृष्टव्यं धुरो यङ्ढकाविसत्त्रातिप्रसंगो नो ऽनुवर्तनीयः संज्ञा
धिकारादभिधेयस्य नियम इति शास्त्राणामपथोऽपदनपेतं तस्मात् न तु तस्मादनपेतमश्वोरः॥ ॥छंदसः॥ ॥प्रत्ययार्थसामर्थ्यलभ्येति निर्मि
तो छंदसः कारणात् इच्छापर्यायश्छंदः शब्दो गृह्यत इति न वेदवचनो नामेति छंदो वा द्विवचनः एतच्च संज्ञाधिकारान्नायते पद्यपि सखर्छंदतो हि वच

धर्मपथ्यर्थन्यायादनपेते॥ ॥निर्दिष्टादेव पंचमी समर्थविभक्तिः धर्मादिभ्यः पंचमीसमर्थेभ्यो ऽनपेते ऽर्थे
तस्मिन्नर्थे यत्प्रत्ययो भवति· धर्मादनपेतं धर्म्यं पथ्यं अर्थ्यं न्याय्यं संज्ञाधिकारादभिधेयनियमः॥ ॥छंदसो
निर्मिते॥ ॥प्रत्ययार्थसामर्थ्यलभ्या समर्थविभक्तिः छंदः शब्दात्तृतीयासमर्थान्निर्मित इत्येतस्मिन्नर्थे य
प्रत्ययो भवति· निर्मितमुत्पादितं· छंदसा निर्मितः छंदस्यः इच्छया कृत इत्यर्थः इच्छापर्यायश्छंदः शब्दोऽत्र
गृह्यते॥ ॥उरसोऽण् च॥ ॥उरस् शब्दात्तृतीयासमर्थान्निर्मित इत्येतस्मिन्नर्थे अण् प्रत्ययो भवति चकारा
द्यश्च· उरसा निर्मितः औरसः पुत्रः उरस्यः संज्ञाधिकारादभिधेयनियमः॥ ॥१५॥ ॥छ॥ ॥

सांप्रतमिति छंदोऽनुवृत्तिर्दुःसाधेत्याह वकारान्तश्छंदः शब्दः इच्छापर्यायः तथापि तस्यैव प्राणोऽस्तु तत्र तस्य च्छांदसत्वमविरुद्धं लोके प्रसिद्धं चे
तिमन्यते॥ ॥उरसः॥ औरसः पुत्र इति आत्मनोत्पादित इत्यर्थः संज्ञाधिकारादभिधेयनियम इति उरसा निर्मितं सुखमित्यादौ न भवति॥१५॥
॥श्रीः॥ ॥श्रीलक्ष्म्यायानमो नमः॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प्र॰ ५
१५९

॥हृदयस्य॥ ॥हृदयमंतःकरणं प्रियं प्रीतिकरं हृद्यमिति हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशः॥ ॥बंधने॥ ॥षष्ठीसमर्थादिति बंधनयोगे कथं योगलक्षणा कर्मणि षष्ठी आविर्वेदीण् हृद्यं तद्गुणमन्त्रविशेषः। हृदयस्य बन्धनं वशीकरणं तत्र समर्थं विशेषणस्य ग्रहणं न भवति संज्ञाधिकारात्॥ ॥मतजन॥ ॥प्रथमार्थसामर्थ्यं लब्धेति करणाद्यः प्रत्ययार्थाः तद्वचनाः कारणादयः शब्दाः कृदंताः तद्योगे षष्ठ्यर्थे कर्तृकर्मणोः कृतीति षष्ठी भवति संज्ञाधिकाराद्धलसंबंधाच्च कर्षशब्दोऽपि क्रियावचनोऽप्यतेन परिमाणशब्दः मतस्य करणमिति कर्मणि षष्ठी जनस्य जल्प इति

॥हृदयस्य प्रियः॥ ॥निर्देशादेव समर्थविभक्तिः हृदयशब्दात् षष्ठीसमर्थात् प्रिय इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति हृदयस्य प्रियः हृद्यो देशः हृद्यं वनं संज्ञाधिकारादभिधेयनियमः इह न भवति हृदयस्य प्रियः पुत्र इति॥ ॥बंधने चर्षौ॥ ॥हृदयस्येत्येव बंधन इति प्रत्ययार्थस्तद्विशेषणम् ऋषिग्रहणं बध्यते येन तद्बंधनं हृदयशब्दात् षष्ठीसमर्थाद्बंधने ऋषावभिधेये यत्प्रत्ययो भवति आविर्वेदीण् हृद्यते हृदयस्य बंधनो हृद्यः पाप हृदयं येन वध्यते वशीक्रियते स वशीकरणमन्त्रो हृद्य इत्युच्यते॥ ॥मतजनहलात्करणजल्पकर्षेषु॥ ॥मतादिभ्यस्त्रिभ्यः शब्देभ्यस्त्रिष्वेव करणादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवति प्रत्ययार्थसामर्थ्यलभ्या षष्ठी समर्थविभक्तिः मतं ज्ञानं तस्य करणं मत्यो भावः साधनं वा जनस्य जल्पः जन्यः हलस्य कर्षः हल्यः द्विहल्यं त्रिहल्यं कर्षणं कर्षः भावः साधनं वा॥ ॥तत्र साधुः॥ ॥तत्रेति सप्तमीसमर्थात् साधुरित्येतस्मिन्नर्थे यत्प्रत्ययो भवति सामसु साधुः सामन्यः कर्मण्यः शरण्यः साधुरिह प्रवीणो योग्यो वा गृह्यते नोपकारकस्तत्र हि परत्वात्तस्मै हितमित्यनेन विधिना तद्वित

कर्त्तरी जल्पशब्दो भावसाधनः अत एवात्र भावः साधनं वेति नोक्तं हलस्य कर्ष इति कर्मणि षष्ठी करणस्य वा कर्तृत्वविवक्षायां कर्तरीति द्विहल्य इति द्व्यसीताः हलेभ्यो द्विधा वितितं दत्तं विधिः॥ ॥तत्र साधुः॥ ॥सामन्य इति ये चाभावकर्मणोरिति प्रकृतिभावः प्रवीणो निपुणः योग्यः समर्थः तत्र हि परत्वादिति तस्मै हितमित्यनेन च तु र्थी समर्थात्प्रत्ययो विधीयते अनेन तु सप्तमीसमर्थात् तेन नात्र विप्रतिषेधः परमितेन त्वपरत्वात्परत्वं विधेवक्षितं किं तर्हि इष्टवाचीपरशब्दः उपकारलक्षणो या धो प्राक्क्रीताण्णा नामे वेष्टत्वात्तस्मै हितमित्यनेन विधिना

रा॰ म॰
१५९

© Dharmartha Trust J&K. Digitized by eGangotri

॥प्रतिजनादिभ्यः॥ ॥जनंजनंप्रतिप्रतिजनमितिपथार्थेयव्ययमितिवीप्साणमव्ययीभावः प्रतिजनेसाधुरितितत्रीणसमस्तोवंकुलंपर स्यकुलममुष्यकुलमितिषष्ठीसमासेऽस्मादेवनिपातनात्षष्ठ्याअलुक्पूर्वस्त्रउक्तंसाधुः प्रवीणोयोग्योवागृह्यतेनोपकारकः तत्रप्राक्क्री तीयानामेवेष्यतादिनिरहः तुमतथेसाहपश्चैतिप्राक्क्रीतीयमाह्यं नइतिश्च प्राप्तिस्त्रवाधः नहिवितुर्थ्यताद्धिधीयमानानां समर्थ्येभ्यः प्राप्तिर

॥प्रतिजनादिभ्यःखञ्॥ ॥प्रतिजनादिभ्यः शब्देभ्यः खञ्प्रत्ययोभवतितत्रसाधुरित्येतस्मिन्विषयेयतोपवादः प्रतिजनेसा धुः प्रातिजनीनः जनेजनेसाधुरित्यर्थः ऐदंयुगीनः सांयुगीनः प्रतिजन इदंयुग संयुग समयुग परयुग परकुल परस्यकुले अमुष्यकुल सर्वजन विश्वजन महाजन पंचजन॥ यत्रहितार्थएवसाधर्थस्तत्र वक्ष्यमाणाक्रीतीयावाध्यंते॥ ॥ भक्ताण्णः॥ ॥भक्तशब्दाण्णप्रत्ययोभवतितत्रसाधुरित्येतस्मिन्विषयेयतोपवादः भक्तेसाधुर्भाक्तः शालिः भाक्तास्तंदु लाः॥ ॥परिषदोण्यः॥ ॥परिषच्छब्दाण्यप्रत्ययोभवतितत्रसाधुरित्येतस्मिन्विषयेयतोपवादः परिषदिसाधुःपा रिषद्यः णप्रत्ययोऽप्यत्रेष्यतेतदर्थयोगविभागः क्रियतेपरिषदोण्णोभवतियरिषदिसाधुः पारिषदः॥ ॥कथादिभ्यष्ठक्॥ ॥कथादिभ्यः शब्देभ्यष्ठक्प्रत्ययोभवतितत्रसाधुरित्येतस्मिन्विषयेयतोपवादः कथायांसाधुः काथिकः वैकथि कः। कथा विकथा विश्वकथा वितंडा जनवाद जनेवाद वृत्ति संग्रह गुण गण आयुर्वेद॥ ॥गुडादिभ्यष्ठञ्॥ ॥गु डादिभ्यः शब्देभ्यष्ठञ्प्रत्ययोभवतितत्रसाधुरित्येतस्मिन्विषयेयतोपवादः गुडेसाधुर्गौडिक इक्षुः कौल्माषिकोपवःगु

॥ उकुल्माषसक्तु अपूप मांसौदन इक्षु वेणु संग्राम संघात संक्राम संवाह प्रवास निवास उपवास॥ १६

स्तितत्रप्राक्क्रीयतीयानभवंतीतिवक्ष्यमेवाह्यंतरसुक्तंचतुर्थ्येनेभ्योऽप्यनभिधानात्प्राक्क्रीतीयानभवंतीतिदर्शयितुं॥ ॥भक्तात्॥ ॥भाक्तास्तंदुलाइतिभक्तयोग्याव्रीहिः फलीकृतत्वात्॥ ॥परिषदः॥ ॥णप्रत्ययोऽप्यत्रेष्यतइतिपारिषद्याःकतिरेषात्रभवतां सर्वविदपारिषदंहीदंशास्त्रमितिचभाष्यकारप्रयोगात्॥ १६॥ ॥

का·पद·५

१६०

॥पथ्यतिथि॥ ॥पतंत्यनेनेति पंथाः गमेरिनिः पतेः स्थश्चेत्यतिसततं गच्छतीत्यतिथिः न विद्यते तिथिर्यस्यासावतिथिः एकरात्रिमपि दिनम
त्राथिनइत्यर्थः वसनं वसतिः वसेरवश्चेति प्रत्ययः तत्र योग्या वासतेयी रात्रिः स्वापतेयं धनं ॥ ॥समानतीर्थे॥ ॥
वसती निवासी निशानना स्मितिः ग्र स्याटेरा इति गणात्वात्कृ· साधुरिति निवृत्तमिति· तेन किंभवतीत्याह· वासीति प्रत्ययार्थः इति· सा

॥पथ्यतिथिवसतिस्वपतेर्ढञ्॥ ॥पथ्यादिभ्यः शब्देभ्यो ढञ्प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये यतोपवादः पथि
साधुपाथेयमन्नं आतिथेयं वासतेयं स्वापतेयं ॥ ॥सभायाः यः ॥ ॥सभाशब्दाद्यप्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये यतो
पवादः स्वरे विशेषः सभायां साधुः सभ्यः ॥ ॥ढश्छंदसि॥ ॥सभाशब्दात् ढप्रत्ययो भवति छंदसि विषये तत्र साधुरि
त्येतस्मिन्विषये यस्यापवादः सभेयो युवास्य यजमानस्य वीरो जायतां ॥ ॥समानतीर्थे वासी॥ ॥साधुरिति नि
वृत्तं वासीति प्रत्ययार्थः समानतीर्थशब्दात्तत्रेति सप्तमी समर्थाद्वासीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति समानती
र्थे वासी सतीर्थ्यः समानोपाध्याय इत्यर्थः तीर्थशब्देन गुरुरुच्यते· समानस्य सभावस्तीर्थे ये इति॥ ॥समानोदरे
शयित ओ चोदात्तः॥ ॥समानोदरशब्दात्सप्तमी समर्थाच्छयित इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति ओकारश्चोदा
त्तः शयितः स्थित इत्यर्थः समानोदरे शयितः समानोदर्यो भ्राता॥ ॥सोदराद्यः॥ ॥सोदरशब्दात्सप्तमीस
मर्थाच्छयित इत्येतस्मिन्नर्थे यप्रत्ययो भवति· विभाषोदरे इति प्रकृत्यादेशस्य सेविविक्षितेष्वा तो वा समानस्य सभावः
समानोदरे शयितः सोदर्यो भ्राता· ओ चोदात्त इति नानुवर्त्तते यशब्दे स्वरः॥ ॥

धुरिसस्यानुवृत्तोनुतस्येवविशेषणं वासिग्रहणं सामानतीर्थशब्देनेह गुरुरुच्यत इति प्रयोगा हितीर्थं साधर्म्यं तरस्त्यनेनेति तीर्थं तरतेः स्थनसुस्य
स्य तीर्थं स्य ग्रहणं न भवति संज्ञाधिकारात्॥ ॥समानोदरे॥ ॥ओकारश्चोदात्त इति तित्स्वरस्यापवादः शयितः स्थित इति शेतेः स्थिता
वपि वृत्तेः आमाशयो जलाशय इति यथा समानोदर्य इति उदीर्यत इत्युदरं इह कृत्यादेरलोपः पूर्वपदान्तलोपश्चैत्यलचोरमतरः समाने वेत

॥भवे छंदसि॥ ॥अग्रादीनां यादीनां चापवादः इति· तत्र भव इति· शाखानां सप्तदशिनेते पि सर्वंतीति· तद्यथा मूजवान्नाम पर्वतस्तत्र भवो मौ
जवतः सोमस्येव मौजवतस्य भक्षः मेध्यायेति· अत्र यतो ना गृह्स्याद्युदात्तत्वं प्राप्नोति अंत स्वरितं वा शीयत इति॥ ॥पाथो॥ ॥पाथोनदीभ्यामिति· पा
थिभूता घनकाशाटाने नेति हत्वा पथ पिपाने बलेजुरुट्ठक्कोशुद्रु· अन्ये चेति श्यन्तो दकयोः पाथः शाद्भ्योमुनि सुसाघते तन्याथि बाङ्कुलकादन्नदिस्ते

॥भवे छंदसि॥ ॥तत्रेयेव सप्तमी समर्थाद्भव इत्येतस्मिन्नर्थे छंदसि विषये यत्प्रत्ययो भवति अग्रादीनां घादीनां चापवादः
सप्तदशिनेते पि भवति सर्वविधीनां छंदसि व्यभिचारात मे ध्यापवनमो विप्रुसायत्व· आपाद इयसि समाप्ते छंदोधिकारः भवा
धिकारः समुद्राभ्राद्घ इतियावत्॥ ॥पाथोनदीभ्यां ड्यण्॥ ॥पाथः शब्दान्नदी शब्दाच्च ड्यण्प्रत्ययो भवति तत्र भव इत्ये
तस्मिन्विषये यतोपवादः पाथसि भवः पाथ्यो वृषा· नाद्यो गिरो मे प्रयच्छति· पाथ्यो न दिक्षे॥ ॥वेशंतहिमवद्भ्यामण्॥
॥वेशंतशब्दाद्धिमवच्छब्दाच्चाण्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये यतोपवादः वैशंतीभ्यः स्वाहा हैमवतीभ्यः स्वाहा·
॥ ॥स्रोतसो विभाषा ड्यड्ड्यौ॥ ॥स्रोतस् शब्दाद्विभाषा ड्यत् ड्य इत्येतौ प्रत्ययौ भवतस्तत्र भव इत्येतस्मिन्विषये यतोपवा
दः पक्षे सो पि भवति· स्रोतसि भवः स्रोत्यः स्रोतस्यः यत ड्ययोः स्वरे विशेषः॥ ॥सगर्भसयूथसनुताद्यन्॥ ॥सगर्भ
सयूथसनुत शब्देभ्यो यन्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये यतोपवादः स्वरे विशेषः अनुभ्राता सगर्भ्यः अनुस
खा सयूथ्यः योनः सनुत्यः सर्वत्र समानस्य छंदसीति सभावः॥ १७॥ ॥

भवति॥ ॥वेशंतहिमवद्भ्यां॥ ॥वेशंतः पल्वलं विशेषं च तत्र भवा आपः वैशंतः॥ ॥स्रोतसः॥ ॥स्रुतीभ्यां तु ह्येतस्मुन्स्रोतो नदी
प्रवाहः॥ ॥सगर्भ॥ ॥आर्गिहभ्यां भन् गिर तिगीर्यते वा गर्भः युता भवंत्यस्मिन्नूथं तिथ पृष्ठ गृथ यूथप्रोथा इति क्थन्नसमपांतो निपातितः
नु तिर्नुतिं नपुंसके भावे क्तः सगर्भादयस्त्रयोपि कर्मधारयाः॥ १७॥

॥तुग्रात्॥ ॥तुरुस्तुशम्यमः सार्वधातुके इत्यतः औणादिको रन् गुडागमः॥ ॥अग्रात्॥ ॥अजेर्ज्रोग्रेत्यग्रशब्दो निपातितः सामान्येनेतिभवे छंद
सीतितापवाधामाभूदितिपुनर्विधीयत इति एवमपि पद्महणमनर्थकं अग्रात् इत्येवास्तु प्राकरणिकोपदं द्रक्ष्यति अथवा अग्राद् छौ चेति चकारं द्र
क्ष्यति अयमपमा डिमतिमसम मुच्चयेन शक्यो विदेशस्थत्वात् एवमप्यनंतरस्य यतः समुच्चयो विज्ञायेत योगविभागे पुनरानंतरो यतेव स्यात् योगवि

॥तुग्राद्घन्॥ ॥तुग्रशब्दाद्घन्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये यत्नोपवादः तुग्रमग्रे हषमत्र अग्रिपाणां अन्लाका
शप्त्रत्रवाश्रिषेषु तुग्र्यः॥ ॥अग्राद्यत्॥ ॥अग्रशब्दाद्यत्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये अग्रे भवमग्र्यं
किमर्थमिदं यावता सामान्येन यद्विहित एव घछौ चेति वक्ष्यति तत्प्रवाधामाभूदितिपुनर्विधीयते॥ ॥घछौ च॥
॥अग्रशब्दाद्घछौ प्रत्ययौ भवतः तत्र भव इत्येतस्मिन्विषये अग्रियं अग्रीयं चकारस्तु ग्राह्य निसस्य यतो नुकर्षणार्थः
अग्र्यं स्वरे विशेषः॥ ॥समुद्राभ्राद्घः॥ ॥समुद्रशब्दादभ्रशब्दाच्च घप्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये यतो
पवादः समुद्रियाणां नदीनां अभ्रियस्येव घोषः अभ्रशब्दस्य पूर्वनिपातः लक्षणस्य व्यभिचारित्वात्॥ ॥
बर्हिषि दत्तं॥ ॥भव इति निवृत्तं बर्हिःशब्दात्सप्तमीसमर्थाद्दत्तमित्येतस्मिन्नर्थे यत्प्रत्ययो भवति बर्हिष्येषु निधिषु
प्रियेषु॥ ॥छ॥ ॥छ॥ ॥

भाग सामर्थ्याल्लभविष्यति अथ कथं ताम्बस एव चाग्रजनूनः एतच्छिवेविज्ञानीहि ब्राह्मणानां प्रस्य लक्षणामिति भाषायां प्रयोगः छंदोवद्दषयः कुर्वंति॥
॥घछौ च॥ ॥चकारस्तु ग्राह्य निसस्यानुकर्षणार्थं इति पूर्वमेव विहितस्य यतो नुकर्षणे प्रयोजनाभावात्॥ ॥समुद्राभ्रात्॥ ॥समुनत्तीति समुद्रः उंदेः
स्फायितञ्चीति रक् प्रत्ययः अपो बिभर्त्ति अभ्रं मूलविभुजादित्वात्कः तस्य लक्षणस्येति तस्य पूर्वनिपातस्य लक्षणं तस्येत्यर्थः अभिचारित्वादितिव्य
भिचारस्य चायमेव निर्देशो लिंगं॥ ॥बर्हिषि॥ ॥बृंहेर्नलोपश्चेतीसिप्रत्ययः बर्हिः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥हृतस्य॥ ॥हृतात्भागेतत्सोर्हमित्यस्मिन्प्रागेवचनंकर्मणीतुहृतवर्णिभ्यांचेसोयमस्मान्निक्षेपे॥ ॥रक्षोयातूनां॥ ॥रक्षेरसुनिरक्षःकमिमनिजनिसादिना
यातेस्तोयातुःयातुशब्दोरक्षःपर्यायःविरूपाणामपिसमानार्थानामित्येकशेषस्तुनभवतिबहुवचनाभिधानानिवरूपपरत्वेनसत्रेमित्वार्थ्योनिर्देशात निर्देशादेव
समर्थविभक्तिरिह्निसापुनःकर्तृकर्मणोःकृतीतिकर्मणिषष्ठीबहुवचनंस्तुतिवैशिष्ट्यज्ञापनार्थमितितद्विवहुवचनात्प्रत्ययविधयेऽन्यथाहित्वाहृत्वं

॥हृतस्यभागकर्मणी॥ ॥निर्दिष्टादेवसमर्थविभक्तिः हृतशब्दात्षष्ठीसमर्थाद्भागेकर्मणिवाभिधेयेयत्प्रत्ययो
भवति॰भागोंशः कर्मक्रिया॰ यत्तेअग्नेहृतभागः कर्मवा॥ ॥रक्षोयातूनांहननी॥ ॥निर्दिष्टादेवसमर्थविभक्तिः
रक्षःशब्दाद्यातुशब्दाच्चषष्ठीसमर्थाद्धननीत्येतस्मिन्नर्थेयत्प्रत्ययोभवति॰ हन्यतेनयेतिहननी॰ यातेअग्नेरक्षस्या
तनूः रक्षस्यांहननी॰ यातव्या॰ यातूनांहननी॰ बहुवचनंस्तुतिवैशिष्ट्यज्ञापनार्थंबहूनांरक्षसांहननेनतनूः
स्तूयते॥ ॥रेवतीजगतीहविष्याभ्यःप्रशस्ये॥ ॥रेवत्यादिभ्यःशब्देभ्यःषष्ठीसमर्थेभ्यःप्रशस्येवाभिधेयेयत्प्र
त्ययोभवति॰ प्रशंसनंप्रशस्यंभावेक्यप्प्रत्ययः यच्छोरेवतीरेवतीरेवत्यंयच्छोजगतीजगत्यंयच्छोहविष्याहविष्यं॰ ह
विषेहितांहविष्यास्तासांप्रशंसनेहविष्यंयस्येतिलोपेकृतेहलोयमांयमिलोपः॥ १८ ॥छ॥ ॥

नमेवस्याप्यंस्यात्।कथंपुनर्बहुवचनेनस्तुतिवैशिष्ट्यंज्ञाप्यतेतत्राहबहूनामितिबहुवचनांतात्प्रत्ययोबहूनांरक्षसांहननेसामर्थ्यमुक्तमतेमंत्रेतथा
चस्तुतिर्विशिष्टासंपन्नाभवतियोगस्याप्यंशेषिकयोरणछयोरपवादः॥ ॥रेवतीजगती॥ ॥रयिरस्यास्तीतिरेवतीरयेर्मतौबहुलमितिबहुलव
चनात्संप्रसारणांउगित्वान्ङीपूनस्त्रेतुगोरणरिहित्वान्ङीषुजगच्छतेर्वाछतवभावान्ङीपूषष्ठीसमर्थेभ्यइतिशंसस्तुतावित्यस्मात्कृत्यल्युटोबहुल
मितिभावेक्यपूतद्योगेकर्मणिषष्ठीभवतिहविषेहिताहविष्याउगवादिभ्योयत्॥ १८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥असुरस्य॥ ॥नसुरः असुरः सुरप्रतिपक्षः अथवा असेरुरन् अस्यन्त्यस्यन्ते वेत्यसुराः॥ ॥मायायां॥ ॥मीयन्तेनयेतिमाया असदर्थप्रकाशनशक्तिः
माङ् औणादिको यः नेतिवत्कर्त्तव्ये अणग्रहणं लाघवे विशेषाभावात्॥ ॥तद्वानासां॥ ॥मतुनिर्देशः मतोरप्रत्ययः तद्वानित्यवयवेन समुदायो नि
र्दिश्यत इति सविवक्षितो वर्चः शब्दादिरवयवोस्मिन्मन्त्रे लक्षणेन समुदायेप्तीत्येवमेकदेशार्थाभिधायिनः सर्वनाम्नः समुदाये मतुबर्थो गृहीत इत्यर्थः १ व

॥असुरस्य स्वं॥ ॥असुरशब्दात्षष्ठीसमर्थात्स्वमित्येतस्मिन्नर्थे यत्प्रत्ययो भवत्यणोपवादः असुर्यं वा एतत्पात्रं यच्चक्र
कृतं कुलालकृतं॥ ॥मायायामण्॥ ॥असुरशब्दात्षष्ठीसमर्थान्मायायां स्वविशेषे अण्प्रत्ययो भवति पूर्वस्य य
तोपवादः आसुरी माया स्वधया कृतासि॥ ॥तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः॥ ॥तद्वानिति निर्दिष्टा
देव समर्थविभक्तिः मतुबन्तात्प्रथमासमर्थादासामिति षष्ठ्यर्थे यत्प्रत्ययो भवति यत्तत्प्रथमासमर्थमुपधानो मन्त्रश्चे
त्स भवति यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति लुक् च मतोरिति प्रकृतिनिर्देशः इति करणात्तस्य विवक्षा·
तद्वानित्यवयवेन समुदायो व्यपदिश्यते· वर्चः शब्दो यस्मिन्मन्त्रे स वर्चस्वान् उपधीयते येन स उपधानः व्यपदे
शवचनस्त्वर्थः वर्चस्वानुपधानो मन्त्र आसामिष्टकानामिति विगृह्य यति विहिते मतुपो लुकि च कृते वर्चस्या उपद
धाति· तेजस्याः वयस्याः ऋतव्याः॥ ॥छ॥ ॥

र्चः शब्दोस्मिन्मन्त्रेस्तीति स पुनः कुम्भेष्टकोपधानमन्त्रः भूतं च स्थ भव्यं च स्थ देवस्य वः सवितुः प्रसवे इत्यादिकः वर्चस्या उपदधातीति यथा वर्चस्या भवन्ति तथो
पदधातीत्यर्थः तेजस्वान्मन्त्रः वसु च स्थ वामं च स्थ देवस्य वः सवितुरित्यादिकः वयस्वन्तो मन्त्राः अविर्वयः त्रिष्टुब्वय इत्यादिकाः ऋतुमन्तो मन्त्राः मधुश्च माधव
श्चेत्यादिकाः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्रादेवसमुदायान्मा भूदिति ननु तद्धानित्यस्मिन्नसति समर्थानां प्रथमाद्वेति वचनादासामिति प्रथमं निर्दिष्टत्वात्षष्ठ्यंतादिष्टकावाचिन उपधाने मंत्रे प्रत्ययविधिः प्रसज्जनीयः सत्यं आसामिति प्रथमं न करिष्यते इति मत्वा प्रश्नप्रतिवचनेन तत्स्थाने तद्धानित्यस्याभावे त्रविर्वयस्त्रिष्टुपूर्व्वं इत्ययमुपधानमंत्र आसा
मिति प्रथमं निर्दिष्टत्वात्षष्ठ्यंतादिष्टकावाचिन उपधाने मंत्रे प्रत्ययविधिः प्रसंजनीयः सत्यं आसामिति प्रथमं न करिष्यते इति मत्वा प्रश्नप्रतिवचनेन तत्स्थ
तद्धानित्यस्याभावे त्रविर्वयस्त्रिष्टुपूर्व्वं इत्ययमुपधानमंत्र आसामिष्टकानां वा इष्टकानामिति वा संबध्यते तत्र वेति नापरामृष्टो मंत्रसमुदायादेव प्रत्ययः प्रा
प्नोति वर्चस्वानुपस्थानमंत्र इत्सादित्युपस्थानं मंत्रेणाभिमंत्रणे विवक्षितं त्रिवेन मा च पुष्वेत्यादिकः कुंभेष्टकाभिमंत्रणे विनियुक्तः अंगुलिमानित्या
तद्धानिति किं मंत्रादेव समुदायान्मा भूत् उपधान इति किं वर्चस्वानुपस्थानमंत्र आसामित्यत्र मा भूत् मंत्र इति किं अं
गुलिमानुपधानो हस्त आसामित्यत्र मा भूत् इष्टकास्विति किं वर्चस्वानुपधानो मंत्र एषां कपालानामित्यत्र मा भूत्
इति करणो नियमार्थः अनेकपदसंभवेपि केन चिदेवपदेन तद्धान्मंत्रो गृह्यते न सर्वेण ॥ ॥ अश्विमानण् ॥
॥ अश्विशब्दोयस्मिन्मंत्रे स्तिसोश्विमान् अश्विमच्छब्दादण्प्रत्ययो भवति पूर्वस्यापवादः अश्विमानुप
धानो मंत्र आसामिति विगृह्याण्क्रियते मतुपो लुक्क्रियते इन एयनयतस्य इति प्रकृतिभावः आश्विनीरुपद
धाति ॥ ॥१९॥ ॥छ॥ ॥
रिप्यघपिसर्वासामिष्टकानामंगुलिमान्हस्त उपधानस्तथापि यास्तूष्णीमुपधेया इष्टकास्तासु मंत्रग्रहणस्यार्थवत्तया विशेषणसामर्थ्यवत् एषां कपाला
नामित्यत्र मा भूदिति स्त्रीलिंगनिर्देशाहस्त्राप्रसंग इति चेत् एवमपि शङ्केरासु प्रसंगः अनेकपदसंभवेपीति अस्मिन्निति करणे मंत्रे बहूनां संभवात्ये
न केन चित्स्येन तद्धान्मंत्रो गृह्येत तथा पदैकदेशेन वर्णसमुदायेन इति करणात्वयमतिप्रसंगो न भवति मतु व इह णमुत्तरार्थं अश्विमानित्य
त्र मतुपएव लुग्यथास्यादित्येवमीभूदिति इह तु मत्वंतात्प्रत्ययविधानात्तस्येव लुग्भविष्यति वर्चः शब्दादाव सुप्रभृतेरप्रसंगः उणादीनामव्युत्प
न्नत्वात् इह प्राणाभृत उपदधातीसोदात्वभेदेप्यचारान्तस्यभावः ॥ ॥ अश्विमानण् ॥ ॥ सोश्विमानितियघपि वहवोश्विमंतो मंत्रा ध्रुव
क्षितिरित्यादिकास्तथापि सामान्यायेक्षमेकवचनं ॥ १९ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का·प८०४
१६३

॥वयस्यासुमूर्ध्नोमतुप्॥ ॥वयस्यास्विति छंदसियावयस्याः इष्टकाउच्यंतेताः स्विसर्पः तास्ववस्थः तास्वंतस्यवतस्यो मूर्द्धन्वान्‌पः छिहंभोवयस्यादि
काः वयस्वच्छब्दमंत्रेरुपधेयाः तत्रचयथापिमूर्द्धावयःप्रजापतिश्छंदइतिमंत्रमिमएकस्मिन्नेवमंत्रेमूर्द्धशब्दोस्तितयापिसाहचर्याद्दिष्टंभोवयस्यायाश्च

॥वयस्यासुमूर्ध्नोमतुप्॥ ॥वयस्यानुपधानोमंत्रोपस्यांतावयस्यास्तास्वभिधेयासुमूर्ध्नोमतुप्प्र
त्ययोभवतिप्रकृतिसंबंधिनोमतोर्लुक्चपूर्वस्ययतोपवादः यस्मिन्मंत्रेवयःशब्दोमूर्द्धशब्दश्चावि
द्यतेसवयस्वानपिभवतिमूर्द्धन्वानपिभवतियथामूर्द्धावयः प्रजापतिश्छंदइतितत्रवयस्वच्छब्दा
दिवमूर्द्धन्वच्छब्दादपियतिप्राप्तेमतुब्विधीयते· मूर्द्धन्वतीरुपदधाति· वयस्याश्चतामूर्द्धन्वत्यश्च·
वयस्यास्वितिकिं॥ ॥श्री॥ ॥श्रीः॥ ॥श्री॥ ॥७॥ ॥७॥ ॥

एस०
१६३

त्वारोमूर्द्धन्वंतउच्यंतेयथाछत्रिणोयंतीतितेनमूर्द्धन्वतीरुपदधातीतिबहुवचनं मूर्द्धन्वानपिभवतीतिनच्चनोनुड्इतिछंदसिनुड्विधीयतेसत्वं
यथासत्रकारेणछांदसमेवपदंप्रयुक्तंवयस्यास्वितितथेदमपिहतिकारेणमूर्द्धन्वानपिभवतिछंदसीत्यर्थः।वयस्याश्चतामूर्द्धन्वत्यश्चेतिउभ
यथाछंदस्यभिधीयतइत्युक्तंभवति॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

यत्रमूर्द्धन्वच्छब्द एव केवलइति यथाग्नेयशाम्ब्रिमशासेममयेत्यादिके मंत्रे ततो मा भूदितितदभिधापिनो मूर्द्धनशब्दादित्यर्थः मूर्द्धन्वतइति वक्त
व्य इतितद्धानितिवलुक्त्वमनोरीतिचानुवर्त्तनेनतत्र्यमूर्द्धन्वतइति प्रकृतंवक्तुमितिभावः । इह तु गायत्रीः पुरस्तादुपदधातिते जो वै गायत्री तेज एव मुख
तोधत्ते मूर्धन्वतीर्भवंतीति पुरस्तात्सेगायत्रीषु मूर्द्धन्वतीशब्दः प्रथमं मतुबंतः मपुत्कः किंकारणांतदुपधानमंत्रेषु अग्निर्मूर्द्धादिव इत्यादिषु वयः शब्द

यत्रमूर्द्धशब्दएवकेवलोनवयः शब्दस्ततोमाभूत् । मूर्द्धन्वतइतिवक्तव्येमूर्द्धद्वत्युक्तंमतुपोलुकंभावि
नं चिन्त्वेकृत्वा ॥ ॥ मत्वर्थेमासतन्वोः ॥ ॥ यस्मिन्नर्थेमतुर्विहितस्तस्मिन्नुदं तद्विषयेयत्प्रत्ययो
भवतिमासतन्वोः प्रत्ययार्थविशेषणयोः प्रथमासमर्थात्तदस्युपाधिकात्षष्ठ्यर्थेसमस्यर्थेचयत्प्रत
योभवतिमत्वर्थीयानामपवादः । नभांसिविद्यन्तेयस्मिन्मासेनभस्योमासः । सहस्यः तपस्यः मधव्यः
नभः शब्देभ्येषुवर्त्तते । तस्यांखल्वपि ओजोस्यांविद्यतेओजस्यातनूः रक्षस्याः मासतन्वोरितिकिम
धुमतापात्रेणाचामति । मासतन्वोरनंतरार्थेचमध्यस्मिन्नास्तिमधस्मिन्ननंतरमितिवामधव्योमासः २०

स्याभावात् ॥ ॥ मत्वर्थेमासतन्वोः ॥ ॥ मत्वर्थग्रहणालब्धमर्थंदर्शयतिप्रथमासमर्थादित्यादिमासतन्वोरितिकिंविचामितनिधनिमर्ज्जिरवर्ज्जि
त्यउरित्यकारांतः तनूशब्दः सूत्रेनिर्द्दिष्टोनतुभमशीड् लचारिसततनिमिमस्जिभ्यउरितुकारांतः ह्रंह्रेहीतिपूर्वनियातप्रसंगात् अनंतरार्थेचेतिन
केवलंमत्वर्थमात्रेइतिचशब्दस्यार्थः ॥ २० ॥ ॥ ६२८ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰पद॰४ लुगकारेकारेफाश्चेत्यादिरित्यादि फइत्यत्र वर्णादिरिति न संबध्यते तेन समुदाय निर्देशो पि इफः कृतः अन्ये तु रेफशब्दाद् इति पठंति प्रत्यय इत्यधिकारो कारादिभिः संब
१६४ ध्यते न तु लुकातपनं तपः सहनं सहः भावे ऽसुन् तदस्मिन्नस्तीति सत्त्रेण विहितस्य प्रत्ययस्य लुक् कथं पुनरत्र नपुंसकत्वं यावता तद्धितलुकि समभिधेयवल्लिंगे भ
वितव्यम् अत आह नपुंसकलिंगं छांदसत्वादिति इष उर्जः इष्यमाणत्वात् ऊर्क् बलं ऊर्जो बल प्राणनयोः ताभ्याम् अकारः प्रत्ययः इषः ऊर्जः शोचनं शुक्रः सर्वव
क्विप् आतपातिरिके णाद्यादेः शोषः तद्वान् मासः शुचिः एवं शुक्रः अत्र छांदसत्वादेवायस्मयादित्वाद् भत्वाज्जश्त्वाभावः तदेवं छंदोधिकारे लुगादीनां वि

लुगकारेकारेफाश्च वक्तव्याः लुक् आवत् तपश्च तपस्यश्च नभश्च नभस्यश्च सहश्च सहस्यश्च नपुंसक
लिंगं छांदसत्वात् अकारः इषो मासः ऊर्जो मासः इकारः शुचिर्मासः रेफः शुक्रो मासः ॥ ॥मधोर्ञ्च॥
॥ मधुशब्दात् ञप्रत्ययो भवति चकाराद्यच्च लुक्चोपसंख्यानात् माधवः मधव्यः मधुः तत्रोत्सर्गेपि माध
वो मधव्यो मधुः तत्र ॥ ॥श्रीरामचंद्राय नमो नमः ॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥

धानाद्व्याख्यायां शुचिशुक्रादीनाम् मासाः प्रयोगश्च स्यात् शुचस्त्यते रेणावाश्च चतुष्त्वात् सानमस्यादयः शब्दा मासेषु वर्तंते इषो ऊर्जः शब्दाववर्शं आद्यच्प्रत्य राम॰
यांतौ मत्वर्थीये रप्रत्यये एषो दद्रादित्वाज्जश्त्वाभावे शुक्र इति भवति शोचतेरंतर्भावितण्यर्थात् रौणादिके किप्रत्यये कृते शुचिरिति भवति शोचयति संतापय
ति प्राणिन इति कृत्वा॰ अभिरोपचारान्नभः प्रभृतीनां मासेषु वृत्तिः नभस्प्रभृत यस्तु तत्र साधुरिति पदं ताः मतोश्छः सज्जमासाश्चोरित्यत्र यथा तदेणाप्य १६४
र्थग्रहणां मत्वर्थप्रत्ययो लभ्यमानेन तथेहापि लभ्यते नार्थो थग्रहणेन॥ ॥मधोर्ञ्च॥ ॥अत्रापि विभाषायां मधुयोगान्मासो मधुः तस्य प्रज्ञादि
त्वपाठादाद्युदात्तत्वं॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ओजसोहनियतवो॥ ॥पदद्वयग्रहणमनर्थकंखश्चैवस्ववक्तव्यंचकरात्साकरणिकोपद्दविष्यतिनैवंशकांखस्वैनुच्यमानेऽनंतरस्यैवविहितस्यत्रस्यस
मुच्चयोविज्ञायेततस्मात्पदद्वयग्रहणं॥ ॥खचा॥ ॥योगविभागःकस्मात्किंचित्पुनरेकमेवयोगमधीयतेतथाचयथासंख्यमनुदेशःसमानांप्रत्ययविधि

ओजसोहनियतवो॥ ॥ओजःशब्दान्मत्वर्थेयतवौप्रत्ययौभवतःअहन्नामिथेये॰ओजस्यमह॰ओजसीनं॥
॥वेशोयशआदेर्भगाद्यल॥ ॥मत्वार्थइत्येववेशोयशसीआदिर्यस्यप्रातिपदिकस्यतस्माद्वेशोयशआदेर्भगां
तान्मत्वर्थेयलप्रत्ययोभवतिलकारःस्वरार्थःवेशोभगोविद्यतेस्यवेशोभग्यःयशोभग्यःवेशइतिबलमुच्यतेश्री
काममयत्नमाहात्म्यवीर्ययशस्तुभगाश्चवेशसोभगःश्रीप्रभृतिर्वेशोभगः॥ ॥खच॥ ॥वेशोयशआ
देर्भगांतात्प्रातिपदिकान्मत्वर्थेखप्रत्ययोभवति वेशोभगीनःयशोभगीनःयोगविभागोयथासंख्यनिरासार्थः
उत्तरार्थश्च॥ ॥पूर्वैःकृतमिनयोच॥ ॥मत्वर्थइतिनिवृत्तंनिर्देशादेवसमर्थविभक्तिःपूर्वशब्दात्तृतीया
समर्थात्कृतमित्येतस्मिन्नर्थेइनयइत्येतौप्रत्ययौभवतःचकारात्खच॰यथिसिःपूर्वसिोःपूर्वैःपूर्विणोःपूर्वे
इतिबहुवचनांतेनपूर्वपुरुषाउच्यंतेतत्कृताःपंथानःप्रशस्ताइतियथाप्रशंसा॥ ॥अद्भिःसंस्कृतं॥ ॥
निर्देशादेवसमर्थविभक्तिःअपशब्दात्तृतीयासमर्थात्संस्कृतमित्येतस्मिन्नर्थेयत्प्रत्ययोभवतिअप्स्यंहविः

र्थेविकृवचननिर्देशःबहुवचनांतात्प्रत्ययोत्पत्तौयथासंख्यमिष्यतइतिउत्तरार्थश्चेतिउत्तरत्रखस्यैवानुवृत्तिर्यथास्याद्यतोमाभूदिति॥ ॥पूर्वैःकृत
मिनियोच॥ ॥बहुवचनांतेनेत्याहबहुवचनांतात्प्रत्ययविधिअर्थेविकृवचननिर्देशोबहुवचनांतात्प्रत्ययोत्पत्तौयथाप्रशंसागम्यतेपूर्वैर्बहुभिःक्रि
यतइतिप्रतीतिःतेनपूर्वशब्दश्चह्वेषुपुरुषेषुप्रवर्ततिइत्यर्थः॥ २१ ॥ ॥

का·प·१०·४
१६५

॥सहस्रेण संमितौ घः॥ ॥निर्देशादेव समर्थविभक्तिरिति सा पुनस्तुल्यार्थयोगे तृतीया संमित एव लक्षपितम् इति किं कारणम् इत्याह तत्रेति छन्दसि हि तत्र सं
मिते प्रयोगो दृश्यते॥ ॥सोममर्हति यः॥ ॥छन्दसीत्यधिकाराद् भाषायां सोम्यशब्दस्य साधुत्वं चिन्त्यम् आयुष्मान् भव सौम्येति वाच्यो विप्रो ऽभिवादन इति केचि

॥सहस्रेण सम्मितौ घः॥ ॥निर्देशादेव समर्थविभक्तिः सहस्रशब्दात् तृतीयासमर्थात् संमित इत्येतस्मिन्नर्थे घप्रत्य
यो भवति· संमितः स कल्पः सहस्रः अयमग्निः सहस्रियः सहस्रेण तुल्य इत्यर्थः केचित्तु संमिताविति पठन्ति तत्रापि सं
मित एव लक्षपितम् तत्र छन्दसि प्रयोगादर्शनात्·॥ ॥मतौ च॥ ॥मत्वर्थे च सहस्रशब्दाद् घप्रत्ययो भवति· सहस्र
मस्य विद्यते सहस्रियः तयः सहस्राभ्यां विनिनौ अनावित्यस्यापवादः॥ ॥सोममर्हति यः॥ ॥निर्देशादेव समर्थ
विभक्तिः सोमशब्दाद् द्वितीयासमर्थाद् अर्हतीत्येतस्मिन्नर्थे यप्रत्ययो भवति सोमम् अर्हतीति सोम्यो ब्राह्मणः यज्ञार्ह इत्यर्थः
यतिप्रत्ययग्रहणं स्वरविशेषार्थम्॥ ॥मये च॥ ॥सोमग्रहणं यप्रत्ययश्चानुवर्तते· मय इति मयडर्थो लक्ष्यते· सो
मशब्दान्मयडर्थे यप्रत्ययो भवति· विकारावयवप्रभृतयो मयडर्थाः हेतुमनुष्येभ्यो ऽन्यतरस्यां रूप्यः मयट् च मयड् वैत
योर्भाषायामभक्ष्याच्छादनयोः तत्प्रकृतवचने मयड् इति च तत्र यथायोगं समर्थविभक्तिः सोम्यं मधु पिबन्ति सोममयमि
त्यर्थः॥ ॥मध्वोः॥ ॥यज्ञादौ निवृत्तः मधुशब्दान्मयडर्थे यत्प्रत्ययो भवति· मध्यमान्तोकान् मधुमयानित्यर्थः राम·

सौम्येति ह द्विः पठन्ति सोम्यशब्दो ऽर्हणीयवचनः सुखादिवत्॥ ॥मये च॥ ॥मय इति मयडर्थो लक्ष्यत इति शाब्दे कार्यस्यासंभवात् तत्र यथायोगं सम १६५
र्थविभक्तिरिति आ॥ तेयं च मा विकारावयवयोः षष्ठी प्रकृतवचने प्रथमा॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

का॰ प॰ ४
१६६

॥वसोः समूहे च॥ ॥आश्रावयेत्यादिकस्याक्षरसमूहस्य पंचसु प्रदर्शनात्मकत्वं छंदसोऽक्षरसमूहः प्रजापतिः प्रजापतिनादृष्टः हस्तौ पृणास्वेति पृणा
तिः पृणकर्मा॥ ॥नक्षत्राद्घः॥ ॥समूह इति नानुवर्त्तत इति ते नानिर्दिष्टार्थत्वात्स्वार्थे प्रत्यय उत्पद्यत इति भावः॥ ॥शिवशमरिष्टस्य करे॥ ॥

॥वसोः समूहे च॥ ॥वसुशब्दात्समूहे वाच्ये यत्प्रत्ययो भवति चकारान्मयडर्थे च यथायोगं समर्थविभक्तिः व
सव्यः समूहः मयडर्थे गि॰ अक्षरसमूहे छंदसः स्वार्थ उपसंख्यानं॰ आश्रावयेति चतुरक्षरं अस्तु श्रौषडिति च
तुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पंचाक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशाक्षरश्छंदस्यः प्रजापतिर्यज्ञमनुविहि
तः सप्तदशाक्षराण्येव छंदस्यं स्वार्थः छंदः शब्दादक्षरसमूहे वर्तमानात्स्वार्थे यत्प्रत्ययः। वसुशब्दादपि स्वार्थे
यदुच्यते हस्तौ पृणास्व बहुभिर्वसव्यैः वसुभिरित्यर्थः॥ ॥नक्षत्राद्घः॥ ॥समूह इति नानुवर्तते नक्षत्रश
ब्दात्स्वार्थे घप्रत्ययो भवति नक्षत्रियेभ्यः स्वाहा॥ ॥सर्वदेवात्तातिल्॥ ॥सर्वदेवशब्दाभ्यां तातिल्प्रत्ययो भव
ति छंदसि स्वार्थिकः सर्वतातिः देवतातिः॥ ॥शिवशमरिष्टस्य करे॥ ॥करोतीति करः प्रत्ययार्थः तत्सामर्थ्य
लभ्या षष्ठी समर्थविभक्तिः शिवादिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यः करइत्येतस्मिन्नर्थे तातिल्प्रत्ययो भवति॰ शि
वं करोतीति शिवतातिः शंतातिः अरिष्टतातिः॥ ॥भावे च॥ ॥भावे चार्थे छंदसि विषये शिवादिभ्यस्तातिल्प्र
त्ययो भवति॰ शिवस्य भावः शिवतातिः शंतातिः अरिष्टतातिः। यतः प्रभृति विधिरतः परमन्यः प्रत्ययो विधिर्यते॥
॥ ॥इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थस्याध्यायस्य चतुर्थः

करोतीति कर इति पचाद्यच् सामर्थ्याल्लभ्या षष्ठी समर्थविभक्तिरिति सा पुनः कृद्योगलक्षणा कर्मणि भाषायां शिवतातिप्रभृतीनां साधुत्वं चिंत्यं॥ ॥इ
ति हरदत्तमिश्रविरचितायां पदमंजर्यां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तोऽध्यायश्च॥ १२ ॥ ॥श्रीरघुवंशकुलदीपकाय नमः॥ ॥श्री॥

राम ४॥
१६६

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ४

४

© Dharmartha Trust J&K. Digitized by eGangotri